बीएड प्रथम वर्ष

# संस्कृतशिक्षणम्

**GEDE-12**

मध्यप्रदेश भोज (मुक्त) विश्वविद्यालय – भोपाल

**MADHYA PRADESH BHOJ (OPEN) UNIVERSITY - BHOPAL**

***Reviewer Committee***

1. Dr. Nitin Kumar Jain
   Assistant Professor
   Rashtriya Sanskrit Sansthan, Bhopal (M.P.)

2. Dr. Yojana Lad
   Assistant Professor (Guest Faculty)
   Madhya Pradesh Bhoj (Open) University
   Bhopal (M.P.)

3. Dr. Pravini Pandaagle
   Professor
   NRI Group Of Institutions, Bhopal (M.P.)

***Advisory Committee***

1. Dr. Jayant Sonwalkar
   Hon'ble Vice Chancellor
   Madhya Pradesh Bhoj (Open) University
   Bhopal (M.P.)

2. Dr. L.S.Solanki
   Registrar
   Madhya Pradesh Bhoj (Open) University
   Bhopal (M.P.)

3. Dr. Hemlata Dinkar
   HOD, DME
   Madhya Pradesh Bhoj (Open) University
   Bhopal (M.P.)

4. Dr. Nitin Kumar Jain
   Assistant Professor
   Rashtriya Sanskrit Sansthan, Bhopal (M.P.)

5. Dr. Yojana Lad
   Assistant Professor (Guest Faculty)
   Madhya Pradesh Bhoj (Open) University
   Bhopal (M.P.)

6. Dr. Pravini Pandaagle
   Professor
   NRI Group Of Institutions, Bhopal (M.P.)

**COURSE WRITERS**

**Dr Mamta Ghatol,** Former Assistant Professor, Sri Sai Institute of Ayurvedic Research and Medicine (SIARAM) Bhopal
Units: (1-4)

Copyright © Reserved, Madhya Pradesh Bhoj (Open) University, Bhopal

All rights reserved. No part of this publication which is material protected by this copyright notice may be reproduced or transmitted or utilized or stored in any form or by any means now known or hereinafter invented, electronic, digital or mechanical, including photocopying, scanning, recording or by any information storage or retrieval system, without prior written permission from the Registrar, Madhya Pradesh Bhoj (Open) University, Bhopal.

Information contained in this book has been published by VIKAS® Publishing House Pvt. Ltd. and has been obtained by its Authors from sources believed to be reliable and are correct to the best of their knowledge. However, the Madhya Pradesh Bhoj (Open) University, Bhopal, Publisher and its Authors shall in no event be liable for any errors, omissions or damages arising out of use of this information and specifically disclaim any implied warranties or merchantability or fitness for any particular use.

Published by Registrar, MP Bhoj (Open) University, Bhopal in 2020

VIKAS®

Vikas® is the registered trademark of Vikas® Publishing House Pvt. Ltd.

VIKAS® PUBLISHING HOUSE PVT. LTD.
E-28, Sector-8, Noida - 201301 (UP)
Phone: 0120-4078900 • Fax: 0120-4078999
Regd. Office: A-27, 2nd Floor, Mohan Co-operative Industrial Estate, New Delhi 1100 44
• Website: www.vikaspublishing.com • Email: helpline@vikaspublishing.com

# SYLLABI-BOOK MAPPING TABLE

## संस्कृतशिक्षणम्

| Syllabi | Mapping in Book |
| --- | --- |
| **एककः – 1**<br>अनुशासनात्मकावधारणा महत्त्वं च – संस्कृतभाषायाः प्रकृतिः, संस्कृतभाषायाः भाषालक्षणानि, भाषाक्रमः, भाषोत्पत्तिवादाः च – भाषा–संस्कृति–विज्ञान–समाज–राष्ट्र–विश्वदृष्ट्या संस्कृतस्य महत्त्वम्; संस्कृतशिक्षणेतिहासः – वैदिककाले संस्कृतशिक्षणम् – उत्तरवैदिककाले संस्कृतशिक्षणम् – मध्यकाले संस्कृतशिक्षणम् – ब्रिटिशकाले संस्कृतशिक्षणम् – स्वातन्त्र्योत्तरकाले संस्कृतशिक्षणम् – त्रिभाषासूत्रम्; भारतीयपाश्चात्त्यविदुषां भाषाशिक्षणसम्बद्धविचाराः – भारतीयाः–याज्ञवल्क्यः, पाणिनिः, भर्तृहरिः, पतञ्जलिः – पाश्चात्त्याः– जीन प्याजे, लेव व्यगोत्सकी, ब्रूनर, नॉम चोम्स्की; संस्कृतप्रचाराय शासकीयाशासकीयप्रयत्नाः – शासकीयाः–संस्कृतायोगौ, विश्वविद्यालयाः, संस्थानानि, अकादम्यः, निदेशालयाश्च – अशासकीयाः– संघटनानि, संस्थाः, परिषदः, अन्ये प्रयत्नाश्च | **एककः 1** : संस्कृतस्य अवधारणा, शिक्षणेतिहासः, प्रचारप्रयत्नाश्च<br>**(पृष्ठ 3–41)** |
| **एककः – 2**<br>संस्कृतशिक्षणस्य सिद्धान्ताः – स्वाभाविकता सिद्धान्तः – अभिरुचिः सिद्धांतः – अभ्यास स्वतन्त्रता च सिद्धान्तः – अनुकरणं सिद्धांतः – सक्रियताः सिद्धान्तः; विविधस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि – प्राथमिक–माध्यमिक– उच्चमाध्य–मिकस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि – शिक्षणाय व्यावहारिकोद्देश्यानां लेखनम्; संस्कृतशिक्षणोपागमाः – सम्प्रेषणात्मकोपागमः – संरचनात्मकोपागमः – निदानात्मकोपागमः – उपचारात्मकोपागमः – अभिक्रमितानुदेशनोपागमः; संस्कृतशिक्षणसूत्राणि उपकरणानि च – शिक्षणसूत्राणि, श्रव्योपकरणानि, दृश्योपकरणानि, श्रव्य–दृश्योपकरणानि | **एककः 2** : संस्कृतशिक्षणस्य सिद्धान्ताः, उद्देश्यानि, उपागमाश्च<br>**(पृष्ठ 43–66)** |
| **एककः – 3**<br>श्रवणकौशलम् – श्रवणकौशलपरिचयः प्रयोजनश्च – संस्कृतश्रवणाय गृह–कक्षा–विद्यालयेषु वातावरणनिर्माणम् – श्रवणकौशलसम्बद्धसामग्रयाः विकासः – भाषाप्रयोगशालायां श्रवणकौशलसम्बद्धगतिविधयः; सम्भाषणकौशलम् – भाषणकौशलपरिचयः – संस्कृतसम्भाषणाय गृह–कक्षा–विद्यालयेषु वातावरणनिर्माणम् – भाषणकौशलसम्बद्धसामग्रयाः विकासः – भाषाप्रयोगशालायां भाषणकौशलसम्बद्धगतिविधयः; पठनकौशलम् – पठनकौशलपरिचयः – पठनकौशलाय गृह–कक्षा–विद्यालयेषु वातावरणनिर्माणम् – पठनकौशल–सम्बद्धसामग्रयाः विकासः – भाषाप्रयोगशालायां पठनकौशलसम्बद्धगतिविधयः, लेखनकौशलम् – लेखनकौशलपरिचयः – लेखन कौशलाय गृह कक्षा विद्यालयेषु वातावरणनिर्माणं – लेखनकौशलसम्बद्धसामग्रयाः विकासः – भाषाप्रयोगशालायां लेखनकौशलसम्बद्धगतिविधयः | **एककः 3** : संस्कृतभाषाकौशलानि<br>**(पृष्ठ 67–78)** |

| | |
|---|---|
| **एककः – 4**<br>गद्यशिक्षणम् – गद्यसाहित्यपरिचयः – गद्यशिक्षणोद्देश्यानि – गद्यशिक्षणभेदाः– नाटक–कथा–निबन्ध–अनुवादशिक्षणानि – गद्यशिक्षणस्य विधयः– व्याख्या–टीका–भाष्य–प्रत्यक्ष– कोश–तुलनाविधयः – गद्यशिक्षणस्य पाठयोजना; पद्यशिक्षणम् – पद्यसाहित्यपरिचयः – पद्यशिक्षणोद्देश्यानि – पद्यशिक्षणभेदाः– श्लोक–गीतशिक्षणे – पद्यशिक्षणविषयः– दण्डान्वयखण्डान्वयौ, व्याख्या, टीका, तुलना – पद्यशिक्षणस्य पाठयोजना; व्याकरण शिक्षणम् – संस्कृतव्याकरणस्य परिचयः – व्याकरणशिक्षणस्य उद्देश्यानि – व्याकरणशिक्षणस्य विधयः– आगमन–निगमनविधिः, सूत्रविधिः, अनौपचारिकविधिः – व्याकरणशिक्षणस्य पाठयोजना; संस्कृतशिक्षणे मूल्यांकनम् – मूल्यांकनतात्पर्यम् – मूल्यांकनप्रकाराः– वस्तुनिष्ठं, आत्मनिष्ठं च, मौखिकं लिखितं च – निर्माणात्मकं योगात्मकं च मूल्यांकनम् – संस्कृत क्षेत्रे मूल्यांकन सम्बद्ध समस्या समाधानि च | **एककः 4** : संस्कृत शिक्षणस्य विषयः, मूल्यांकनम्<br>**(पृष्ठ 79–98)** |

# विषय–सूची

**परिचयः** **1**

**एककः 1 संस्कृतस्य अवधारणा, शिक्षणेतिहासः, प्रचारप्रयत्नाश्च** **3–42**

1.0 परिचयः
1.1 उद्देश्यानि
1.2 अनुशासनात्मकावधारणा महत्त्वं च
  1.2.1 संस्कृतभाषायाः प्रकृतिः
  1.2.2 संस्कृतभाषायाः भाषालक्षणानि, भाषाक्रमः, भाषोत्पत्तिवादाः च
  1.2.3 भाषा–संस्कृति–विज्ञान–समाज–राष्ट्र–विश्वदृष्ट्या संस्कृतस्य महत्त्वम्
1.3 संस्कृतशिक्षणेतिहासः
  1.3.1 वैदिककाले संस्कृतशिक्षणम्
  1.3.2 उत्तरवैदिककाले संस्कृतशिक्षणम्
  1.3.3 मध्यकाले संस्कृतशिक्षणम्
  1.3.4 ब्रिटिशकाले संस्कृतशिक्षणम्
  1.3.5 स्वातन्त्र्योत्तरकाले संस्कृतशिक्षणम्
  1.3.6 त्रिभाषासूत्रम्
1.4 भारतीयपाश्चात्त्यविदुषां भाषाशिक्षणसम्बद्धविचाराः
  1.4.1 भारतीयाः–याज्ञवल्क्यः, पाणिनिः, भर्तृहरिः, पतञ्जलिः
  1.4.2 पाश्चात्त्याः– जीन प्याजे, लेव व्यगोत्सकी, ब्रूनर, नॉम चोम्स्की
1.5 संस्कृतप्रचाराय शासकीयाशासकीयप्रयत्नाः
  1.5.1 शासकीयाः– संस्कृतायोगौ, विश्वविद्यालयाः, संस्थानानि, अकादम्यः, निदेशालयाश्च
  1.5.2 अशासकीयाः– संघटनानि, संस्थाः, परिषदः, अन्ये प्रयत्नाश्च
1.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि
1.7 सारांशः
1.8 मुख्यशब्दावलीः
1.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च
1.10 सहायकपाठ्यसामग्री

**एककः 2 संस्कृतशिक्षणस्य सिद्धान्ताः, उद्देश्यानि, उपागमाश्च** **43–66**

2.0 परिचयः
2.1 उद्देश्यानि
2.2 संस्कृतशिक्षणस्य सिद्धान्ताः
  2.2.1 स्वाभाविकता सिद्धान्तः
  2.2.2 अभिरुचिः सिद्धांतः
  2.2.3 अभ्यास स्वतन्त्रता च सिद्धान्तः
  2.2.4 अनुकरणं सिद्धांतः
  2.2.5 सक्रियताः सिद्धान्तः
2.3 विविधस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि
  2.3.1 प्राथमिक–माध्यमिक–उच्चमाध्यमिकस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि
  2.3.2 शिक्षणाय व्यावहारिकोद्देश्यानां लेखनम्
2.4 संस्कृतशिक्षणोपागमाः
  2.4.1 सम्प्रेषणात्मकोपागमः
  2.4.2 संरचनात्मकोपागमः
  2.4.3 निदानात्मकोपागमः

2.4.4 उपचारात्मकोपागमः
2.4.5 अभिक्रमितानुदेशनोपागमः
2.5 संस्कृतशिक्षणसूत्राणि उपकरणानि च
2.5.1 शिक्षणसूत्राणि, श्रव्योपकरणानि, दृश्योपकरणानि, श्रव्य–दृश्योपकरणानि
2.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि
2.7 सारांशः
2.8 मुख्यशब्दावलीः
2.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च
2.10 सहायकपाठ्यसामग्री

**एककः 3 संस्कृतभाषाकौशलानि** **67—78**
3.0 परिचयः
3.1 उद्देश्यानि
3.2 श्रवणकौशलम्
3.2.1 श्रवणकौशलपरिचयः प्रयोजनश्च
3.2.2 संस्कृतश्रवणाय गृह–कक्षा–विद्यालयेषु वातावरणनिर्माणम्
3.2.3 श्रवणकौशलसम्बद्धसामग्रयाः विकासः
3.2.4 भाषाप्रयोगशालायां श्रवणकौशलसम्बद्धगतिविधयः
3.3 सम्भाषणकौशलम्
3.3.1 भाषणकौशलपरिचयः
3.3.2 संस्कृतसम्भाषणाय गृह–कक्षा–विद्यालयेषु वातावरणनिर्माणम्
3.3.3 भाषणकोशलसम्बद्धसामग्रयाः विकासः
3.3.4 भाषाप्रयोगशालायां भाषणकौशलसम्बद्धगतिविधयः
3.4 पठनकौशलम्
3.4.1 पठनकौशलपरिचयः
3.4.2 पठनकौशलाय गृह–कक्षा–विद्यालयेषु वातावरणनिर्माणम्
3.4.3 पठनकौशलसम्बद्धसामग्रयाः विकासः
3.4.4 भाषाप्रयोगशालायां पठनकौशलसम्बद्धगतिविधयः
3.5 लेखनकौशलम्
3.5.1 लेखनकौशलपरिचयः
3.5.2 लेखन कौशलाय गृह कक्षा विद्यालयेषु वातावरणनिर्माणं
3.5.3 लेखनकौशलसम्बद्धसामग्रयाः विकासः
3.5.4 भाषाप्रयोगशालायां लेखनकौशलसम्बद्धगतिविधयः
3.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि
3.7 सारांशः
3.8 मुख्यशब्दावलीः
3.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च
3.10 सहायकपाठ्यसामग्री

**एककः 4 संस्कृत शिक्षणस्य विषयः, मूल्यांकनम्** **79—98**
4.0 परिचयः
4.1 उद्देश्यानि
4.2 गद्यशिक्षणम्
4.2.1 गद्यसाहित्यपरिचयः
4.2.2 गद्यशिक्षणोद्देश्यानि

4.2.3 गद्यशिक्षणभेदाः– नाटक–कथा–निबन्ध–अनुवादशिक्षणानि

4.2.4 गद्यशिक्षणस्य विधयः– व्याख्या–टीका–भाष्य–प्रत्यक्ष– कोश–तुलनाविधयः

4.2.5 गद्यशिक्षणस्य पाठयोजना

4.3 पद्यशिक्षणम्

4.3.1 पद्यसाहित्यपरिचयः

4.3.2 पद्यशिक्षणोद्देश्यानि

4.3.3 पद्यशिक्षणभेदाः– श्लोक–गीतशिक्षणे

4.3.4 पद्यशिक्षणविषयः– दण्डान्वयखण्डान्वयौ, व्याख्या, टीका, तुलना

4.3.5 पद्यशिक्षणस्य पाठयोजना

4.4 व्याकरण शिक्षणम्

4.4.1 संस्कृतव्याकरणस्य परिचयः

4.4.2 व्याकरणशिक्षणस्य उद्देश्यानि

4.4.3 व्याकरणशिक्षणस्य विधयः– आगमन–निगमनविधिः, सूत्रविधिः, अनौपचारिकविधिः

4.4.4 व्याकरणशिक्षणस्य पाठयोजना

4.5 संस्कृतशिक्षणे मूल्यांकनम्

4.5.1 मूल्यांकनतात्पर्यम्

4.5.2 मूल्यांकनप्रकाराः– वस्तुनिष्ठं, आत्मनिष्ठं च, मौखिकं लिखितं च

4.5.3 निर्माणात्मकं योगात्मकं च मूल्यांकनम्

4.5.4 संस्कृत क्षेत्रे मूल्यांकन सम्बद्ध समस्या समाधानि च

4.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि

4.7 सारांशः

4.8 मुख्यशब्दावलीः

4.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च

4.10 सहायकपाठ्यसामग्री

# परिचयः

टिप्पणी

प्रस्तुत 'संस्कृतशिक्षणम्' पुस्तकस्य लेखनं विश्वविद्यालयाय निर्धारितः बी.एड. (संस्कृतम्) प्रथम वर्षस्य निर्धारित पाठ्यक्रमे अनुरूपं क्रियताम्।

ऐतिहासिक दृष्टया संस्कृत भाषा समस्त भारतीय भाषायां जननी अस्ति। इयं भाषा भारतीय संस्कृते मुख्य आधारः अस्ति। भारतस्य प्राचीन मानव–मूल्यानां परम्परानां संवर्धनाय संस्कृत भाषास्य अध्ययन–अध्यापनं अतिआवश्यकः अस्ति। संस्कृतस्य समस्त वाङ्गमयः पद्यात्मकः गद्यात्मकः च रूपेण प्राप्नोति।

पद्य साहित्य च गद्य साहित्यस्य दर्शनं न केवलं वैदिक वाङ्गमये प्राप्नोति अपितु लौकिक साहित्ये अपि उपलब्धं भवति। अस्माकम् संपूर्ण प्राचीन साहित्य संस्कृतभाषायां एव विरचितः अस्ति। संस्कृत भाषा देवभाषा अपि कथ्यते। संस्कृत भाषायाः ज्ञानं गृहणाय व्याकरणस्य पूर्ण ज्ञानं अत्यन्तं आवश्यकं भवति। यत् व्याकरणस्य सम्यक् ज्ञानं विना संस्कृत भाषायाः ज्ञानं प्राप्तं न शक्नोति।

अध्ययनस्य सुविधाय संपूर्ण पुस्तकस्य चत्वारः खण्डाः समायोजिताः। प्रत्येक खंडस्य आरम्भे विषयस्य विश्लेषणाय तस्य निहितं उद्देश्यानां स्पष्टं क्रियतां। खण्डस्य मध्ये 'आत्मनम् आकलयन्तु प्रश्नोत्तराणि' माध्यमेन विद्यार्थियानां योग्यतास्य प्रश्नं उत्तरं दीयताम्।

एतद् खण्डानां विवरणं निम्नांकितः अस्ति–

प्रथमः खण्डः – एते खण्डे संस्कृत भाषायाः अवधारणा च महत्त्वम्, संस्कृतशिक्षणस्य इतिहासः, भारतीय पाश्चात्त्य विद्वानां भाषाशिक्षण सम्बद्धः विचारः एवं संस्कृत भाषायाः प्रचार–प्रसाराय शासकीय–अशासकीयः प्रयासानां विस्तारपूर्वकं अध्ययनं क्रियताम्।

द्वितीय खण्डे – संस्कृत शिक्षणस्य सिद्धान्तः, विविध स्तरे संस्कृत शिक्षणस्य उद्देश्य एवं संस्कृत शिक्षणस्य विभिन्न उपागमानां विवेचनं क्रियताम्।

तृतीय खण्डे – संस्कृत भाषायाः श्रवण कौशलम्, सम्भाषणकौशलम्, पठनकौशलम्, लेखनकौशलस्य च विस्तारपूर्वकः निरूपण क्रियताम्।

चतुर्थ खण्डे – संस्कृत शिक्षणस्य विषयः गद्य शिक्षणः, पद्य शिक्षणः, व्याकरण शिक्षणस्य च विस्तृत अध्ययनं क्रियताम्। अपि च संस्कृत शिक्षणे मूल्यांकने चर्चा क्रियताम्।

पुस्तकस्य रचना एतद् प्रकारेण क्रियान्वितः यत् पाठकानां संस्कृतशिक्षणं संबंधितः विस्तारपूर्वकं ज्ञानं प्राप्तं शक्नोति। अपि च ते स्वज्ञाने वृद्धिध्याय एतद् प्रयोगं कर्तुं शक्नोति। अस्माभिः न केवलं आशा अस्ति अपितु पूर्ण विश्वासः अस्ति यत् प्रस्तुत पुस्तकं सर्वेषां अध्येतानां ज्ञानवर्धनं कृत्वा तेषां मार्गदर्शनं सहाय्य सिद्धं भवामि।

टिप्पणी

# एककः 1 संस्कृतस्य अवधारणा, शिक्षणेतिहासः, प्रचारप्रयत्नाश्च

## संरचना

1.0 परिचयः
1.1 उद्देश्यानि
1.2 अनुशासनात्मकावधारणा महत्त्वं च
1.2.1 संस्कृतभाषायाः प्रकृतिः
1.2.2 संस्कृतभाषायाः भाषालक्षणानि, भाषाक्रमः, भाषोत्पत्तिवादाः च
1.2.3 भाषा–संस्कृति–विज्ञान–समाज–राष्ट्र–विश्वदृष्ट्या संस्कृतस्य महत्त्वम्
1.3 संस्कृतशिक्षणेतिहासः
1.3.1 वैदिककाले संस्कृतशिक्षणम्
1.3.2 उत्तरवैदिककाले संस्कृतशिक्षणम्
1.3.3 मध्यकाले संस्कृतशिक्षणम्
1.3.4 ब्रिटिशकाले संस्कृतशिक्षणम्
1.3.5 स्वातन्त्र्योत्तरकाले संस्कृतशिक्षणम्
1.3.6 त्रिभाषासूत्रम्
1.4 भारतीयपाश्चात्यविदुषां भाषाशिक्षणसम्बद्धविचाराः
1.4.1 भारतीयाः–याज्ञवल्क्यः, पाणिनिः, भर्तृहरिः, पतञ्जलिः
1.4.2 पाश्चात्याः– जीन प्याजे, लेव व्यगोत्सकी, ब्रूनर, नॉम चोम्स्की
1.5 संस्कृतप्रचाराय शासकीयाशासकीयप्रयत्नाः
1.5.1 शासकीयाः– संस्कृतायोगौ, विश्वविद्यालयाः, संस्थानानि, अकादम्यः, निदेशालयाश्च
1.5.2 अशासकीयाः– संघटनानि, संस्थाः, परिषदः, अन्ये प्रयत्नाश्च
1.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि
1.7 सारांशः
1.8 मुख्यशब्दावलीः
1.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च
1.10 सहायकपाठ्यसामग्री

## 1.0 परिचयः

सम्यक् परिष्कृतं शुद्धमर्थाद् दोषरहितं व्याकरणेन संस्कारितं वा यत्तदेव संस्कृतम्। एवं च सम–उपसर्गपूर्वकात् कृधातोर्निष्पन्नोऽयं शब्दः संस्कृतभाषेति नामा सम्बोध्यते। सैव देवभाषा गीर्वाणवाणी, देववाणी, अमरवाणी, गीर्वागित्यादिभिर्नामभिः कथ्यते। इयमेव भाषा सर्वासां भारतीयभाषाणां जननी, भारतीयसंस्कृतेः प्राणस्वरूपा, भारतीयधर्मदर्शनादिकानां प्रसारिका, सर्वास्वपि विश्वभाषासु प्राचीनतमा सर्वमान्या च मन्यते।

अस्माकं समस्तमपि प्राचीनं साहित्यं संस्कृतभाषायामेव रचितमस्ति, समस्तमपि वैदिकसाहित्यं रामायणं महाभारतं पुराणानि दर्शनग्रन्थाः स्मृतिग्रन्थाः काव्यानि नाटकानि गद्य–नीति–आख्यानग्रन्थाश्च अस्यामेव भाषायां लिखिताः प्राप्यन्ते। गणितं, ज्योतिषं, काव्यशास्त्रम्, आयुर्वेदः, अर्थशास्त्रं, राजनीतिशास्त्रं, छन्दःशास्त्रं ज्ञान–विज्ञानं तत्त्वजात–मस्यामेव संस्कृतभाषायां समुपलभ्यते। अनेन संस्कृतभाषायाः विपुलं गौरवं स्वमेव सिद्ध्यति।

प्रस्तुते एकके संस्कृतभाषायाः अनुशासनात्मकावधारणा च महत्त्वं, संस्कृत–शिक्षणेतिहासः, भारतीयपाश्चात्त्यविदुषां भाषाशिक्षणसम्बद्धविचाराः च संस्कृतप्रचाराय शासकीयाशासकीयप्रयत्नाः अध्ययनार्थं प्रस्तुताः सन्ति।

## 1.1 उद्देश्यानि

इमम् एककं पठित्वा वयम्–

- संस्कृतभाषायाः अनुशासनात्मकावधारणा महत्त्वं च ज्ञास्यामः;
- संस्कृतशिक्षणेतिहासः ज्ञास्यामः;
- भारतीयपाश्चात्त्यविदुषां भाषाशिक्षणसम्बद्धविचाराः पाठयितुं शक्नुमः;
- संस्कृतप्रचाराय शासकीयाशासकीयप्रयत्नां विषये ज्ञास्यामः।

## 1.2 अनुशासनात्मकावधारणा महत्त्वं च

संस्कृतभाषायाः या वर्णमाला अस्ति, तत्र यः वर्णक्रमः निर्धारितः वर्तते, सः वैज्ञानिकः तार्किकः च अस्ति। प्रकृतितः सर्वेभ्यः मानवेभ्यः यत् उच्चारणतन्त्रं प्राप्तम् अस्ति, तस्य अनुसरणं कृत्वा अत्र वर्णमालायां वर्णानां क्रमः निर्धारितो वर्तते। उच्चारणतन्त्रस्य अनुसारम् अकारस्य उच्चारणम् प्रथमं भवति। अतः वर्णमालायाम् अकारः प्रथमः वर्तते। एवमेव व्यञ्जनवर्णेसु ककारस्य क्रमः पूर्व चकारस्य च क्रमः पश्चात् वर्तते तस्यापि कारणमिदमेव। अन्यासु भाषासु याः वर्णमालाः सन्ति, तत्र एतादृशः तार्किक : वैज्ञानिकश्च क्रमः न मिलति।

सनातनभारतस्य संस्कृतेः वाहिनी संस्कृतभाषा भवति। संस्कृतभाषा देवभाषा इति सर्वे जानन्ति एव। इतिहासपुराणादयः, आदिकविवाल्मीकिमुनिना रचितं रामायणं, व्यासमुनिरचितं महाभारतम्, जगत्प्रसिद्धा भगवद्गीता, वेदाः, काव्यनाटकादीनि संस्कृतभाषायैव रचिताः सन्ति।

अष्टादश पुराणानि, अष्टादश उपपुराणानि व्यासमहर्षिणा रचितानि। भगवद्गीता लोकप्रसिद्धा नीतिबोधिका अस्ति। सनातनधर्मस्य सारसर्वस्वं भगवद्गीतायाम् अन्तर्निहितम्। प्रपञ्चे अतीवपुरातनग्रन्थाः नाम चत्वारो वेदाः। ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदः चेति। तथैव वेदस्य षडङ्गानि सन्ति। ते च –

**शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा।**
**कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।**

शिक्षा, कल्पः, निरुक्तं च वेदस्य अर्थज्ञानार्थं उपयुज्यते। व्याकरणं शब्दोत्पत्तिः इत्यादिविषये अत्यन्तोपयोगी। व्याकरणं विना सम्यक्तया संस्कृतेन व्यवह्तुं न शक्यते। अतः सर्वशास्त्रोपकारकं व्याकरणं इत्युच्यते। छन्दः अपि प्रसिद्धम् एव। छन्दांसि विना न किमपि संस्कृतसाहित्यं रचयितुं शक्यते न शोभते च।

त्रिस्कन्दात्मकं ज्योतिषशास्त्रम्। सिद्धान्तः, संहिता, होरा चेति। सिद्धान्ते गणितादिविषयाः अन्तर्भवन्ति। संहितया तु वृष्टि–वास्तुशिल्प–प्रदेशादि विषये ज्ञातुं शक्यते। फलचिन्तनं तु होराशास्त्रे क्रियते। एवमेव प्रकृतेः परिरक्षणं कथमिति भाषायामस्यां विद्यमानेन आम्नायादिना अवगन्तुं शक्नुमः। रविचन्द्रयोः आगमनं, भूमेः परिभ्रमणं तथा च अस्यां पृथिव्यां जायमानानामुपरिग्रहाणां प्रभावः इत्येतत्सर्वमपि ज्योतिषशास्त्राध्ययनात् साधितमभूत्। तदर्थमेव प्राज्ञाः वदन्ति "प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ" इति।

एवमेव आयुर्वेदः अपि वेदस्य उपाङ्गं वर्तते। वेदे विद्यमानान् विषयान् क्रोडीकृत्य आयुर्वेदशास्त्रं प्रवर्तितमस्ति। अस्माकं पूर्वजाः कीदृशमाविष्कारं वैद्यशास्त्रविषये कृतवन्तः इत्येतत् सुश्रुतसंहिताध्ययनात् स्पष्टीभविष्यति। शस्त्रचिकित्सायाः विषयमपि तस्मादेव अवगच्छामः। चिकित्सापद्धति विषये सुश्रुतसंहिता, अष्टाङ्गहृदयम्, चरकसंहिता, भैषज्यरत्नावली इत्यादयः अनेके ग्रन्थाः उपलभ्यन्ते।

लोके काव्यानि बहूनि वर्तन्ते। तत्र गद्यं, पद्यं, चम्पू इति त्रिधा। काव्येषु पञ्च महाकाव्यानि प्रसिद्धानि। तत्र कालिदासस्य कुमारसम्भवम्, रघुवंशम् इति काव्यद्वयम्। भारविमहाकवेः किरातार्जुनीयम्, माघस्य शिशुपालवधं, श्रीहर्षमहाकवेः नैषधीयचरितम् इत्येतानि पञ्च महाकाव्यानि।

तथा च नाटकानि बहूनि वर्तन्ते। तत्र कालिदासस्य "अभिज्ञानशाकुन्तलम्" इति नाटकं जगत्प्रसिद्धमस्ति। इदं नाटकं लोकेषु विद्यमानेषु अन्यास्वपि भाषासु अनूदितं वर्तते।

संस्कृतभाषा सुभाषितानाम् आगरः अस्ति। " सम्यक् भाषितं " सुभाषितम्। मानवस्य जीवने श्रेष्ठत्वं प्राप्तुं सुभाषितानि अतीव महत्त्वपूर्णानि भवन्ति। सुभाषितस्य वैशिष्ट्यम् एवं विद्यते–

**द्राक्षाम्लानमुखी जाता शर्करा चाश्मतां गता।**
**सुभाषितरसं दृष्ट्वा सुधा भीता दिवङ्गता।।इति।।**

अस्यां भाषायाम् एव ज्ञानविज्ञानयोः विधिः सुरक्षितोऽस्ति। संस्कृतभाषा क्लिष्टा नैव, "विद्यया अमृतमश्नुते" इति ध्येयवाक्यं स्मृत्वा, आलस्यं त्यक्त्वा, दृढचित्तस्सन् यः पुरो गच्छति सः विजयी भविष्यति।

**"वसुधैव कुटुम्बकम्, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, लोकाः समस्ताः सुखिनो भवन्तु" इत्यादयः भारतीयसंस्कृतेः महिमानम् उद्घोषयन्ति।**

एवमेव ज्ञायते यत् "सर्वभाषाजननी भवति संस्कृत भाषा"। संस्कृतं विना भारतीय–संस्कृतिं ज्ञातुं न शक्नुमः। अतः ज्ञानिनः वदन्ति "भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती" इति।

## 1.2.1 संस्कृतभाषायाः प्रकृतिः

परिष्कृतं, व्याकरणादिदोषरहितं यत् भाषा तत् संस्कृतम् अस्ति। इयं भाषा एव देववाणी, सुरभारती, गीर्वाणवाणी इत्यादिकैः नामभिः व्यवह्रयते। संस्कृत भाषा संसारस्य सर्वासु भाषासु प्राचीनतमा, परिष्कृततमा च विद्यते। अस्याः भाषायाः साहित्यम् अपि सुविशालं, परमोन्नतं, विविध– ज्ञान–समन्वितं च अस्ति। भारतस्य प्राचीनाः ग्रन्थाः चत्वारः वेदाः संस्कृतभाषायां सन्ति। धर्मशास्त्राणि, अष्टादश–पुराणानि, अष्टादश स्मृतयः, षट् दर्शनानि च संस्कृतभाषायां एव लिखिताः सन्ति। सम्पूर्ण कर्मकाण्ड विभागः सम्पूर्ण च आयुर्वेद पद्धतिः, एते सर्वे ग्रन्थाः संस्कृतभाषायां एव निबद्धाः सन्ति।

एतेषाम् अध्ययनेन भारतवर्षस्य, प्राचीन धर्मस्य, आयुर्वेदस्य, तथा अतीत सभ्यतायाः पूर्णः परिचयः प्राप्यते। एवं संस्कृत वाङ्गमय एव भारतस्य संस्कृतेः आध्यात्मिकस्य च ज्ञानस्य विशुद्धरूपज्ञानाय एकं साधनम् अस्ति। एवं इयं भाषाः प्राचीनतमा इति निर्विवादम्। कतिपयैः उदाहरणैः अस्याः परिकृतिः अपि प्रकटयितुम् शक्यते। आंग्लभाषायां लिख्यते 'बुट' (But) पठ्यते च 'बट' लिख्यते पुट (Put) पुनः बटवत् 'पट' इति न पठ्यते। एवमेव अनेकानि भ्रष्ट्रभाषायाः उदाहरणानि सन्ति। संस्कृतमेव सा भाषा यस्यां यत् लिख्यते तदेव पठ्यते।

संस्कृत भाषाः न केवलं उच्चारणे सर्वोत्कृष्टः अपितु मधुरा दिव्या च। इयं भाषा आचारशास्त्र शिक्षिका, जीवनोन्नतिकारिणी च अस्ति। ये कथयन्ति यत् कर–भाषा कठिना वर्तते, ते न जानन्ति यत् स्वल्प प्रयासेनैव संस्कृतं पठितं शक्य। संस्कृत भाषाः अस्माकं देशस्य सांस्कृतिकः निधिः अस्ति। सम्पूर्णमपि सांस्कृतिक वाङ्गमयं संस्कृतमाश्रित्य एव अवतिष्ठते। संस्कृत्याः वाङ्गमयेन रहितस्य राष्ट्रस्य जातेश्च अधः पतनम् अनिवार्यम्। संस्कृस्य एतादृशं महत्त्वं दृष्टैव कश्चित् कविना सत्यम् एव उक्तं–

"भारतस्य प्रतिष्ठे हे संस्कृतं चैव संस्कृतिः"

अद्यत्वे केचित् मूढाः संस्कृतं मृतभाषां कथयन्ति ते न जानन्ति यत् ये संस्कृतस्य रसेन ज्ञानेन, संस्कृति बलेन अद्यापि कृतकृत्याः भवन्ति तेभ्यः संस्कृत भाषा मृताः? पुनरपि यदि केचित् कुपुत्राः स्वजननी सदृशीम् इमां भाषां मृतां कथयन्ति येन च भारतवर्षे संस्कृत भाषा उपेक्ष्येत्, तर्हि गीर्वाणवाणी एवं क्षमयतु तेषाम् अपराधः। यतो हि–

**"कुपुत्रो जायेत् क्वचिदपि कुमाता न भवति"**

## 1.2.2 संस्कृतभाषायाः भाषालक्षणानि, भाषाक्रमः, भाषोत्पत्तिवादाः च

संस्कृतलेखनं पूर्वं ब्राह्मीलिप्या आसीत्। कालान्तरे एतस्य लेखनं देवनागरीलिप्या अभवत्। मूलतो यस्मिन् प्रदेशे या लिपिर्जनैर्मातृभाषां लेखितुमुपयुज्यते तस्मिन्प्रदेशे तया एव लिप्या संस्कृतमपि लिख्यते। पूर्वं सर्वत्र एवमेव आसीत्, अतएव प्राचीनाः हस्तलिखितग्रन्थाः अनेकासु लिपिषु लिखिताः सन्ति। अर्वाचीने काले तु संस्कृतग्रन्थानां मुद्रणं सामान्यतो देवनागरीलिप्या दृश्यते।

**टिप्पणी**

संस्कृतं किम्? संस्कृतं नाम भाषा। अतः संस्कृतभाषायाः भाषिकतत्त्वानाम् आर्धत वर्णानां, शब्दरूपाणां, धातुरूपाणां, लकाराणां, संन्धिनां, समासानां, विशेषण–विशेष्यादीनां शिक्षणं संस्कृतशिक्षणम् इति मन्यते।

अतः एतेषां भाषिकतत्त्वानां शिक्षणम् एव संस्कृतशिक्षणम्। वयं जानीमः यत् अस्माकं प्राचीनं साहित्यं संस्कृतेन एव लिखितम्।

अर्थात् अस्माकं संस्कृतसाहित्यं मूलतः संस्कृते एव विद्यते। अतः संस्कृतशिक्षणस्य लक्ष्यम् अस्ति यत् पठितारः संस्कृत साहित्यम् अवगंतुं समर्थाः भवेयुः।

संस्कृतशिक्षणे नवाचारः, भाषाकौशलेषु दक्षता, भाषाभ्यासाय अवसरप्रदानम् नवीन शिक्षणपद्धतीनां प्रयोगः इत्येतानि संस्कृतभाषायाम् लक्षणानि। एवमेव तस्य तस्याः वा अन्यानि लक्षणानि सन्ति–

1. संस्कृतशिक्षणस्य उद्दश्योनाम् स्पष्टता भवेत्।
2. संस्कृतशिक्षणेन सह परिचितः भवेत्।
3. भाषातत्त्वेषुदक्षः स्यात्।
4. भाषाकौशलेषुसमर्थाः स्यात्।
5. विशेषणविशेष्ययोः ज्ञानं भवेत्।
6. सरलमानकसंस्कृतेन पाठयेत्।
7. पाठ्यपुस्तकं जानीयात्।
8. संस्कृतशिक्षणेनवाचारमानियेत्।
9. संस्कृतंसंस्कृतेन एव।
10. सम्प्रेषण–सामर्थ्ययम्।

वैदिकसंस्कृतभाषातो भिन्ना भाषा, तात्कालिकजनताया भाषा, 'भाषा' पदेन निरुक्तग्रन्थे यास्केन व्यवहृता। तेन हि वैदिककृदन्तशब्दानां सिद्धिः लोकप्रचलितधातुभ्यः प्रदर्शिता। 'भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते' इति हि तदुक्तिः। तस्मिन् समये भिन्नभिन्नप्रान्तेषु संस्कृतशब्दानां यानि रूपान्तराणि प्राप्यन्ते स्म, ये विशिष्टप्रयोगाः भवन्ति स्म, तेषां सर्वेषामुल्लेखेऽपि यास्केन कृतः, यथा – 'शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकारमेव त्वेनमार्या भाषन्ते श्व इति' दातिर्लवनकर्मा प्राच्येषु प्रयुज्यते, दात्रमुदीच्येषु एभिः साक्षिभिर्यास्कसमये संस्कृतस्य भाषितभाषात्वं सिद्धयति। यास्कस्य समयो 600 ई.पू. कथ्यते।

पाणिनिरपि संस्कृतस्य व्यावहारिकं स्वरूपं भाषापदेनैव व्यवहृतवान्, किंच दूरादधूते प्लुतमनुशासता पाणिनिना संस्कृतस्य भाषित– भाषात्वं स्पष्टमुक्तम्, यदि संस्कृतं भाषितभाषा नाभविष्यत्तदा दूरात्सम्बोधनावसरस्यैवाभावात्तत्र प्लुतत्वानुशासनमनर्थकं स्यात्। अपि च पाणिनिः भाषितभाषायामेव व्यवहृतुं योग्यान् 'दण्डादण्डि', 'उदरपूरं भुङ्क्ते इत्यादीन् शब्दाननुशशास, तदप्यस्याः संस्कृतभाषायां भाषितभाषात्वं गमयति।

पाणिनेः परतो जातः कात्यायनः लोके व्यवहृतान् नवान् शब्दान् दृष्ट्वा तेषां सिद्धये नियमानुक्तवान्। अतः प्रतीयते यत्तदा संस्कृतम् व्यवहारभाषासीत्।

महाभाष्यकृता पतञ्जलिना देशभेदेन क्रियाभेदमाख्याय संस्कृतस्य भाषितभाषात्वमुच्यते स्म, तथाहि हम्मतिः सुराष्ट्रेषु, प्राच्येषु रंहतिः, आर्थस्तु गच्छतिः प्रयुज्यत इति तेनोक्तम्। महाभाष्यकृता – वैयाकरणरथ वाहकयोरेको रुचिरः संवाद उक्तः एवं हि कश्चिद्वैयाकरण आह–कोऽस्य रथस्य प्रवेता? सूत आह अहमायुष्मानस्य रथस्य प्राचिता। वैयाकरण आह–अपशब्द इति। सूत आह–प्राप्तिज्ञो देवानांप्रियो न तु इष्टिज्ञः। इष्यत् एतद्रूपमिति। वैयाकरण आह– अहो खल्वनेन दूरुतेन बाध्यामहे इति। सूत आह– "न खलु वेञः सूतः, सुवतेरेव सूतः, यदि सुवतेः कुत्सा प्रयोक्तव्या, दुः सूतेनेति वक्तव्यम्" 2/4/56 सूत्रभाष्ये। अतो यां वाचं रथकवाहकोऽपि व्यवहरति सा भाषितभाषा मन्तव्यैव।

भोजस्य समये विक्रमादित्यस्य समये च संस्कृतस्य प्रचुरप्रचार आसीत्। एभिः प्रमाणैः संस्कृतस्य भाषितभाषात्वं सिद्धम्।

यद्यपि सम्प्रति साहित्यशब्दो वाङ्गमयमित्यर्थे प्रयुज्यते यत्रार्थे 'लिटरेचर' (Literature) शब्दो वैदेशिकैः प्रयुज्यते, परन्तु संस्कृतभाषायां साहित्यशब्दस्य 'शब्दार्थौ' इत्यर्थः, सहितयोर्भावः साहित्यम्, सहितयोः कयोः? शब्दार्थयोः, तच्च साहित्यं क्वचिदन्यत्र शास्त्रे न भवति किन्तु काव्यशास्त्र एव। तत्र हि शब्दः अर्थश्च इत्युभयं मिलितं सदेव कमप्याहलादं जनयति, न केवलः शब्दो नापि वा केवलोऽर्थः तथा चोक्तमपि– 'न च काव्ये शास्त्रादिवत् अर्थप्रतीत्यर्थ शब्दमात्रं प्रयुज्यते, सहितयोः शब्दार्थयोस्तत्र प्रयोगात्। साहित्यं तुल्यकक्षत्वेन अन्यूनानतिरिक्तवृत्तित्वम्' इति व्यक्तिविवेकटीका। एतेन साहित्यशब्दस्य काव्यस्वरूपमर्थं इति सङ्कोचः कृतो वेद्यः। अपि च राजशेखरेण 'पञ्चमी साहित्यविद्येति यायावरीयः' इति काव्यमीमांसायामुक्तम्, आधुनिकप्रथानुसारेण तु सर्वासामपि विद्यानां साहित्यपदाभिलिप्यत्वे काव्यमात्रपरकत्वेनात्र साहित्यशब्दप्रयोगोऽयुक्तः स्यात्। किञ्च बिल्हणेन–

**साहित्यपाथोनिधिमन्थनोत्थं काव्यामृतं रक्षत हे कवीन्द्राः।**
**यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति।।**

इति स्वीये विक्रमाङ्कदेवचरितनामके महाकाव्ये प्रोक्तम्, तदपि साहित्यशब्दस्य काव्यार्थतां व्यञ्जयति। 'साहित्यदर्पणः' इति काव्यलक्षणस्वरूपादिबोधकग्रन्थस्य नामकरणमपि विद्यान्तरव्यावृत्तकाव्यमात्रवाचकस्य साहित्यशब्दस्य प्रयोगं प्रमाणयति।

अतिप्राचीनमिदं संस्कृतसाहित्यम्, मा भूवन्ननादयो वेदाः, परं तेऽतिप्राचीना इत्यकामेनापि स्वीकर्त्तव्यमेव। लोकमान्यतिलकमहोदयो यद् गणिताधारेण वेदानां 6000 ई.पू. निर्मितत्वं ततोऽपि वा पूर्वकालिकत्वं निर्धारितवांस्तत्र नास्ति सन्देहस्यावकाशः। वेदकालादारभ्य प्रवहन्तीयं संस्कृतसाहित्यधाराऽबाधगत्याऽधुनावधि समागच्छति। अन्यभाषासाहित्येतिहासानां विलोकनेन प्रतीयते यत्तानि साहित्यानि परिस्थितावनु–कूलायामुदयन्ते, कियन्तं कालं यावदग्रेसरन्ति, परन्तु परिस्थितिवैषम्ये प्रवाहः शिथिलीभवति,

स चायं दोषः संस्कृतसाहित्यं न स्पृशति। वेदानां रचनायां जातायां तद्व्याख्यानभूताः ब्राह्मणग्रन्थाः अरच्यन्त, ब्राह्मणग्रन्थेभ्यः पश्चादारण्यकानि, तदनन्तरमुपनिषदः, ततो रामायणं महाभारतं पुराणानि च। सेयं परम्परा कियता स्वरूपविपर्ययेण सह काव्य–नाटक–गद्य –चम्पू–कथा–स्मृति–तन्त्रादिनिर्माणविधया चिरमन्वर्तत। सेयं संस्कृतसाहित्यस्याविच्छिन्ना परम्परा न्यूनान्न्यूनमष्टसहस्रसंवत्सरेभ्यः समायातीति नितान्तसत्यं वचः। नास्ति विश्वस्मिन्नस्मिन् किमपि साहित्यमन्यद्यदविच्छिन्नधारमियन्ति दिनानि जीवितं समर्थ्येत्।

अतिव्यापकं च संस्कृतसाहित्यम्। इदं सर्वाङ्गपूर्णं यतोऽत्र मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरुषार्थाः विवेचिताः। धर्मशास्त्रं प्रथम एव, अर्थशास्त्रमपि कौटिल्यादिप्रणीतमत्र न कुतोऽपि हीयते। कामशास्त्रमपि परमप्रसिद्धमत्रत्यम्, मोक्षशास्त्रस्यापि परमप्रकृष्टता तर्कसम्मता। एवं संस्कृते मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिता इति कथनं समुचितमेव। अत्र प्रेयः शास्त्रं श्रेयः शास्त्रं चोभयं समभावेन समेधितम्, अतएव चात्र भोगमोक्षयोरुभयोः सत्तया सकलसाहित्यापेक्षया विशिष्टता विद्यते।

अतिमहत्त्वपूर्णमपीदं संस्कृतसाहित्यम्। इदं प्राचीनतायां सर्वातिशायीति पूर्वमावेदितमेव। अस्य व्यापकत्वं परिमाणमहत्त्वं चापि प्रसिद्धम्। एतन्महत्त्वे प्रमाणानि यथा–

संस्कृतसाहित्यं न केवलं भारतीयजनताया अपितु चीन–जापान–कोरिया–प्रभृतिवासिनामपि लोकानामितिवृत्तं लङ्का –मलयद्वीपादिवासिनाञ्च इतिवृत्तं सुरक्षितरूपेण गोपायति। एतस्य प्रभावस्तुरुष्कादिदेशेतिहासेश्वपि पतित इतितिहासविदां कृतेऽत्र महत् स्वाध्यायसाधनम्।

द्रविडभाषापरिवारं विहाय सर्वा भारतीयभाषाः प्राच्यसंस्कृतभाषायाम् यथा, तथा सर्वा अपि यूरोपीयभाषाः प्रतिच्यभाषायां सम्बद्धा भवन्ति, तेनोभयविधभाषासमुदयः भारोपीयभाषावर्ग इत्याख्यायते, भारोपीयभाषावर्गे संस्कृतभाषा सर्वज्येष्ठेति सर्वसम्मतम्।

धर्मविज्ञानं तदुपचयश्च यथा संस्कृतभाषाश्रयेण परीचीयते न तथा भाषान्तराश्रयेण।

भारतवर्षे न केवलं राजनीतिः, आयुर्वेदः, गणितफलितज्योतिषे, अङ्कगणितम् ज्यामितिः, एतान्येव अपि तु तन्त्रम् मन्त्रः कामकला चापि साहित्यरूपेण शिक्ष्यते, एतदैभवं संस्कृतस्थैव।

सूत्रसाहित्यं क्वापि परस्याः भाषायां न जातम्, इदमनन्यसाधारणं संस्कृतसाहित्यस्य महत्त्वम्।

संस्कृतं न केवलं ब्राह्मणधर्मनामकं जातीयं धर्मप्रतिष्ठापितवत्, अपि तु बौद्धधर्मनामकं सार्वभौमं धर्ममपि प्रकाशयामास।

मननशक्तिसमुद्भवानि नानादर्शनानि संस्कृते महत्त्वमानयन्ति।

यावत् संस्कृतसाहित्यं प्राप्यते, तावदेव रोम–यवनोभयसाहित्यापेक्षया परिणाहेऽत्यधिकम्।

आभिर्विशिष्टताभिः संस्कृतसाहित्यस्य महत्त्वं प्रतिष्ठितं विद्यते। नैतावदेव सांस्कृतिकदृष्ट्यापि संस्कृतभाषाया महत्त्वपूर्णं पदं लब्धव्यम्, भूखण्डं यदधुना 'हिन्दुचीन' नाम्ना ख्यायते तत्पूर्व शुद्धं 'हिन्द' आसीत्, चतुर्दशशताब्दीपर्यन्तं तत्सुवर्णद्वीपनामकमासीत्। विक्रमादित्यसमयाच्चतुर्दशशताब्दीपर्यन्तं तत्र भारतीयं साम्राज्यमासीत्, तदा तत्र संस्कृतमेव राजभाषाऽवर्तत्। कम्बोजदेशं या स्मेरभाषा, यवद्वीपे च या कविभाषा सा भाषाद्वयी पूर्वमार्यावर्त्तीज्यवर्णमालायामेवालिखत। तदा तयोर्भाषयोः संस्कृतस्य तावान् प्रभावोऽवर्तत्। यत् संस्कृतोपादानानि गृहीत्वैव तयो साहित्यसृष्टिः प्रारभत। नवद्वीपस्य कविभाषायां रामायणीयं महाभारतीयं चाख्यानमधुनाऽपि प्राप्यते। अधुनाऽपि यवद्वीपवासिनो भारतीया इव रामलीलादर्शनेनात्मानं विनोदयन्ति।

बालीद्वीपस्य सभ्यता भारतीयसभ्यता, तत्रत्यो धर्मस्तन्त्रप्रधानः वैदिकमन्त्रोच्चारणं सम्प्रत्यपि विकृतरूपेण तत्र विद्यते। मङ्गोलियादेशेऽपि संस्कृतस्य प्रसार आसीत्। तत्रानेके संस्कृतग्रन्थाः लब्धाः, महाभारताधाराणि तद्भाषानिबद्धानि बहूनि नाटकान्यपि तत्र लब्धानि, तेषु हिडिम्बवध प्रधानम्। तदेवं संस्कृतस्य सांस्कृतिकं महत्त्वं प्रमापितं जायते।

विशुद्धकला दृष्ट्याऽपि संस्कृतसाहित्यमतिमहत्त्वशालि, अत्र कालिदाससदृशः कविः भवभूतितुल्यो नाटककारः बाणभट्टसमो गद्यलेखकः, जयदेवसदृशो गीतप्रणेता चाजायत, यदीयाभिस्तत्तत्काव्यसृष्टिभिः शुद्धकलारूपेणापि विनोदितं विनोद्यते च भुवनम्।

तुलनात्मकभाषाविज्ञानशास्त्रिणां कृते तु संस्कृतं जीवनमेवेति नितान्तमहत्त्वशालि संस्कृतम्। संस्कृतभाषानिबद्धसाहित्यमात्रस्य विवेचनाय सौकर्यं कालविभागेन सम्पाद्यते। अत्र प्रथमः श्रुतिकालः कल्यताम्, यत्र संहिताब्राह्मणारण्यकोपनिषदोऽरच्यन्त। द्वितीयोऽपि स्मृतिकालनामा स्मर्यताम्, यत्र रामायणम् महाभारतपुराणवेदाङ्गानि रचितानि। तृतीयः कालः सूत्रकालनाम्ना लौकिक– काव्योदयकालनाम्ना वा व्यवह्रयताम् यत्र पाणिनिप्रणीत–सूत्रसिद्धभाषाग्रन्थितानि काव्यानि जातानि। चतुर्थश्च शास्त्रकाल– नाम्नाऽभिधीयताम्, यत्र तानि तानि शास्त्राणि न्यायवेदान्तादीनि साहित्यशास्त्रं चाजायन्त।

### 1.2.3 भाषा–संस्कृति–विज्ञान–समाज–राष्ट्र–विश्वदृष्ट्या संस्कृतस्य महत्त्वम्

संस्कृते नाम दैवी वागन्व्याख्याता महर्षिभिः। संस्कृतभाषैवास्ति विश्वस्य प्राचीनतमा भाषा। संस्कृता परिष्कृता व्याकरणादि दोषरहिता भाषा संस्कृत भाषैति कथ्यते। अपरंच सा सर्वासामपि भाषायां जननी। आसीदियम् पुरा भारतीयानाम् लोकप्रिया जनभाषा। ऋग्वेद संसारस्य प्रथमः ग्रन्थः इति सर्वे प्राच्यप्रतीच्यै पण्डितैश्च एकस्वरेण स्वीकृतम् स वेदः संस्कृतभाषामेव संशोभते। अतः सिद्धं तस्याः आदि भाषात्वम्। सर्वासां भारतीयभाषाणां इमं जननी वर्तते।

भाषायानयै वाद्यापि आर्यधर्मस्य परिपुष्टिर्जायते। पुरा न केवलं भारते अपितु विभिन्नेषु अन्यान्य देशेषु प्रचारातिशयेन प्रयतितासीदेशा संस्कृत भाषा। सर्वे जनाः तामेव

वदन्ति स्म। अस्यां भाषायामेकस्य शब्दस्यानेके समानार्थं जायन्ते, शब्दरचना शक्तिः अपि अस्य अवश्यमेव वर्तते। सर्वास्वत्यासु प्रान्तीयभाषासु सा जीवनरसं संचारयितुं क्षमते। अस्याः ज्ञानं अन्यासां भाषाणां ज्ञाने सहायं भवन्ति। यतो अस्याः शब्दकोशो विशालः सुसम्पन्नश्यास्ति। अस्माकं राष्ट्रभाषाया शब्दकोषः नवति प्रतिशतः तया एव परिपूरितः। नास्ति कोऽपि एतादृशो भावो विषयो वा यो हि नाभिव्यक्तिभाषानि भाषयानया। एतस्यां भाषायां तज्ज्ञानं विभ्राजते यत्सदृशं न किमपि पूतम्। तत्लब्ध्वा सर्वे अपि संशया उच्छिन्नाः भवन्ति परा शान्तिश्चासायते।

संस्कृतभाषायां यथाध्यात्मिकं ज्ञानं विपुलं विशदश्च तथैवाधिभौतिकमपि ज्ञानं प्रचुरम्। मानवजीवनस्य चतुर्पुरुषार्थाः स्वीकृताः विद्वद्भिः। अर्थमन्तरेण जीवनं व्यर्थम्। अर्थस्योपार्जन् केन प्रकारेण कार्यं कथं स रमणीयः वर्धनीयश्च एतेषां विषयाणां प्रतिपादकग्रन्थाः अपि सुलभाः अस्यां भाषायां। अर्थस्य प्रयोजनं अस्ति कामानामुपभोगः। भाषायामस्यां– तमप्यधिकृत्य महर्षि वात्स्यानेन कामशयस्त्रमिति लिखितमस्ति। धर्ममोक्षविषयकाः ग्रन्थाः सन्ति पुष्कलाः।

संस्कृतभाषायां यस्य धर्मस्य निरूपणं कृतमस्ति स प्राणिमात्रस्य सुह्रत्–

**सर्वे अपि सुखिनः भवन्तु, सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुखभाग्भवेत्।**

संस्कृतभाषायां प्रतिपादितार्थधर्मस्यत्वा अहिंसासत्यश्चस्तः सदाचारतपस्त्याग शुचितादयः तस्य प्राणाः इव वर्तन्ते। न केवलतदर्थधर्मावलम्बिनामेव अपितु अन्यसम्प्रदाय सुषामपि सर्वे प्राचीन ग्रन्थाः संस्कृत भाषायाश्रित्यैव लिखिता प्राप्यते।

संस्कृतभाषायाः साहित्यं गुरुतमम्। अपि च एतदीयायां शब्दावल्यामपि यद् व्यापकत्वं यद् गम्भीरत्वं यद् शिक्षार्थकत्वं यद् माधुर्यं यद् प्रसादत्वं यद् ओजस्तवं यद् सूक्ष्मत्वं वर्तते न तत् कस्यामपि अन्य भाषायां।

संस्कृत साहित्ये वैदिकं लौकिकं भेदेव द्विविधम्। वैदिक साहित्ये संहिताब्राह्मण–

आरण्यकोपनिषदादयः वेदांगानि चान्तर्भवन्ति। लौकिके च दर्शनपुराणरामायण– महाभारतकाव्यादीनि सन्निविशन्ते।

संस्कृतभाषायाः साहित्यं तस्याः व्यापकतां गौरवं सर्वाङ्गीणताश्च प्रकटी करोति। सत्यप्येतादृशे महत्त्वे भाषाया अस्याः अवनतिरेवाधावलोक्यते। मृतः भाषेव लक्ष्यते सा अतो अस्याः समुद्धाराय अस्माभिरपि प्रयतिसम्यमिति। संस्कृतम् अस्माकं जीवनस्य दिग्दर्शनं करोति। जीवनस्य लक्ष्यम् उन्नतं भवति। स्वविषय–ज्ञानेन सह संस्कृतमपि जानीमः चेत् प्रतिष्ठा प्राप्यते। अस्माकं संस्कारार्थं संस्कृतम् आवश्यकम्। अस्माकं सर्वे संस्काराः मन्त्रसहिताः सन्ति। संस्कृतस्य वर्णमाला वैज्ञानिकी अस्ति। संस्कृतं वैज्ञानिकी, श्रेष्ठतमोच्चारणशास्त्रयुक्ता, परिपूर्णा भाषा। संस्कृतोच्चारणेन अन्यभाषाणाम् उच्चारणं सुलभं भवति। संस्कृतकारणेन भारतीयभाषाः समृद्धाः भवन्ति। संस्कृतस्य उच्चारणेन

**टिप्पणी**

मस्तिष्कस्य भागद्वयस्यापि विकासः भवति। संस्कृतं केवलं वर्गविशिष्टस्य भाषा न अस्ति, अपितु सर्वेषाम्। (यथा – जाबालः, व्यासः, वाल्मीकिः इत्यादयः) भाषाभावैक्यार्थं सामाजिकसमरसतार्थं च संस्कृतमावश्यकम्। तेनैव उच्चनीच–स्पृश्यास्पृश्यभेदनिवारणं भवति। 1949 तमे वर्षे डॉ. बाबासाहेब अम्बेडकरः ''भारतस्य राजभाषा संस्कृतं भवतु' इति प्रस्तावम् आनीतवान्। अन्य–विरोध–कारणतः सा अद्य तादृशं स्थानं न प्राप्तवति इति तु दुर्दैवम्। विश्वे अधिकाधिकाः संस्कृतं पठितुम् उत्सुकाः सन्ति। भारतात् बहिः 240 विश्वविद्यालयेषु संस्कृतस्य पाठनं भवति। संस्कृते आध्यात्मिकज्ञानं केवलं न अपितु प्रवृत्तिपरकाः विज्ञानतन्त्रज्ञानादि विद्याः अपि सन्ति। यथा– गणितं, खगोलशास्त्रं, विमानशास्त्रं, रसायनशास्त्रं, आरोग्यशास्त्रं, वास्तुरचनाशास्त्रं, जीवशास्त्रं, धातुशास्त्रम् इत्यादि। संस्कृतभाषायां लक्षाधिकाः पाण्डुलिपिग्रन्थाः सन्ति। संस्कृतेन स्वाभिमानस्य वर्धनं भवति। राष्ट्रैक्यस्य निर्माणं च भवति।

**जयतु संस्कृतम्।। जयतु भारतम्।।**

## किमर्थं संस्कृतम्?

यथा फ्रान्सदेशे फ्रेञ्च, जर्मनीदेशे जर्मन, रशियादेशे रशियन् तथा भारते संस्कृतम् अस्ति। यतः संस्कृतम् भारतस्य आत्मा अस्ति। भारतीयानाम् अस्मिता संस्कृतम् अस्ति। सर्वेषां स्वाभिमानस्य प्रतीकम् अस्ति। भारतीयज्ञानस्य वाहिका – संस्कृतम्। संस्कृते विपुलं ज्ञान–भण्डारं वर्तते। यथा–

**चतुर्वेदाः पुराणानि सर्वोपनिषदस्तथा।**
**रामायणं भारतं च गीता सद्दर्शनानि।।इति।।**

संस्कृतपठनेन वास्तविक–इतिहासस्य ज्ञानं भवति। संस्कृतेन स्वमूलेन सह सम्बद्धाः भवामः। संस्कृतम् अस्माकं जीवनस्य दिग्दर्शनं करोति। जीवनस्य लक्ष्यम् उन्नतं भवति। स्वस्वविषय–ज्ञानेन सह संस्कृतमपि जानीमः चेत् प्रतिष्ठा प्राप्यते। अस्माकं संस्कारार्थं संस्कृतम् आवश्यकम्। अस्माकं सर्वे संस्काराः मन्त्रसहिताः सन्ति। संस्कृतस्य वर्णमाला वैज्ञानिकी अस्ति। संस्कृतं वैज्ञानिकी, श्रेष्ठतम्–उच्चारणशास्त्रयुक्ता, परिपूर्णा भाषा। संस्कृतोच्चारणेन अन्यभाषाणाम् उच्चारणं सुलभं भवति। संस्कृतम् अस्ति चेद् भारतीयभाषाः समृद्धाः भवन्ति। संस्कृतस्य उच्चारणेन मस्तिष्कस्य भागद्वयस्य अपि विकासः भवति। संस्कृतं केवलं वर्गविशिष्टस्य भाषा न, अपितु सर्वेषाम्। (यथा – कालिदासः, व्यासः, वाल्मीकिः इत्यादयः)

भाषाभावैक्यार्थं, सामाजिकसमरसतार्थं च संस्कृतम् आवश्यकम्। तेन एव उच्चनीच–स्पृश्यास्पृश्यभेदनिवारणं भवति। विश्वे अधिकाधिकाः संस्कृतं पठितुम् उत्सुकाः सन्ति। भारतात् बहिः 240 विश्वविद्यालयेषु संस्कृतस्य पाठनं भवति।

संस्कृते आध्यात्मिकज्ञानं केवलं न अपितु एतत् विज्ञानतन्त्रज्ञानसहितम् अपि। यथा– गणितं, खगोलशास्त्रं, वैमानिकशास्त्रं, रसायनशास्त्रम्, आरोग्यशास्त्रं, वास्तुरचनाशास्त्रं, जीवशास्त्रं, धातुशास्त्रम् इत्यादि। संस्कृतभाषायां 45 लक्षाधिकाः

पाण्डुलिपिग्रन्थाः सन्ति। संस्कृतेन स्वाभिमानस्य वर्धनं भवति। राष्ट्रैक्यस्य निर्माणं च भवति।

एतेन प्रकारेण अत्युत्कृष्टा भारतीय–ज्ञानपरम्परा, भावात्मिका चिन्तनरीतिः,श्रेष्ठः जीवनादर्शः च संस्कृते अस्ति। अतः संस्कृतम् अनिवार्यम्।

**अपनी प्रगति जांचिए**

1. परिष्कृतं, व्याकरणादिदोषरहितं कः भाषा अस्ति?

(क) संस्कृतम् (ख) आंग्लम्

(ग) मलयालम् (घ) प्राकृतम्

2. पुराणानि कति सन्ति?

(क) एकादश (ख) द्वादश

(ग) अष्टादश (घ) त्रयोदश

## 1.3 संस्कृतशिक्षणेतिहासः

संस्कृतभाषायामेव विश्वसाहित्यस्य सर्वप्राचीनग्रन्थाः चत्वारो वेदाः सन्ति, येषां महत्त्वमद्यापि सर्वोपरि वर्तते। वेदेषु मनुष्याणां कर्तव्याकर्तव्यस्य सम्यक्तया निर्धारणं वर्तते। वेदानां व्याख्यानभूता ब्राह्मणग्रन्थाः सन्ति। तदनन्तरम् अध्यात्मविषयप्रतिपादकाः उपनिषदाः सन्ति, यासां महिमा पाश्चात्त्यैरपि निःसंकोचं गीयते। ततश्च भारतगौरवभूताः षड्दर्शनग्रन्थाः सन्ति, ये विश्वसाहित्येऽद्यापि सर्वमान्याः सन्ति। ततश्च श्रौतसूत्राणां, गृह्यसूत्राणां, धर्मसूत्राणां, वेदस्य व्याख्यानभूतानां षडङ्गानां च गणना भवति। महर्षिवाल्मीकिकृत–वाल्मीकीयरामायणस्य, महर्षिव्यासकृतमहाभारतस्य च रचना विश्वसाहित्येऽपूर्ण घटना आसीत्। सर्वप्रथमं विशदस्य कवित्वस्य, प्रकृतिसौन्दर्यस्य, नीतिशास्त्रस्य, अध्यात्मविद्यायाः तत्र दर्शनं भवति। तदनन्तरं कौटिल्यसदृशाः अर्थशास्त्रकाराः भासकालिदासाश्वघोष–भवभूतिदण्डिसुबन्धुबाणजयदेवप्रभूतयो। महाकवयो नाट्यकाराश्च पुरतः समायान्ति, येषां जन्मलाभेन न केवल भारतभूमिरेव, अपितु समस्तं विश्वमेतद् धन्यमस्ति। एतेषां कविवराणां गुणगणस्य वनि महाविद्वांसोऽपि असमर्थाः सन्ति, का गणना साधारणानां जनानाम्। भगवद्गीता, पुराणानि, स्मृतिग्रन्थाः अन्यद्विषयकं च सर्व साहित्य संस्कृतस्य माहात्म्यमेवोद्घोषयति।

सर्वासां भाषाणां मातृस्वरूपा इयं संस्कृतभाषा विद्यते। अत्यन्तं वैज्ञानिकदृष्ट्या इयं भाषा शोशुभ्यते। विशिष्टं ज्ञानं विज्ञानमिति उक्तत्वात् भाषायामस्यां वैज्ञानिकतत्त्वानि, वैज्ञानिकसूत्राणि, वैज्ञानिकप्रयोगाः, वैज्ञानिकसिद्धान्ताः इत्यादिबहवो हि अंशाः अन्तर्भवन्ति।

बहूनां ग्रन्थानां समवलोकनं कृत्वा सर्वेक्षणविधिना अयं विषयः प्रतिपादितः। वर्णनात्मकविधिरपि समाश्रितः वर्तते। देवीं वाचमजनयन्त देवाः। तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु इति देवीसूक्तम्। संस्कृतं नाम

दैवी वाक् अन्वाख्याता महर्षिभिः'। इयं हि भाषा शुद्धा स्पष्टा च विद्यते। संस्कृतं वैज्ञानिकी भाषा वर्तते। संस्कृते विज्ञानं परीवर्ति। विशिष्टं ज्ञानं विज्ञानमिति व्यपदिश्यते। यः भाषामधीते यः विषयान् समधीते अवश्यं ज्ञानी भवति सः। भाषाया अस्याः प्रभावेण यदि सः अन्विष्यति आविष्करोति वा अभिनवं किमपि सोऽवश्यं विज्ञानीपदवाच्यः भवति। यतः अत्र प्रकृतिप्रत्ययाः विचार्यन्ते। ऋचोयजूंषिसामानिचाथर्वाणि त इमे चत्वारो वेदाः। वेदो नाम ज्ञानराशिः। वेदेषु दर्शनम्, योगः, धर्मः, वाणिज्यम्, विज्ञानं, क्रियाः, कलाः, संस्कृतिः, सङ्गीतं, नृत्यं, व्याकरणम्, उच्चारणम्, छन्दः, ज्योतिषम्, खगोलविज्ञानं, शल्यचिकित्सा, तत्त्वशास्त्रं, न्यायशास्त्रं, वैद्यकीयशास्त्रं, प्रविधिशास्त्रमित्यादि बहवो विषयाः प्रतिपादितास्सन्ति।

संस्कृतभाषा देवभाषा कथ्यते। संस्कृतभाषायां मानवसंस्कृतेरितिहासः सुरक्षितोऽस्ति। इयं संस्कृतभाषाऽन्याभ्यः सर्वेभ्योऽपि भाषाभ्यः प्रकारे विस्तारे च महती,सौन्दर्ये विचारपवित्रतायां चान्यूना विद्यते। सत्यपि मन्दतमे विकासक्रमे क्रमोपनते च वाधासमुदये इतिहासारम्भासमयत एव संस्कृतभाषा विश्वस्यान्यासां भाषाणां समतां कुर्वती समायाति। अन्याभिर्विश्वस्य भाषाभिरस्याः प्रतिस्पर्धा गुणगणकृतैव। भारतेऽजायन्त विविधानि सामाजिकपरिवर्तनानि, धार्मिकाण्युत्यानपतनानि, वैदेशिकानाम् क्रमणानि च तथाऽपि संस्कृतं सर्वदा समभावेन सर्वत्र व्यवहारवर्त्मन्यवर्तत्।

संस्कृतभाषाया रूपद्वयं, लौकिकं वैदिकञ्च। महाभारतकालात् पूर्वतनभाषा वैदिकभाषा, ततः परस्तात् प्रचारिता च लौकिकभाषा। संस्कृतभाषायाः स्वरूपे विचार्यमाणे इदं प्रागवधार्यं यदियं लोकभाषा व्यवहारभाषा वा आसीदथवा केवलशास्त्रभाषा एव अवर्तत्। अत्र मतद्वयम्, केचन कथयन्ति यत् प्राकृतमेव लोकभाषा आसीत्, संस्कृतं शास्त्रभाषा साहित्येकभाषा वाऽवर्तत्, व्यवहारभाषा नासीत्।

अपरे पुनः संस्कृतभाषैव पुरा लोकभाषा आसीदिति समर्थयन्ते, तेषामयमाशयः – पुराकाले भारतीया अनया संस्कृतभाषायैव स्वं मनोभावं प्रकटयन्ति स्म क्रमशः शनैः शनैः प्राकृतोदये जाते संस्कृतभाषाया व्यवहारक्षेत् सङ्कोचमापत, परन्तु अस्यामपि दशायां शिष्टाः संस्कृतभाषामेव व्यवहरन्ति स्म। अत एव रूपकेषु शिष्टानां संस्कृतभाषा तदन्यपात्राणाञ्च प्राकृतम्।

## 1.3.1 वैदिककाले संस्कृतशिक्षणम्

वैदिकसंस्कृतभाषातो भिन्ना भाषा, तात्कालिकजनताया भाषा, 'भाषा' पदेन निरुक्तग्रन्थे यास्केन व्यवहृता। तेन हि वैदिककृदन्तशब्दानां सि़द्धिः लोकप्रचलितधातुभ्यः प्रदर्शिता। 'भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते' इति हि तदुक्तिः। तस्मिन् समये भिन्नभिन्नप्रान्तेषु संस्कृतशब्दानां यानि रूपान्तराणि प्राप्यन्ते स्म, ये विशिष्टप्रयोगा भवन्ति स्म, तेषां सर्वेषामुल्लेखेऽपि यास्केन कृतः, यथा– 'शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकारमेव त्वेनमार्या भाषन्ते श्व इति' दातिर्लवनकर्मा प्राच्येषु प्रयुज्यते, दात्रमुदीच्येषु' एभिः साक्षिभिर्यास्कसमये संस्कृतस्य भाषितभाषात्वं सिद्धयति। यास्कस्य समयो 600 ई. पू. कथ्यते।

वेदानां रचनायां जातायां तदव्याख्यानभूता ब्राह्मणग्रन्था अरच्यन्त, ब्राह्मणग्रन्थेभ्यः पश्चादारण्यकानि, तदनन्तरमुपनिषदः, ततो रामायणं महाभारतं पुराणानि च। सेयं परम्परा कियता स्वरूपविपर्ययेण सह काव्य–नाटक–गद्य–चम्पू–कथा–स्मृति–तन्त्रादिनिर्माणविधया चिरमन्वर्तत। सेयं संस्कृतसाहित्यस्याविच्छिन्ना परम्परा न्यूनान्न्यूनमष्टसहस्रसंवत्सरेभ्यः समायातीति नितान्तसत्यं वचः। नास्ति विश्वस्मिन्नस्मिन् किमपि साहित्यमन्यद्यद– विच्छिन्नधारयन्ति दिनानि जीवितं समर्थ्येत्।

अतिव्यापकं च संस्कृतसाहित्यम्। इदं सर्वाङ्गपूर्णं यतोऽत्र मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरुषार्थाः विवेचिताः। धर्मशास्त्रं प्रथम एव, अर्थशास्त्रमपि कौटिल्यादिप्रणीतमत्र न कुतोऽपि हीयते। कामशास्त्रमपि परमप्रसिद्धमत्रत्यम्, मोक्षशास्त्रस्यापि परमप्रकृष्टता तर्कसम्मता। एवं संस्कृते मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिता इति कथनं समुचितमेव। अत्र प्रेयः शास्त्रं श्रेयः शास्त्रं चोभयं समभावेन समेधितम्, अत एव चात्र भोगमोक्षयोरुभयोः सत्तया सकलसाहित्यापेक्षया विशिष्टता विद्यते।

वैदिककालीनस्य संस्कृतशिक्षणस्य विषये प्रायः सम्पूर्णा वैदिकशिक्षाव्यवस्था अवलोकनीया। कारणं वैदिककालीनशिक्षा परिसमन्तात् संस्कृतनिष्ठा एव आसीत्। उद्देश्य–विधि–पाठ्यक्रमादिदृष्ट्या वैदिककालीनशिक्षायाः आधारः संस्कृतमेव आसीत्। अतः वैदिककालीनस्थ संस्कृतशिक्षणस्य सन्दर्भेषु वैदिकशिक्षायाः स्वरूपम्, प्रयोजनम्, शिक्षणाभ्यासः चादयः विषयाः विवेचनीयाः। क्रमशः वैदिककालीन शिक्षा अवगन्तव्या। वैदिककालीनशिक्षायां वेदाधारितसाहित्यस्य अध्ययन–अध्यापनं श्रेयस्करं मतम्। संहितायाः ऋग्वेद–यजुर्वेद–सामवेद–अथर्ववेदानां शिक्षणम् अतीव आधारभूतं मतम्। ऋग्वेदे देवताविशेषं प्रति स्तुतिगानम्, यजुर्वेदे कर्मणां पवित्रतासम्बद्धाः मन्त्राः संकलिताः उपलब्धाश्च, सदुपासनायाः मन्त्राः यत्र संकलिताः सः सामवेदः, अन्तिमे अथर्ववेदे अनुष्ठानस्य हेतुः मन्त्राः संकलिताः। अनन्तरं ब्राह्मण–आरण्यकानां अध्ययन–अध्यापनं क्रियते स्म। वेदांगपरिचयोऽपि अत्र आवश्यकः अस्ति। वैदिकसाहित्यस्य अवबोधनाय षट् वेदांगाः उपकारकाः अनुभूताः। वैदिककालिके शिक्षणे एतेः वेदांगाः अनिवार्याः –

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**

### 1. व्याकरणं

एतद्वेदस्य मुखत्वेन स्मृतम् – **''मुखं व्याकरणं स्मृतम्''** भाषा लोकव्यवहारं प्रवर्तयति। यदि भाषा न स्यात्, तर्हि जगदिदमन्धेतमसि मज्जेत्। यथोक्तं दण्डिना –

''इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते''।।

भाषायाः शुद्धये व्याकरणस्य अपेक्षा भवत्येव। न हि व्याकरणज्ञानशून्यो जनः साधून् शब्दान् प्रयोक्तुं शक्नोति। स्वयम् ऋक्संहितायाम् अस्य व्याकरणशास्त्रस्य प्रशंसायाम् अनेके मन्त्राः भिन्न–भिन्नस्थानेषु उपलब्धा भवन्ति। ऋग्वेदस्यैकस्मिन् सुप्रसिद्धमन्त्रे व्याकरणं वृषभस्य रूपकत्वेन प्रतिपादितमस्ति–

**''चत्वारि शृङ्गाः त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्ता सोऽस्य।**
**त्रिधाबद्धो वृषभो रोरवीति महोदेवो मर्त्याम् आविवेश।।''**

अस्य वृषभरूपी व्याकरणस्य चत्वारि शृङ्गाणि सन्ति–नाम–आख्यात–उपसर्ग–निपात–रूपाणि। त्रिपादोऽस्य भूत–भविष्य–वर्तमानाः। सुप्तिङन्तश्च द्वे शीर्षे स्तः, सप्तविभक्तयश्च सप्तहस्ताः सन्ति। उरसि शिरसि च कण्ठे त्रिधाबद्धो वृषभोऽयमस्ति। एवंविधव्याकरणज्ञानाद् योऽनभिज्ञोऽस्ति, सः जानन्नपि न जानाति, पश्यन्नपि न पश्यति, शृण्वन्नपि न शृणोति। किञ्च यो हि जनो व्याकरणशास्त्रज्ञोऽस्ति, तत्सन्निधौ वाणी सुसज्जिता कामिनी इव समागत्य सर्वतोभावेन समर्पिता भवति –

**उतत्वः पश्यन् न ददर्श वाचम् उतत्वः शृण्वन् न शृणोत्येनाम्।**
**उतोत्वस्मै तन्वं विसले जायेव पत्ये उशती सुवासाः।।**

आचार्यवररुचिः व्याकरणशास्त्रस्य महनीयतां गायन् यदा तदध्ययनप्रयोजनानि पञ्च प्रतिपादयति, तदा महर्षिः पतञ्जलिः तदध्ययनप्रयोजनानि त्रयोदश ब्रूते। तेन हि व्याकरणशास्त्रं नितरां प्राचीनं शास्त्रमस्ति। न हि व्याकरणज्ञानशून्यः साधून् शब्दान् प्रयोक्तुमीशः। वेदस्य रक्षार्थं व्याकरणाध्ययनमत्यावश्यकम्।

''रक्षार्थवेदाध्ययनमध्येयं व्याकरणं, लोपागमवर्णविकारज्ञो हि पुरुषः सम्यग् वेदान् परिपालयिष्यति'' इति पतञ्जलिः। वेदरक्षाक्षमतयैव व्याकरणस्य वेदाङ्गत्वमपि समर्थ्यते।

### 2. कल्प

कल्पः वेदानां द्वितीयमङ्गमस्ति। ब्राह्मणकाले यागस्य तावान् प्रचारः जातः यत, तेषां यथावज्ज्ञानाय पूर्णपरिचयप्रदायकग्रन्थानाम् आवश्यकता अनुभूयते स्म, तामेव आवश्यकतां स्वल्पैः शब्दैः पूरयितुं कल्पसूत्राणि विरचितानि। वेदविहितानां कर्मणां व्यवस्थापनं क्रमपूर्वकं कल्पशास्त्रे कल्पितम्। उक्तंच – ''कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम्।''

### वेदानुसारं कल्पसूत्राणि

1. **ऋग्वेदस्य कल्पसूत्रम्**– आश्वलायनं, शाङ्ख्यायनञ्चेति। अनयोरुभयोरपि कल्पसूत्रयोः श्रौतसूत्रं गृह्यसूत्रञ्च सम्मिलितञ्च विद्यते।
2. **शुक्लयजुर्वेदस्य कल्पसूत्रम्**– कात्यायनश्रौतसूत्रम्, पारस्करगृह्यसूत्रम्, कात्यायनशुल्वसूत्रंचेति।
3. **कृष्णयजुर्वेदस्य कल्पसूत्रम्**– बौधायनसूत्रम्, आपस्तम्बसूत्रंचेति। अनयोः कल्पसूत्रयोः श्रौतगृह्यधर्मशुल्वसूत्राणि सर्वाण्यपि सन्तीति ग्रन्थाविमौ पूर्णरूपौ।
4. **सामवेदस्य कल्पसूत्रम्**– लाट्यायनश्रौतसूत्रं, द्राह्यायणञ्चेति। जैमिनीयशाखायाः श्रौतसूत्रं जैमिनिगृह्यसूत्रं, गोभिलगृह्यसूत्रं, खादिरगृह्यसूत्रञ्चेति। सामवेदे एव

आर्षेयकल्पस्यापि गणना भवति। अयमेव कल्पो मशककल्पसूत्रनाम्नापि प्रथते। सूत्रमिदं लाट्यायनश्रौतसूत्रात् प्राचीनं मन्यते।

5. **अथर्ववेदस्य कल्पसूत्रम्**– वैतानश्रौतसूत्रम्, कौशिकसूत्रंचेति। वैतानसूत्रं नातिप्राचीनं, कौशिकसूत्रंच अभिचारक्रियावर्णनपरम्।

**कल्पसूत्राणां प्रकाराः**

कल्पसूत्राणि द्विविधानि – श्रौतसूत्राणि, स्मार्त्तसूत्राणि च। श्रुत्युक्तयागविधिप्रकाशकानि श्रौतसूत्राणि। स्मार्त्तसूत्राण्यपि द्विधा– गृह्यसूत्राणि धर्मसूत्राणि चेति। श्रौतसूत्रेषु अग्नित्रयाधानम्, अग्निहोत्रं, दर्शपूर्णमासौ, पशुयागः, नानाविधा सोमयागाश्चेति विषयाः समुपपादिताः। मुख्यतः कल्पसूत्राणि सन्ति चतुर्विधानि –

1. **श्रौतसूत्रम्**– श्रौतसूत्रे ब्राह्मणग्रन्थवर्णितानां श्रौत्राग्नियज्ञानां क्रमबद्धं वर्णनं वर्तते।
2. **गृह्यसूत्रम्**– गृह्यसूत्रेषु तेषाम् अनुष्ठानाचारयागानां वर्णनं विद्यते, येषां सम्पादनं त्रैवर्णिकरवश्यं कर्त्तव्यमिति। षोडशसंस्काराणां विशिष्टं वर्णनमपि गृह्यसूत्रेषु कृतम्। मुख्यतः गृह्यसूत्रे गृह्याग्निसम्बद्धयागानाम् उपनयनविवाहश्राद्धादिसंस्काराणां विस्तृतं विवरणं विद्यते।
3. **धर्मसूत्रम्**– धर्मसूत्रेषु धार्मिकनियमाः, प्रजानां राज्ञाश्च कर्त्तव्यचर्याः, चत्वारो वर्णाः, चत्वारः आश्रमाः, तेषां धर्माः पूर्णतया निरूपिताः। एतानि धर्मसूत्राण्येव स्मृतीनां जन्मनेऽकल्पन्त। धर्मसूत्रे चतुर्णां वर्णानाम् आश्रमाणाञ्च किञ्च राज्ञामपि कर्त्तव्यानि निर्दिष्टानि सन्ति।
4. **शुल्वसूत्रम्**– शुल्वसूत्रं तु वेदिनिर्माणप्रकारं विशेषतः प्रतिपादयति। सूत्रस्यास्य वैज्ञानिकं महत्त्वमस्ति। मुख्यतः शुल्वसूत्रमपि कल्पसूत्रमेव, तत् श्रौतसूत्रान्तर्गतम्। शुल्वं मापक्रिया। इदं सूत्रमेव भारतीयज्यामितिशास्त्रस्य प्रवर्तकम्।

### 3. निरुक्तं

निरुक्तं षड् वेदाङ्गेषु अन्यतमम्। निरुक्तं निघण्टोर्महत्त्वपूर्णा टीकाऽस्ति। निरुच्यते निश्शेषेण उपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तत् निरुक्तमिति कथ्यते। यास्ककृतं निरुक्तन्तु निघण्टुग्रन्थस्य व्याख्याऽस्ति। अतोऽस्य वेदाङ्गत्वमनुप–पन्नमित्याशङ्क्य समाधत्ते– **''अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्''** यास्को निरुक्तस्य सिद्धान्तस्य वैज्ञानिकं प्रदर्शनमकरोत्। वेदार्थानुशीलनाय तदाऽनेकपक्षाः आसन्। येषां नामानि अनेन प्रकारेण प्रदत्तानि सन्ति – (1) अधिदैवतः, (2) अध्यात्मः, (3) आख्यातसमयः (4) ऐतिहासिकाः, (5) नैदानाः, (6) नैरुक्ताः, (7) परिव्राजकाः, (8) याज्ञिकाश्च।

अनेन मतनिर्देशेन वेदार्थानुशीलनस्य इतिहासोपरि विशिष्टरूपेण प्रकाशः प्रसरति। यास्कस्य प्रभावः अवान्तरकालिकभाष्योपरि अस्ति। सायणस्तु अस्याः पद्धत्याः अनुसरणं कृत्वा वेदभाष्यरचनायां कृतकार्योऽभवत्। यास्कस्य प्रक्रिया आधुनिकभाषावेत्ताणां प्रधानतया मान्याऽस्ति। निरुक्तस्य एकमात्रप्रतिनिधित्वेन निरुक्तग्रन्थस्य सर्वातिशायि महत्त्वमस्ति।

**टिप्पणी**

निरुक्तं तु स्वयं भाष्यरूपमेवास्ति। तथाऽपि यत्र तत्रैतादृशं दुरुहमस्ति, यत्तस्य अर्थावबोधने विद्वान् टीकाकारः अपि काठिन्यम् अनुभवति। निरुक्तं व्याख्यातुं विक्रमाब्दात् पूर्वमेव विदुषां ध्यानाकृष्टोऽभवत्। पतञ्जलेः महाभाष्यम् अस्ति प्रमाणं यत् –

''शब्दग्रन्थेषु चैषा प्रभूततरागतिः भवति। निरुक्तं व्याख्यायते। न कश्चिदाह पाटलिपुत्र! व्याख्यायत इति।''

### 4. शिक्षा

वेदेषु शुद्धोच्चारणं सर्वप्रथमं वाञ्छितं भवति, तच्च शुद्धोच्चारणं शिक्षा समुपदिशति। एतस्मादेव हेतोः षट्सु वेदाङ्गेषु शिक्षाऽङ्गस्य मूर्धन्यत्वमाम्नातम्। शिक्षाया अभिमतो विषयः प्रातिशाख्येषु दृश्यते। प्रातिशाख्यग्रन्थाः शिक्षाशास्त्रस्य प्राचीनतमाः प्रतिनिधय इव सन्ति। संहितापाठसम्बन्धिनः सर्वेऽपि विषयास्तत्र साङ्गोपाङ्गतया प्रतिपादिताः। शिक्षाशास्त्रेतिहासः पुरातनतरः। परं न तद्विषयकाः प्राचीनतराः ग्रन्थाः उपलभ्यन्ते। श्रीवाचस्पतिगैरोला स्वकीये इतिहासे लिखति यत्, सत्यकेतुविद्यालङ्कारस्य मतमिदं यत् 'जैगीषव्यस्य शिष्यो बाभ्रव्यः शिक्षाशास्त्रं प्रणिनाय। महाभारते शान्तिपर्वणि आचार्यगालवकृतस्य शिक्षाग्रन्थस्योल्लेखो लभ्यते। भण्डारकरशोधसंस्थान–पूना–तः भारद्वाजशिक्षायाः प्रकाशनं जातमस्ति। तत्र नागेश्वरभट्टस्य टीका च वर्तते। नागेश्वरमतेन स ग्रन्थो भारद्वाजेन प्रणीतः। शिक्षासङ्ग्रहनामके ग्रन्थे द्वात्रिंशच्छिक्षापुस्तकानां सङ्ग्रहोऽवाप्यते। शिक्षा इमाश्चतुर्णामपि वेदानां भिन्नभिन्नशाखास्वात्मानं सम्बद्धन्ति। श्रीबलदेव–उपाध्यायः स्वकीये 'वैदिक साहित्य और संस्कृति' इत्येतदभिधेये ग्रन्थे याज्ञवल्क्यशिक्षा–वासिष्ठीशिक्षादिसंज्ञकानां विंशतिग्रन्थानामुल्लेखं विदधानो दृश्यते। साम्प्रतं समवाप्ता पाणिनीयशिक्षा प्राचीनशिक्षासूत्राणां साहाय्येन प्रणीता अभूदिति बुधानां विचारः। अद्यतने युगे पाणिनीयशिक्षां स्वामी–दयानन्द उद्धार। इदानीं शुक्लयजुर्वेदे याज्ञवल्क्यशिक्षा, सामवेदे नारदशिक्षा, अथर्ववेदे माण्डूकीशिक्षा, किञ्च ऋग्वेदे पाणिनीयशिक्षा च प्राप्यन्ते न च अन्या काऽपि।

### 5. छन्द

छन्दो वेदस्य पञ्चमङ्गमस्ति। वेदाः सन्ति छन्दोबद्धाः, अतः तेषामुच्चारणनिमित्ताय छन्दोज्ञानं नितरामपेक्षितम्। छन्दोभिधेनैतेनाङ्गेन छन्दसा सर्वेषामुच्चारणस्य विधिः, तदगतिप्रकारः, तद्गानरीतिश्च विदिता भवति। तस्माद्वैदिकमन्त्रोच्चारणप्रयोजनेन तदध्ययनं पूर्वमुचितम्। विना छन्दोज्ञानं यो वेदाऽध्ययनयजनयाजनादिकार्याणि करोति, तस्य तानि सर्वाणि कार्याणि न भवन्ति फलदायकानि। स्पष्टतया कात्यायनेन उक्तम् –

''यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वर्च्छति गर्त्ये वा पात्यते प्रमीयते वा पापीयान् भवति।''

छन्दशब्दः छद् इति धातुना निष्पन्नः। छन्दसः आद्यः प्रवर्तकः आचार्यः पिङ्गलः। पद्यरचनायाः शास्त्रस्य छन्दः इति नाम। श्रुतिगतिनिरूपकस्य छन्दसो गमनानुकूल–तदङ्गत्वमुच्यते पाणिनीयशिक्षायां छन्दः पादौ तु वेदस्य इत्यनेन। विपुलफलकस्य वैदिकवाङ्गमयस्य कृत्स्नार्थवगतिश्छन्दः अवलम्बते। लौकिकवाङ्गमयस्य–

त्वर्थप्रतीतेस्सुलभसाधनत्वेनेदमुपकरोति। स्तुतिपूजाप्रसादजननाद्यनेकार्थकं छन्दो नैकधा व्याख्यायत। छन्दांसि छादनात् इति निरुक्तोक्त्या वेदार्थावारकत्वेनेदं सम्प्रायुज्यतेति। मृत्युभीतानां देवानां वेदं प्रविश्य छन्दोभिरावृत्तत्त्वमुच्यते। तदुक्तं छन्दोभिरच्छाद–यन्यदेभिच्छादयंस्तच्छन्दसां चन्द्रस्त्वम् इति। वेदमन्त्राणां बाहुल्येन छन्दोपनिबद्धत्वात् कालान्तरे वेदापरपर्यायत्वेन छन्दः शब्दः प्रयुक्तः। अतो वैदिकार्थे छान्दसप्रयोगः, छन्दोभ्यः समाहृत्य समाम्नाताः इति निरुक्तवाक्यञ्च तमर्थं दृढ़यति।

### 6. ज्योतिषं

वेदाङ्गभूतस्य ज्योतिषशास्त्रस्य साहित्यं विशदं व्यापकंचास्ति। तत्र सूर्यपितामहादिकानां सिद्धान्तग्रन्थाः, गौरीकालजातकादयो दैवग्रन्थाः, पराशरजैमिनीकृतार्षग्रन्थाः, वाराहमिहिरकृत–बृहज्जातकादयः पौरुषग्रन्थाः, वैदिकज्योतिषसंहितादिकाश्च प्रचुराः ग्रन्थाः विराजमानाः सन्ति। अस्त्येतच्छास्त्रं स्कन्धत्रयात्मकम् – "सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्" इति।

ज्योतिःशास्त्रस्य बीजानि वेदेषु लभन्ते। तत्र – "एका च मे त्रिस्रश्च मे पञ्च च मे सप्त च मे" इत्यादिषु मन्त्रेषु गणितसिद्धान्तः, किञ्च– "इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभि।" इत्यादिषु मन्त्रेषु रेखागणितस्य बीजं विलोक्यते। तदेवं शास्त्रस्यास्य उद्भवभूः श्रुतय एव सन्ति। एतत्प्रवर्तका अष्टादशमहर्षयः, ते च–

**"सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।।"**
**कश्यपो नारदो गर्गो मारीचिर्मनुरङ्गिराः।।"**
**लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः।।"**
**शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्त्तकाः।।"**
**वेदाङ्गज्यौतिषशास्त्रस्य प्रवर्तकः लगधः अपि मन्यते।**
**"प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्।**
**कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।।"**
**उत्तरवैदिककाले संस्कृतशिक्षण**

## 1.3.2 उत्तरवैदिककाले संस्कृतशिक्षणम्

वैदिककाले एव वेदाङ्गं प्रति वैदिकानाम् ऋषीणां ध्यानाकर्षणमभवत्। ब्राह्मणग्रन्थेषु शिक्षासम्बद्धनियमानाम् उल्लेखो यत्र तत्र प्राप्यते। उपनिषत्सु अद्वैत–विशिष्टाद्वैतश्रुतीनां सद्भावः। अस्मिन्नेव काले मूलरूपेण शिक्षा–सिद्धान्तोऽपि प्रतिपादितोऽस्ति। उत्तरवैदिक काले वेदानाम् अन्तिमभागानाम् उपनिषदां प्रभावः भारतीय समाजे दृश्यते। उपनिषदां शिक्षापद्धतिः संस्कृतनिष्ठा आसीत्। वैदिककालवत् उत्तरवैदिककाले सम्पूर्णभारते शिक्षायाः आश्रमपद्धतेः, गुरुकुलपद्धतेः च प्रभावः स्पष्टतया द्रष्टुं शक्यते। अस्मिन् काले एव जैनबौद्धधर्मयोः प्रभावः भारतीये समाजे दृश्यते। उत्तरवैदिककाले वैदिकशिक्षायां जैनबौद्धशिक्षयोः च आध्यात्मिकी शिक्षा विशिष्टा आसीत्। ततः कारणं संस्कृतस्यापि प्रभावः दृश्यते।

आचार्यैः शिक्षासिद्धान्तप्रतिष्ठापिकाः श्रुतयः प्रधानत्वेन स्वीकृताः, अन्यासां श्रुतीनां गौणत्वञ्च तैरुपपादितम्। वस्तुतः उपनिषत्सु सर्वेषामपि दर्शनानां बीजानि निहितानि सन्ति। न केवलं शिक्षादर्शनस्य अपितु विभिन्नदर्शनानामपि मूलसिद्धान्ताः समुपलभ्यन्ते।

उपनिषदां प्रधानत्वेन प्रतिपाद्यो विषयोऽस्त्यात्मा। संहिता–तः आरण्यकं यावत् तद् ब्रह्म आत्मनो भिन्नमित्येतेन रूपेण प्रतिपादितमस्ति, तदुपनिषत्सु ततो भिन्नमित्येतेन प्रकारेण व्याख्यातमस्ति। द्वयोरप्यभिन्नत्वाद् दैवाध्यात्मिकतत्त्वयोः एकत्वाच्च आत्मैवैकः सर्वत्र न च तं विहाय कोऽप्यन्यः पदार्थ इति हि उपनिषद्भिः उक्तम्। तच्चात्माख्यं तत्त्वं पूर्णमस्ति। तदेव तत्त्वं द्रष्टृ तदेव च दृश्यम्। न द्रष्टृदृश्ये भिन्नतां वस्तुतः श्रेयतः। आत्मैव सर्वव्यापी वर्तते। विश्वस्य सर्वेश्वपि पदार्थेषु स एव व्याप्तोऽस्ति। तस्मिन्नेव समग्रस्यापि प्रपञ्चस्य लयो भवति। ततो व्यतिरिक्तं न किमपि। अत एव बृहदारण्यकोपनिषदाह –

'स वाऽयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्रमाणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमयः आपोमयो वायुमय आकाशमयस्तेजोमयः काममयोऽकाममयः क्रोधमयोऽत्रक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयः।'

अतः संसारस्य यावन्तोऽपि सन्ति स्थूला वा सूक्ष्माः पदार्थाः, सर्वेऽपि नात्मनो भिन्नाः। ते सर्वे आत्मत्वेनैव वेदितव्याः, नात्मनः परं किमपि प्रियतरम्। ऋषिभिः बहुधा सः आत्मा वर्णितः। कथयन्ति ते यत्, आत्मैव प्राणापानव्यानोदानवायुरूपेण अस्मच्छरीरे भवति। आत्मैव क्षुत्पिपासामोहशोकजरामरणेभ्यः अस्मान्नुद्धरति। आत्मनो ज्ञानानन्तरमेव मानवः सुतसम्पत्सुन्दरीस्वर्गादिसमवाप्तेः इच्छातो विरतो भूत्वा परिव्राजो जीवनं वहति। पूर्णत्वाद् अखण्डत्वाच्चात्मा सदसल्लघुगुरुद्रादूरान्तर्बहिरादि–सकलविरुद्धधर्माणाम् एकाधारः। सर्वेऽपि दर्शनकारा अत एवेदं परमतत्त्वमात्मा अभिधेयं विभिन्नरूपेण स्वस्वमूलतत्त्वं मत्वा भिन्नभिन्नया दृष्टिसरण्या भिन्नभिन्नानि दर्शनानि व्यरचयन्। ब्रह्मतत्त्वं यः कोऽपि जिज्ञासति, ज्ञातुं शक्नुते, यः कोऽपि मानवस्तल्लिप्सति लब्धुं प्रभवति।

नायमात्मा वेदाध्ययनेन लब्धुं शक्यो न च सद्धारणाशक्त्यैव। साधको हि यमात्मानं वृणुते, तेनैव स तमवाप्तुमीष्टे। सम्प्रति हि स्वयमेवात्मा स्वकीयं रूपमभिव्यनक्ति। कठोपनिषदाह–

**'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रुतेन।।**

**यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूस्वाम्।।**

तैत्तिरीयोपनिषदः प्रथमवल्ल्यामस्याः शिक्षायाः समस्तमूलसिद्धान्तस्य विवेचनमुपलब्धं भवति। यथा– शिक्षां व्याख्यास्यामः। वर्णः, मात्रा, बलं, साम, सन्तानः, इत्युक्तः शिक्षाध्याये, उपनिषदानुसारेण इत्येतानि षडङ्गानि भवन्ति शिक्षाविषयस्येति

(1) वर्णस्य अभिप्रायः अक्षराणि भवन्ति। वेदतत्त्वस्य ज्ञानार्थं संस्कृतवर्णमालायाः ज्ञानं नितान्तम् आवश्यकमस्ति। पाणिनीयशिक्षातः ज्ञानं भवति यत्, संस्कृतवर्णमालायां 63 अथवा 64 वर्णाः निर्धारिताः भवन्ति। न केवलमियं संख्या संस्कृतभाषार्थमेव, प्रत्युत वैदिककाले प्रयुक्तं प्राकृतभाषार्थमपि नियता आसीत्।

(2) स्वरस्याभिप्रायः – उदात्तानुदात्तस्वरितैः सहास्ति।

(3) मात्राशब्देन उच्चारणसापेक्षसमय एवास्ति। मात्रा त्रिधा भवति – ह्रस्व–दीर्घ–प्लुताश्चेति। एकमात्रो भवेद् ह्रस्वः, द्विमात्रो दीर्घं उच्यते, तथा त्रिमात्रो प्लुतसंज्ञको भवति।

(4) बलेन स्थानप्रयत्नयोः बाधो भवति। स्वर–व्यञ्जनयोः उच्चारणकाले ताल्वादि यत्स्थानस्य वायुना स्पर्शो भवति, तदैव स्थानमिति। स्थानानि च इमानि अष्टसंख्यकानि भवन्ति। प्रयत्नोऽपि द्विधा भवति– आभ्यन्तरो बाह्यश्चेति। आभ्यन्तरप्रयत्नः चतुर्धा विभक्तोऽस्ति – स्पृष्ट–ईषत्स्पृष्ट–विवृत–संवृतभेदात्। बाह्यप्रयत्नोऽपि एकादशधा – विवार–संवार–श्वास–नाद–घोष–अघोष–अल्पप्राण–महाप्राण–उदात्तस्वरिताश्चेति।

(5) सामशब्दस्यार्थो भवति – 'साम्यम्' अर्थात् दोषरहितम् अनुदात्त– माधुर्या–दिगुणयुक्तमुच्चारणम्। तद्यथा–

**'माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थञ्च षडेते पाठका गुणाः।।**

विपरीतमस्य अधमपाठकेषु परिगणितप्रकाराणां निर्देशोऽपि तत्रैव। यथा–

**'गीती शीघ्री शिरः कम्पी यथा लिखितपाठकः।।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः।।**
**शकृतिभीतादिपाठोऽपि अनर्थको भवति। यथा –**
**शङ्कितं भीतमुत्कृष्टमव्यक्तमनुनासिकम्।**
**काकस्वरं शिरसिंगं तथा स्थानविवर्जितम्।।**
**उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्।**
**निष्पीडितं ग्रस्तपदाक्षरश्च वदेन्न दीनं न तु सानुनास्यम्।।**

(6) सन्तानः – सन्तानशब्दस्यार्थो भवति संहिता, अर्थात् पदानामतिशयसन्निधिः। सत्यपि पदानां स्वतन्त्रास्तित्वे यदा कदा पदद्वयस्य आवश्यकतानुसारेण शीघ्रतयैकस्य अनन्तरमेकस्य उच्चारणं भवति, तदेवोच्चारणं संहितापदेन व्यपदिश्यते। पदेषु प्रथमं संहिता भवति, तत्पश्चादेव सन्धिर्भवितुमर्हति। यथा –'वायो आयाहि' अत्र स्वतन्त्रे द्वे वैदिकपदे स्तः। यदैकस्मिन्नेव वाक्ये पदद्वयस्य सहैवोच्चारणं भवति तदा सन्धिकारणेन अत्र किमपि परिवर्तनं भवति। तदा पूर्वोदाहरणस्य रूपं 'वायवायाहि' भविष्यति। अनेनैव प्रकारेण 'इन्द्राग्नो आगतम्' अत्र प्रकृतिभावो भविष्यति। प्रत्येकस्मिन् वेदे वर्णानामुच्चारणं समानरूपेण भवितुं नार्हति। तेषामुच्चारणे पार्थक्यं भवत्येवेति। उदाहरणाय – मूर्धन्यः 'ष' इत्येतस्य शुक्लयजुर्वेदे रेफेण सह उष्मवर्णेन सह संयुक्ते सति च अस्योच्चारणं 'ख' इव भवति। किञ्च अन्यवेदेषु अस्य उच्चारणं विशुद्धमूर्धन्यः 'ष' इव भवति। यथा पुरुषसूक्तस्य प्रधानमन्त्रगत– 'सहस्रशीर्षा पुरुषाः'। अत्र ऋग्वेदिनामुच्चारणे यत्र 'शीर्षा' इत्येतस्य 'ष' इति मूर्धन्यः स्पष्टतः एव भवति, तत्र माध्यन्दिनशाखीयानामुच्चारणे 'शीरेखा पुरुखः'

इत्युच्चारणं भवति। अस्य विशिष्टपरिचयः तत्तद्वेदस्य एव शिक्षायां विस्तरेण सह प्रदत्तमस्ति। इदमेव कारणमस्ति यत्, प्रत्येकस्य वेदस्य स्वकीया शिक्षाऽस्ति। तस्यामेव शिक्षायां तत्तद्वेदविशेषस्य उच्चारणस्य अपि विधानं वर्तते।

### 1.3.3 मध्यकाले संस्कृतशिक्षणम्

मध्यकालीने भारते हिन्दुशिक्षायाः संस्कृतशिक्षायाः च संस्थानानि नष्टानि। संस्कृतस्य भारतीयज्ञानविज्ञानस्य वा साहित्यं, ग्रन्थाः, पाण्डुलिपयः च भस्मीकृताः, नष्टाः च। क्वचित् प्रच्छन्नरूपेण निरातङ्कस्थानेषु संस्कृतशिक्षायाः वातावरणं सुरक्षितम् आसीत्। तथापि प्रधानरूपेण अरबी–फारसी–उर्दू–आदीनां माध्यमानां स्वीकरणं भवति स्म। राजकीयसंरक्षणस्य अभावेन मध्यकाले प्रायः गुलाम–मुगलादिकाले संस्कृतस्य शिक्षा उपेक्षिता एव आसीत्। मध्यकालीना संस्कृतशिक्षा विशेषरूपेण साहिय–व्याकरण–दर्शनानि प्रति उन्मुखा आसीत्। द्वादशतम् शताब्दिपर्यन्तं संस्कृतं राजकीयभाषा निर्बाधरूपेण स्वीकृता। अस्य मध्यकालीनं साहित्यं प्रमाणम् अस्ति। 1100 खीस्ताब्देः अनन्तरं विदेशीयभाषाणां प्रभावने संस्कृतस्य स्थानं संकटापन्न जातम्। 1500 खीस्ताब्देः पश्चात् तु संस्कृतस्य स्थानं भारतीयसमाजेषु निम्नतां प्राप्तवत्। तथापि मध्यकालीनभारते संस्कृतपाठशालाः प्रायः शासकीयसहायतायाः अभावे परम्परारूपेण अनौपचारिकरूपेण च प्रचलिताः आसन्।

### 1.3.4 ब्रिटिशकालीने संस्कृतशिक्षणम्

ब्रिटिशकालीने भारते, डच–डेन–पुर्तगालादिसंस्कृतीनां प्रभावने तत्कालीने भारते उपनिवेशीय–संस्कृतेः प्रभावः जातः। अनेन प्रकारेण उपनिवेशीयसंस्कृतिना संस्कृतस्य शिक्षा स्वस्थानात् दूरीकृता। ब्रिटिशकालीनैः सामाजिक–आर्थिकप्रयासैः विकासपरिस्थितिभिः वा संस्कृतशिक्षा सम्प्रति तादृशी गौरवप्राप्ता नासीत्। तथापि भारतीयेषु वैदेशिकेषु च केचित् आसन् ये संस्कृतं प्रति, संस्कृतशिक्षां प्रति वा सहृदयाः आसन्। सर विलियम जोन्स, चार्ल्स विल्किन्सादयः संस्कृतं प्रति समादारम् उद्घाटयन्ति इति। मैक्समूलरमहोदयेन तु संस्कृतशिक्षायाः महत्त्वं सम्यक्तया उद्घाटितं यत् विना संस्कृतेन भारते उदारशिक्षायाः सफलतायाः सम्भावना एव न वर्तते। एतेः विद्वद्भिः स्पष्टतया उक्तं। यत् भारतीयज्ञानं संस्कृतशिक्षामाध्यमेन एव संरक्षितं सेववर्धतं च आसीत्। इमर्सन–विटमेन–थोरो–गोथे–शोपेनहारादिभिः दार्शनिकैः संस्कृतशिक्षा साहित्यं वा प्रशंसितम्। निश्चितरूपेण अनेन ब्रिटिशकाले संस्कृतशिक्षायाः प्रसारः जातः। विलियमकैरी (1767–1837), विलियम हाजे मिल (1792–1853), जॉन मूर (1810–1882) आदयः विद्वान्सः संस्कृतस्य विदेशीयभाषाणां च मध्ये परस्परं लेखन–अनुवादविधिभिः महत्त्वपूर्णानि कार्याणि कृतवन्तः। एकोनविंशतितमायां शताब्द्यां तु प्रारम्भिकदशकेषु संस्कृतस्य शिक्षा उपेक्षिता, परम् अन्तिमदशकेषु संस्कृतशिक्षायाः विकासः कृतः। लॉर्ड बेंटिककालीने भारते तु संस्कृतशिक्षायाः अवनतिः एतैः कारणैः अभवत्–

- संस्कृतशिक्षायाः संस्थानेभ्यः प्रदीयमानायाः आर्थिकसहायतायाः निषेधः।
- नवीनानाम् अध्यापकानां नियुक्तिः एव उपेक्षिता।

**टिप्पणी**

- आंग्लशिक्षायाः अधिकं प्रोत्साहनम्।
- उक्तेन कारणत्रयेण ब्रिटिशकालिके भारते संस्कृतशिक्षायाः अवांछनीयाः अवनतिः जाता।

1921 तमे वर्षे 21 विश्वविद्यालयेषु संस्कृतविभागाः आसन्। बोम्बे–कलकत्ताविश्वविद्यालययोः संस्कृतं द्वितीयभाषारूपेण अनिवार्यविषयेण च स्वीकृतम्। एतयोः विश्वविद्यालययोः प्रवेश्य–मध्यवर्तिपरीक्षासु विद्यार्थिभिः संस्कृतं द्वितीयभाषारूपेण अंगीकृता। प्रत्युत् मद्रास–विश्वविद्यालये संस्कृतम् आधुनिकभाषावत् वैकल्पिकविषयत्वेन स्वीकृतम् आधुनिककालीना भारतीयशिक्षा वस्तुतः भारतीयपरिस्थितिभिः सह साम्यतां न भजते।

आधुनिकभारतीयशिक्षायाः इतिहासः अस्याः विसंगतेः प्रमुखं कारणम् अस्ति। भारतीय इतिहासस्य गर्भे वर्तमान भारतीयशिक्षायाः समस्मानां कारणानि निहितानि। प्रायशः प्रसिद्धम् एतत् यत् ब्रिटिशजनाः व्यापाराय भारतवर्षम् आगतवन्तः, अनन्तरं प्रत्यक्षाप्रत्यक्षरूपेण भारतं ते शासितवन्तः। ब्रिटिशशासनकाले ब्रिटिशजनैः सर्वप्रथमं भारतीयशिक्षायाः एव उपेक्षा कृता। तिरस्कारभावनया संस्कृतनिष्ठायाः भारतीयशिक्षायाः मध्यकालैव अवनतिः ह्रासः वा जातः, ब्रिटिशकाले तु मिशनरीशिक्षया भारतीयतायाः समाजे ह्रासः अभवत्। ब्रिटिशकाले डच–डेन–फ्रांसीसी–पुर्तगालि–आंग्लमिशनरीमाध्यनेन परदेशीयशिक्षायाः एव प्रचार–प्रसारः कृतः। शिक्षायाः उद्देश्येषु, विधिषु, पाठ्यक्रमेषु संस्कृतस्य भारतीयस्य, भारतीयान्यभाषाणां च ह्रासः, तिरस्कारः वा प्राप्तः। ब्रिटिशकालीनशिक्षायाम् आंग्लशिक्षायाः निःशुल्कं व्यवस्था कृता। आंग्लनिष्ठानां विभिन्नविद्यालयानां, महाविद्यालयानां च स्थापना, संचालनं, वित्तपोषणं चादयः विषयाः सहर्षं स्वीकृताः। परं भारतीयशिक्षासंस्थानानां वित्तपोषण–समर्थनादयः पक्षाः क्रमशः अवहेलिताः। शनैः शनैः संस्कृतशिक्षायाः ब्रिटिशकाले अवनतिः एव दृष्टा। मिशनरीसंचालकानां विरोधः अपि प्रकटितः कश्चित्, यथा ईस्ट–इण्डियाकम्पनी संचालकैः अभिव्यक्तं यत् हिन्दुनां धार्मिक–नैतिकपद्धतयः इतरराष्ट्रेभ्यः अल्पमहत्त्वपूर्णाः न सन्ति। अतः (हिन्दुनां) धर्मपरिवर्तनं न करणीयं, एवम् प्रकारेण अन्यसंस्कृतीनां शिक्षापि न प्रदेया। तथापि आंग्लभाषायाः शिक्षायाः च प्रभावः भारतीयेषु कालानुक्रमेण अभवदेव। संस्कृतशिक्षायाः भारतीयशिक्षायाः च सन्दर्भे एका घटना 1813 वर्षस्य आज्ञापत्रमासीत्। अस्मिन् आज्ञापत्रे स्पष्टतया उल्लेखितम् आसीत् यत् साहित्यस्य पुनद्धाराय समुन्नतये च, भारतीयविदुषां प्रोत्साहनाय, भारते ब्रिटिशप्रदेशेषु निवासीनां हेतुः विज्ञानप्रसाराय, न्यूनातिन्यूनं लक्षैकरूप्यकाणि प्रतिवर्षं व्ययीकर्तव्यानि। परन्तु अत्र भारतीयसाहित्यं वा पाश्चात्त्यसाहित्यं वा, तथैव विदुषां, ज्ञानविज्ञानानां च विषयेषु स्पष्टतायाः अभवत्। अतः 'प्राच्य–पाश्चात्त्यविवादः' उत्पन्नः। संस्कृतशिक्षायाः भारतीयतानिष्ठायाः शिक्षायाः च स्पष्टविकासः अत्रापि न भूतः।

पुनश्च मैकाले–विवरणपत्रेण संस्कृतशिक्षायाः अवनतिः एव अभवत्। कारणं मैकालेन तत्कालीना शिक्षानीतिः इयं प्रतिपादिता–अस्माभिः (आंग्लजनैः) सत् प्रयत्नेन (भारते) ईदृशस्य वर्गस्य जनानां निर्माणं कर्तव्यं यः (वर्गः) अस्माकं तथा लक्षशः शासितजनानां

मध्ये सम्पर्कः जनरूपेण कार्यं सम्पादयेत्। अयं वर्गः बाह्यकारेण वर्णेन च भारतीयः प्रतीयते परं अस्य वर्गस्यजनाः रुच्या, विचारेण, चरित्रेण च आंग्लाः स्युः।' मैकालेशिक्षानीतौ स्पष्टतया संस्कृतशिक्षायाः अवहेलना प्रदर्शिता। परं संकीर्णमानसिकतया भारतीसाहित्यस्य अवमूल्यं स्वीकृत्य आंग्लसाहित्यस्यैव विकासस्य उपायाः तेन प्रतिपादिताः। अनेन प्रकारेण सः वदति स्म– यूरोपीयस्य एकस्य सुपुस्तकालयस्य वस्तुधानी भारत–अरबदेशयोः समग्रेभ्यः साहित्येभ्यः न्यूनं महत्त्वं न विभर्ति। अतः क्रमशः ब्रिटिशकाले संस्कृतस्य मात्रात्मकः गुणात्मकः च ह्रासः एव परिलक्षितः इति। पुनः वुडघोषणापत्रेण आग्लभाषायाः साहित्यस्य च विकासः एव अभवत्। संस्कृत शिक्षायाः तु किंचित् एव अवस्थितिः आसीत्। ब्रिटिशकालिकसंस्कृतशिक्षायाः विकासः विशेषरूपेण द्वयोः महाविद्यालयोः स्थापना संस्कृतशिक्षायाः उच्चस्तरे विकासः दृष्टः। प्राथमिक–माध्यमिकस्तरयोः गुणात्मक–सकारात्मकप्रयासानाम् अभावने उच्चस्तरीयप्रयासाः अपि पर्याप्ताः नासन्। मुख्यतया निम्नस्य महाविद्यालयद्वयस्य स्थापनया संस्कृतशिक्षायाः विकासः आधारितः –

(1) **बनारस–संस्कृत–महाविद्यालयः** – 1791 तमे वर्षे जोनाथन डंकनमहोदयस्य व्यक्तिगतप्रयासेन अस्य महाविद्यालयस्य स्थापना अभवत्। अस्यां संस्थायां मनुस्मृति–केन्द्रितशिक्षायाः अनुरूपेण शिक्षा प्रदीयते स्म। यथा– हिन्दुधर्मसिद्धान्तानां, न्यायस्य, विधेः, गणितेतिहासयोः तर्कशास्त्र–दर्शनशास्त्रयोः च शिक्षा अत्र प्रतीयते स्म। अत्र संस्कृतशिक्षायाः प्रचारः अपि भारतीय–पाश्चात्त्यानां कृते अभवत्। विशेषरूपेण हिन्दुनवयुवकानां कृते महाविद्यालयोऽयं स्थापितः।

(2) **पूना–संस्कृत–महाविद्यालयः** – 1821 तमे वर्षे 'पूना प्रेसीडेन्सी' इत्यस्य–गवर्नर एल्फिन्स्टनद्वारा दाक्षिणात्य– ब्राह्मणानां सन्तुष्टये अयः महाविद्यालयः स्थापितः। पेशवागणानां प्रतिवर्षं दीयमानस्य अनुदानस्य अंशद्वारा अस्यः संचालनं क्रियते स्म, यतः प्रभावशालिब्राह्मणाः राज्यान्ते सति असन्तुष्टाः न स्युः। इतोऽपि भारतीयेतिहासे संस्कृतशिक्षायाः विकासार्थं नगण्यप्रयासाः एव विहिताः। तथा संस्कृतशिक्षा न विकसिता, यथा भारतीयसमाजे सा प्राक्तनकालात् आसीत् एवं भारतीयजनैः यादृशी शिक्षा वांछनीया आसीत्। निष्कर्षतः ब्रिटिशकाले भारतीयशिक्षायाः संस्कृतशिक्षायाः अवनतिः एव दृष्टा।

## 1.3.5 स्वातन्त्र्योत्तरकाले संस्कृतशिक्षणम्

स्वतन्त्रतायाः पश्चात् भारतीयाः स्वशिक्षायाः व्यवस्थां प्रति उत्सुकाः आशान्विताः चासन्। भारतीयजनमानसेषु संस्कृतं प्रति विशिष्टा अभिवृत्तिः आसीत्। प्रायः संस्कृतं केन विधिना भारतीयशिक्षायाः पाठ्यक्रमेषु समाविष्टं भवितुम् अर्हति– अस्मिन् विषये कालक्रमेण संस्थापितैः विभिन्नायोगैः समितिभिः च संस्तुतयः प्रदत्ताः। विश्वविद्यालयायोग–माध्यमिकशिक्षायोगाः, राष्ट्रियशिक्षानीतिद्वयं, उत्तरप्रतिवदे नानि च, क्वचित् किंचित् संस्कृतं प्रति सकारात्मकं प्रत्यक्षाप्रत्यक्षरूपेण प्रतिपादनम् अकुर्वन्। तथापि संस्कृतायोगस्य भूमिका सर्वोपरि अस्ति। स्वातन्त्र्योत्तरकाले आचार्याणां सम्मेलनम् आयोजितम्। हुमायुँकबीरमहोदयानाम् आध्यक्ष्येण 30 सितम्बर–1 अक्टुबर, 1955 पर्यन्तं दिनद्वयात्मके

सम्मेलने संस्कृतस्य आचार्याः समुपविष्टाः। अस्मिन् सम्मेलने संस्कृताधिगमस्य परिस्काराय महत्त्वपूर्णाः परामर्शाः प्रदत्ताः। संस्कृतशिक्षायाः पाठ्यक्रमस्य शीघ्रातिशीघ्रेन गुणात्मकं परिवर्तनम् अनिवार्यं मतम्। पुनर्संरचितपाठ्यचर्यायां संस्कृतशिक्षायाः विकासस्य सम्भावना प्रस्तुता। सर्वप्रथमं विचारणीयम् इदं यत् संस्कृतशिक्षायाः इतिहासः किमर्थम् आवश्यकम् इति। विशेषतः संस्कृतस्य कानिचन् तत्त्वानि सन्ति यानि कालक्रमेण भारतीयजनैः तिरस्कृतानि, क्वचित् विस्मृतानि इति। विगतेभ्यः पंचसहस्रवर्षेभ्यः संस्कृतं भारतीयानां भाषा परिवर्तनानां वर्तते, क्वचित् एतस्या भाषायाः एतानि तत्त्वानि विस्मृतगौरवस्य पुनर्स्थापनायाः कारणानि स्युः –

### शास्त्रीयसाहित्यस्य दीर्घतमा परम्परा

- अतुल्यः शब्दकोषः
- विचाराणाम् आदर्शाणां च विधिः
- पूर्णतः जीवनमूल्याश्रिता भाषा
- ज्ञानविज्ञानानां विस्तृताः शाखाः
- महत्त्वपूर्णानि सांस्कृतिकतत्त्वानि
- व्याकरणगतसंरचनायाः वैज्ञानिकाभिकल्पनम्।
- देवनागरीलिप्याः प्रयोगः
- भाषायाः प्रयोगेषु नमनीयता, विविधता च
- प्रकृत्या पंथनिरपेक्षिता भाषा
- नवीनवैज्ञानिकप्रयोगेभ्यः आत्मीकरणीया भाषा
- बृहती ऐतिहासिकपरम्परा
- सभ्यतायाः बहुप्रकारिता
- आध्यात्मिकता जीवनव्यावहारिकता च।

एतैः तत्त्वैः संस्कृतशिक्षा भाषा च महत्त्वपूर्णे मन्तव्ये इति विचार्य सम्प्रति संस्कृतशिक्षायाः ऐतिहासिकं समालोचनं करणीयम्। संस्कृतशिक्षायाः वर्तमानपरिदृश्यमपि विचारणीयम्। पूर्वप्राथमिकशिक्षातः उच्चशिक्षापर्यन्तं संस्कृतशिक्षायाः व्याप्तिः विवेचनीयात्र। अतः एते बिन्दवः ध्यातव्याः –

- निम्नप्राथमिककक्षासु संस्कृतं पाठ्यते। प्रायः केषुचित् उत्तरभारतीयप्रान्तेषु तृतीयकक्षातः संस्कृतशिक्षणं प्रारम्भते।
- त्रिभाषासूत्रानुसारेण षष्ठकक्षातः दशकक्षापर्यन्तं संस्कृतशिक्षणं मातृ–द्वितीयभाषाभ्याम्। सह तृतीयभाषा रूपेण पाठ्यते।
- माध्यमिकउच्चमाध्यमिकस्तरयोः संस्कृतं क्वचित् अनिवार्यरूपेण, अधिकांशतया वैकल्पिकरूपेण स्वीक्रियते।

- परम्परागतविद्यालयशिक्षायां पाठ्यचर्यायां वा संस्कृतविषयत्त्वेन सह माध्यमरूपेण अपि अंगीक्रियते।
- परम्परागतायां वर्तमानसंस्कृतशिक्षायां परम्परागतविषयाणां प्राचुर्यं दृश्यते, यथा – व्याकरणं, साहित्यं, पौरहित्यकर्मः, ज्योतिषादयः विषादयः विषयाः।
- उच्चशिक्षास्तरेषु संस्कृतं विश्वविद्यालयसंस्कृतविभागेषु, महाविद्यालयेषु, संस्कृतविश्वविद्यालयेषु च समुपलभ्यते।
- संस्कृतशिक्षायां समुचितानि शोधकार्याणि अपि विधीयन्ते शोधकर्तृभिः, एतदर्थं वर्तमाने संस्कृत–शिक्षायां नवीनज्ञानस्य प्राप्तिः अपि दृश्यते।
- संस्कृतशिक्षायाः उच्चस्तरे बहुशास्त्रीयम्, अन्तर्शास्त्रीयम् अनुसंधानमपि अंगीक्रियमाणं वर्तते। अनेन कारणेन संस्कृतशिक्षा अन्यविषयैः सह वर्तमाने भारतीयविद्यार्थिभिः विद्वद्भिः वा स्वीक्रियते। यथा– संगणकशास्त्रे, भाषाविज्ञाने, मनोविज्ञाने, चादिषु विषयेषु।

## 1.3.6 त्रिभाषासूत्रम्

आयोगस्य सदस्याः एतत् परिलक्षितवन्तः यद् आधुनिककाले भारते त्रिभाषासूत्रस्य चर्चा सर्वत्र प्रचलति। परं संस्कृतस्य पठनं पाठनम् अनिवार्यविषयरूपेण भवेत् अस्मिन् विषये काऽपि चेष्टा नाभूत्। भारतीयसंविधाने हिन्दीभाषा राष्ट्रभाषा स्वीकृता। प्रदेशान् अयम् आदेशः प्रेषितः यत् अस्याः भाषायाः प्रयोगं कुर्युः। एतन्तु आवश्यकं यत् समस्तभारतराष्ट्रस्य छात्राः हिन्दीभाषायाः ज्ञानं प्राप्नुयुः। अस्यां व्यवस्थायां प्रचलनाय– मातृभाषायाः, गणितस्य, इतिहासभूगोलनागरिकशास्त्राणां विज्ञानस्य च कालखण्डानां निरसनं सम्भवं नासीत्। अतः हिन्दीभाषायाः विकासाय संस्कृतस्य अन्तरं समयचक्रात् निष्कासितम्। त्रिभाषासूत्रविषयकं विभिन्नयाजे नाममुल्लेखः अत्र क्रियते – प्रथमयोजना

1. प्रथम योजना
   - (क) मातृभाषा (अथवा क्षेत्रीयभाषा)
   - (ख) आङ्ग्लभाषा
   - (ग) संस्कृतभाषा
2. द्वितीययोजना
   - (क) मातृभाषा (अथवा क्षेत्रीयभाषा)
   - (ख) आङ्ग्लभाषा
   - (ग) हिन्दीभाषा (अथवा अन्या भारतीयभाषा)
   - (घ) संस्कृतभाषा
3. तृतीययोजना

   तृतीययोजना द्वितीययोजनाया अनुरूपमेव अस्ति। परमस्यां योजनायां संस्कृतस्य परीक्षा न भवेत् यथा च तस्य परीक्षाफलस्याऽपि प्रभावः न भवेत् किन्तु विशेषयोग्यतां

प्रति छात्रवृत्तिनिर्धारणे आधारो भवेत्। आयोगः इमां योजनां न स्वीकृतवान् यतो हि अनया योजनया संस्कृतम् उपेक्षितं भविष्यति।

4. चतुर्थयोजना

संस्कृतस्य पाठ्यक्रमं मातृभाषायाः पाठ्यक्रमेण सह संयुक्तरूपेण अनिवार्यरूपेण वा पाठितव्यम्। उत्तरोत्तरकक्षासु संस्कृतं प्रति अधिकम् अवधानं दातव्यं तथा च अस्यां भाषायाम् उत्तीर्णता अपि अनिवार्या भवेत्।

संस्कृतायोगस्य प्रतिवेदने त्रिभाषासूत्रस्य स्थाने चतुर्भाषासूत्रं पाठयितुं भारतसर्वकाराय परामर्शम् अददात्। अतः संक्षेपतः वयं वक्तुं शक्नुमः यत् संस्कृतायोगस्य संस्तुत्यानुसारं त्रिभाषासूत्रस्य स्थाने चतुःभाषासूत्रस्य कार्यान्वयनं कर्त्तव्यम्। तत्र

(क) मातृभाषायाः शिक्षणम्

(ख) हिन्दीभाषायाः शिक्षणम्

(ग) आङ्ग्लभाषायाः शिक्षणम्

(घ) संस्कृतभाषायाः शिक्षणम् यदि भवेत् तदा न अत्र काऽपि हानिः। यतोहि फ्रान्स, जर्मनादिपाश्चात्त्यदेशेषु चतुर्भाषापठनस्य व्यवस्था भवति। यदि अस्माकं देशे चतुर्भाषासूत्रं कार्यान्वितं भवेत् तर्हि– मातृभाषायाः हिन्दीभाषायाः ज्ञाने वृद्धिर्भविष्यति तथा च उभयोः भाषयोः व्याकरणज्ञाने शब्दज्ञाने साहित्यज्ञाने च वृद्धिर्भवितुमर्हति।

**अपनी प्रगति जांचिए**

3. वेदस्य व्याख्यानभूतानां कति अङ्गानां च गणना भवति?

| | |
|---|---|
| (क) षड् | (ख) सप्तम् |
| (ग) अष्टम् | (घ) नवम् |

4. संस्कृतभाषा किम् कथ्यते?

| | |
|---|---|
| (क) राजभाषा | (ख) मातृभाषा |
| (ग) राष्ट्रभाषा | (घ) देवभाषा |

## 1.4 भारतीयपाश्चात्त्यविदुषां भाषाशिक्षणसम्बद्धविचाराः

अत्र भारतीयपाश्चात्त्यविदुषां भाषाशिक्षणसम्बद्धविचाराः प्रतिपादयन्ते।

### 1.4.1 भारतीयाः – याज्ञवल्क्यः, पाणिनिः, भर्तृहरिः, पतञ्जलिः

स्मृतिसाहित्यकाराः स्मृतिग्रन्थानां रचनाम् अकुर्वन्। स्मृतिकाले मन्वादिप्रणीतानां समेषामपि धर्मशास्त्राणां प्रामाण्यमङ्गीक्रियते न कस्याप्यप्रामाण्यमिति महती गौरवावहेयं भारतीयपरम्परा। तेषु धर्मशास्त्रग्रन्थेषु मनुस्मृतिः यथा सर्वमान्या तथैव सर्वप्राचीना। योगीश्वरेण धर्मशास्त्रकाराणां नामानि व्याहरता मनुः सर्वप्रथमं प्रदर्शितः। सर्वैः स्मृतिकारैरपि मनुः साक्षाद् वेदद्रष्टत्वात् सर्वज्ञत्वाच्च प्रथमधर्मशास्त्रकाररूपेणोद्घोषितः। मनुविरोधिस्मृतेः प्रामाण्यमपि न स्वीक्रियते।

तत्र स्मृतिग्रन्थेषु मनु – याज्ञवल्क्य – पराशर – नारद –बृहस्पति कात्यायन– अङ्गिरो – कार्णाजिनि– दक्ष– पितामह– ऋष्यशृङ्ग – पुलस्त्य – प्रजापति – मरीचि – यम– लौगाक्षि– विश्वामित्र – व्यास–संवर्त–शङ्ख – लिखित काश्यप – व्याघ्रपाद – कपिल – भारद्वाज – जमदग्नि – गार्ग्य – हारीतादीनां स्मृतयः प्रसिद्धाः। केचिदपि स्मृत्युपस्मृतिभेदेनाधिकमपि विवृण्वन्ति। एतेषां कालस्तु परस्परमुदाहरतां धर्मशास्त्राणां पौर्वापर्यपरिज्ञानादाकलनीयम्। भारतीयसमाजस्य व्यवस्थितरूपेण परिचालनमेव स्मृतिकाराणां प्रधानं कर्मासीत्। भारतीयसमाजस्य सुव्यवस्था तथा संघटनमेवास्य मूललक्ष्यमासीत्।

**याज्ञवल्क्यः**

**याज्ञवल्क्यं महाप्राज्ञम् आदित्यात् प्राप्तविद्यकम्।**
**यजुर्वेदस्य द्रष्टारं वन्देहं गुरुपुङ्गवम्।।**

याज्ञवल्क्यः मिथिलावासी आसीत्। मिथिलादेशाधीश्वरस्य महाराज्ञो जनकस्य राजसभायामस्य विशेषसमादरः आसीत्। अनेन याज्ञवल्क्येन व्यासदेवस्य चतुर्भ्यः शिष्येभ्यः वेदचतुष्ट्यस्य अध्ययनं कृतम्। निजमातुलाद् वैशम्पायनादयं यजुर्वेदस्य अध्ययनं कृतवान्। शतपथब्राह्मणस्य प्रामाण्यस्य उपरि अनेनोद्दालक–आरुणिनामकेन प्रौढदार्शनिकेन वेदान्तस्य परिशीलनं कृतम्। वेदान्तस्य प्रशंसायाम् एकदाऽरुणिरमुमवोचत् – वेदान्तशक्तया अभिमन्त्रितजलेन यदि स्थाणुरपि सिञ्चेत्, तर्हि तस्मादपि पत्रपुष्पाणि च निःसरेयुः इति। ततः सुयोग्यशिष्येण याज्ञवल्क्येन गुरोः कथनमिदमक्षरशः सत्यं प्रमाणीकृतम्।

जनकमहाराजः किञ्चन महद् ज्ञानसत्रम् आयोजितवान् आसीत्। तत्र उद्देशद्वयम् आसीत्। विभिन्नदिग्भ्यः आगताः विद्वांसः ऋषयः परस्परविचारविनिमयेन वैदिकविचाराणां प्रचारं कुर्युः इति। आगतेषु अत्युत्तमज्ञानी योग्यरीत्या सत्कृतः स्यात् इति च। तद्दिने बहवः ज्ञानिनः सम्मिलिताः। तत्र जनकेन घोषितं – ''अत्र यः अस्ति ब्रह्मज्ञानी सः अत्र आगत्य सर्वज्ञकिरीटधारणेन सम्माननं प्राप्य गोष्ठे बद्धाः सुवर्णनाणकहारैः अलङ्कृतशृङ्गाः सहस्र धेनवः स्वायत्तीकुर्यात्'' इति। तदा विद्वत्सभातः सिंहगाम्भीर्येण उत्थाय आगतः याज्ञवल्क्यः शिष्यम् अवदत् – ''सामश्रव ! गोसमूहः आश्रमं प्रति नीयताम्'' इति। तस्य ध्वनिः आत्वविश्वासपूर्णः आसीत्। भीतिः अहङ्कारः वा लेशमात्रेण अपि नासीत्। ततः बहुभिः पृष्टानां विविधप्रश्नानां कृते समुचितम् उत्तरं तेन दत्तम्। तस्मात् सर्वे समाहिताः जाताः। सः सर्वज्ञकिरीटधारणेन सम्मानितः जातः।

**पाणिनिः**

पाणिनिः संस्कृतभाषाया महान् वैय्याकरणः। तेन लिखितः अष्टाध्यायीनामको व्याकरणग्रन्थो विश्वप्रसिद्धो वर्तते।

संस्कृतभाषायाः प्राचीनाः वैयाकरणाः नामभिः स्तूयन्ते यथा–

**इन्द्रश्चन्द्रः काशकृत्स्नाऽपिशलाः शाकटायनः।**
**पाणिन्यमरजैनेन्द्रा इत्यष्टौ शाब्दिका मताः।।**
**पाणिनेः मूर्तिः इत्यष्टसु शाब्दिकेषु अष्टम एव पाणिनिः वर्तते।**

स्वतः पूर्वान् वैयाकरणान् पाणिनिः स्वस्य 'अष्टाध्यायी' इत्येतस्मिन् ग्रन्थे अन्यान्यव्याकरणप्रक्रियानिरूपणसूत्रेषु स्मरति, यथा– ''ऋतो भारद्वाजस्य'' 7/2/63, ''लोपः शाकल्यस्य'' 8/3/19, ''त्रिप्रभृतिषु शाकटायनस्य'' 8/4/50, ''वा सुप्यापिशलेः'' 6/1/92 इत्यादि।

पतञ्जलिश्च रुद्घोषयतिः "प्रमाणभूत, आचार्यो दर्भपवित्रपाणिः शुचावकाशे परं महताम् प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितं– पुनरियता सूत्रेण–48, पाणिनीये हि व्याकरणे नैकोऽपि वर्णो निष्प्रयोजनः कुतः सूत्रमिति। पुनरग्रे कथयति– "सामर्थ्ययोगान्न हि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्।" –'पाणिनीयं महत् सुविहितम्'।

जयादित्यो हि कथयति – महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य (4/2/74)। अङ्गनन्दन (इङ्ग्लैण्ड) वास्तव्यो मोनियर विलियम्स महाशयः कथयति संस्कृतव्याकरणं हि तन्मानवमस्तिष्कप्रतिभाया अद्भुततममुत्पादनं यन्न कोऽपि देशोऽद्यावधि प्रस्तोतुमशक्त्। शार्मण्यदेशोद्भवो मोक्षमूलर उद्घोषयति– भारतीयार्याणां व्याकरणान्वययोग्यतो जगति कस्या अपि जातेः व्याकरणं साहित्यापेक्षया समुन्नतरमस्ति।'

कोलब्रुकमहोदयः कथयति–

"व्याकरणस्य नियमा, नितान्तसावधानतया प्रणीता आसन्, तेषां प्रतिपादन–रीतिश्चात्यन्तप्रतिभापूर्णाऽऽसीत्।

हण्टरमहाशयस्य मते – 'जगति यानि खलु व्याकरणानि सन्ति, तेषु पाणिनीयं हि व्याकरणमुत्कृष्टतमम्। तस्य वर्णशुद्धता, भाषाया धात्वन्वयसिद्धान्तः प्रयोगविधयश्च अद्वितीया अपूर्वाश्च। इदं हि मानवमस्तिष्कस्य नितान्तमहत्त्वशाली आविष्कारः। शेरवात्सकी महाशयमते–

'पाणिनीयं हि व्याकरणं मानवप्रतिभायाः सर्वोत्कृष्टरचनास्वन्यतमम्। (युधिष्ठिरम–हाभागस्य संस्कृतव्याकरणशास्त्रेतिहासतः साभारम्) पाणिनीयं हि व्याकरणमकालकमुच्यते। कालविषयपरिभाषाशून्यत्वादिदं हि। तथा मतम्। तस्य शास्त्रं हि कालोपसर्जने च तुल्यमितिं। सूत्राणां लघूकरणमेव पाणिनेर्महद्वैशिष्ट्यम्। सुमहद्व्याकरणशास्त्रस्य लघुभिः सूत्रैः समग्रव्याख्यानमेवास्योल्लेखनीयोपलब्धिः। सूत्राणां सुबोध्यता विषयस्य क्रमबद्धता प्रस्तुतीकरणस्य वैज्ञानिकता, सम्पूर्णता चास्य विशेषतास्वन्यतमाः। अत्रावलम्बिताः प्रत्याहारव्यवस्था, संज्ञाव्यवस्था, अनुवृत्तिव्यवस्था, विषयस्य यथासम्भव। सामान्यीकरण–व्यवस्था च पाणिनीयसूत्राणां महनीयताप्रतिपादकाः।

पाणिनिः भगवान् व्याकरणशास्त्रस्य केन्द्रबिन्दुर्मतः। यद्यपि तत्पूर्वमपि दश पाणिनिस्मृता दश अनपेक्षिताः षोडशेति षड्विंशतिराचार्याः सन्त्येव व्याकरणशास्त्रप्रवक्तारस्तथाऽपि भगवतः पाणिनेः व्याकरणशास्त्रकेन्द्रबिन्दुत्वं विलेंसत्येव तदुपस्थापनप्रावीण्येन। पाणिनिह भगवान् सर्वाणि प्रचलितव्याकरणशास्त्राणि समालोच्य विशदमपि शब्दप्रयोगविषयमुपसमाहृत्य व्याकरणसूत्राणि प्रणिनायं यत्र निखिलमेव सप्रपञ्चं शब्दानुशासनमात्मसाभूतमस्ति। तस्यः हि व्याकरणसंहिता अष्टाध्यायी नामा प्रसिद्धाऽस्ति। यद्यपि आपिशलव्याकरणं

टिप्पणी

पाणिनेरुपजीव्यमासीत् यथा हरदत्तः सङ्केतयति तथापि तस्य मौलिकत्वमक्षुण्णम–विहतञ्चास्त्येव।

चीनदेशतो बौद्धभिक्षुः 'ह्युन्शैङ्ग' भारतदेशमागतः, अपि च तेन व्याकरणं पठितमत्र, स अपि पाणिनेर्विषये कथितवान् यद्भारते सर्वे तस्यैव व्याकरणशास्त्रं पठन्तीति।

### भर्तृहरिः

भर्तृहरिः (Bharthruhari) संस्कृतभाषायाः परमः विद्वान् कविश्चासीत्। अर्वाचीनकोशे एवम् उल्लिखितम् अस्ति – भर्तृहरेः पिता वीरसेनः इति। अयं वीरसेनः कश्चन गन्धर्वः। तस्य चत्वारः पुत्राः – भर्तृहरिः, विक्रमादित्यः, सुभटवीर्यः, मैनावती च। जम्बूद्वीपस्य अधिपस्य एकमात्रपुत्री सुशीला एव भर्तृहरेः माता। अधिपस्य पुत्रसन्ततिः न आसीत् इत्यतः भर्तृहरेः कृते राज्यम् अयच्छत्। अयम् उज्जयिनीं राजधानीं कृत्वा राज्यशासनम् अकरोत्। ततः विक्रमादित्याय राज्यं दत्त्वा सुभटं सेनाधिकारिपदे नियोज्य निर्गतः इति। केषुचित् मराठिग्रन्थेषु भर्तृहरेः पिता गन्धर्वसेनः। तस्य चतस्रः पत्न्यः। गन्धर्वसेनस्य प्रथमः पुत्रः भर्तृहरिः। अत्रत्या शैली सुलभा, मञ्जुला, अर्थगौरवयुक्ता, आकर्षिका च वर्तते। संस्कृतस्य सामान्यज्ञानवन्तः अपि इदं पठित्वा अवगन्तुं शक्नुवन्ति। अत्र उपयुक्तं वृत्तं सुलभं लघु च विद्यते। अत्रत्याः उपमानोपमेयादयः स्वाभाविकाः इत्यतः पठितेषु नूतनभावोत्पादकाः सन्ति।

### पतञ्जलिः

माहेश्वरसम्प्रदायान्तर्गतं पाणिनीयं नव्यव्याकरणंत्रिमुनि–व्याकरणम् इत्युच्यते। त्रिषु मुनिषु अन्यतमः महामुनिः पतञ्जलिः अप्यन्यतमः इति जगतीतले को वा न विजानीते? भगवान् पतञ्जलिः पाणिनीयाष्टके महतीं व्याख्यां व्यलेखीत्। सेयं व्याख्या महाभाष्यम् इत्याख्या जगति प्रसिद्धाऽस्ति। एषः पतञ्जलिः विश्वविश्रुतः भाषाविदासीत्। महाभाष्यं व्याकरणसन्निभं कठिनं दुरूहञ्च विषयं सारल्येन ज्ञापयितुं समर्थः इत्यत्र सर्वेऽपि विद्वांसः एकमतयः। समस्ते वैयाकरणसमुदाये महाभाष्यं महताऽदरेण प्रामाणिकत्वेन च परिगण्यते। केचिद्वन्ति यत्पतञ्जलिरुपाधिरासीदिति, अपि चानेकाः पतञ्जलय आसन्, अस्य प्रमाणमिदं यद्महाभाष्यं शुङ्गकाले लिखितमासीत् किन्तु योगदर्शनस्तु भारतायुधात्पूर्वमासीत् तदैव व्यासेन भाष्यं रचितम्।

विशालकाये महाभाष्येऽपि भगवतः पतञ्जलेः इतिवृत्तम् ईषद् उपलभ्यते। अतः पतञ्जलेः देशविषये "इदम्–इत्थम्" इत्येवं वक्तुं न शक्यते। तथापि महाभाष्ये "विभाषा साकाङ्क्षा" इति सूत्रव्याख्यावसरे "अभिजानासि देवदत्त! कश्मीरान् गमिष्यामः तत्र सक्तून् पास्यामः" इत्युदाहरणबलेन इदं प्रतीयते यत् पतञ्जलेः जन्मभूः कश्मीरदेशः स्यादिति। महाभाष्यस्य उदाहरणैः इदमपि ज्ञायते यत् पतञ्जलिः आधिक्येन पाटलिपुत्रनगरे वासञ्चकार। ततश्च सः भारतस्य दक्षिणपूर्वदिग्भागे महाभाष्यस्य प्रचारप्रसाराय मथुरायां, वाराणस्यां, पाटलिपुत्रे, साकेते, कौशम्ब्यां च प्राचरत् इति प्राक्तनभारतीयैतिह्यानुशीलनेन ज्ञायते।

टिप्पणी

## 1.4.2 पाश्चात्त्याः – जीन प्याजे, लेव व्यगोत्सकी, ब्रूनर, नॉम चोम्स्की

### जीन प्याजे

जीन प्याजे (जॉ प्याजे) विकासात्मकमनोविज्ञानक्षेत्रे महान् विभूतिः अस्ति। अनेकशः पांडित्यपूर्ण अवधारणाय अस्माकं प्याजे महोदयस्य ऋणिः अस्ति। बालकानां निरिक्षणाय प्याजे विलक्षणः प्रतिभाः आसीत्। शिक्षायां प्याजे महोदयस्य अत्याधिक प्रभावं अस्ति। विशेष रूपेण आरंभिक एवं माध्यमिकं शिक्षायां। प्याजे शिक्षाणां त्रीणि सिद्धान्ताः प्रतिपादितं अकरोत्–

1. अन्वेषणं पद्धतेन अधिगमनम्
2. बालकानां शिक्षणस्य प्रति तत्परता संवेदनशीलता च
3. व्यक्तिगत भेदानां स्वीकारोक्ति

### लिव सिमनोविच वाइगोत्सकी

वाइगोत्सकी महोदयेन मनुष्यस्य सांस्कृतिकं एवं जैव सामाजिकविकासस्य सिद्धान्तं प्रतिपादितं। तस्य मुख्य कार्यक्षेत्रः विकास मनोविज्ञानः आसीत्। वाइगोत्स्कीस्य सामाजिक दृष्टिकोण संज्ञानात्मक विकासस्य एकः प्रगतिशील विश्लेषणं प्रस्तुतं करोति। वस्तुतः वाइगोत्सकी महोदयेन बालकस्य संज्ञानात्मक विकासे समाजे एवं तस्य सांस्कृतिक संबन्धानां मध्ये संवादे एकः महत्त्वपूर्णः आयामः घोषित अकरोत्।

वाइगोत्सकी महोदये अनुसारे बालकस्य संज्ञानात्मक विकासाय अधिगमनाय एकः विकासात्मक उपागमस्य आवश्यकता भवति। वाइगोत्सकी अनुसारे अधिगमः एवं विकासस्य पारस्परिक प्रक्रियायां बालकस्य सक्रियः भागीदारी भवति येषां भाषास्य संज्ञाने स्पष्टः प्रभावः भवति। अधिगमः च विकासः अन्तर्सम्बन्धितः प्रक्रियाः अस्ति यत् छात्रस्य जीवने प्रथमं दिवसे प्रारम्भं भवति।

### जेरोम ब्रूनर

ब्रूनर महोदयेन संज्ञात्मक विकासस्य मॉडलः प्रस्तुत् अकरोत्। तस्य अनुसारे, एतद् तत् मॉडलः अस्ति येषां द्वारा मनुष्यः स्व – वातावरणे सामंजस्य स्थापितः अकरोत्। ब्रूनर महोदयेन स्व – संज्ञान सम्बन्धी अध्ययन सर्वप्रथमं प्रौढ़ान् अकरोत्, तत्पश्चात् विद्यालयस्य बालकान्, तत् त्रिवर्षस्य बालकायां एवं नवजात शिशुनां अकरोत्।

प्रतिनिधित्वस्य ब्रूनरे सिद्धान्तायां महत्त्वपूर्णं स्थानं अस्ति। प्रतिनिधित्वः तस्य नियमानां व्यवस्था अस्ति येन माध्यमेन व्यक्तिः स्व–अनुभवां भविष्ये आगच्छतुं घटनाय संरक्षितं करोति। यः व्यक्ति विशेषाय तस्य संसारस्य/वातावरणस्य प्रतिनिधित्वं करोति।

प्रतिनिधित्वः त्रीणि प्रकाराणि शक्नोति – संक्रियात्मकं प्रतिनिधित्वं (Enactive Representation)– (Action-Based), दृश्यप्रतिमां प्रतिनिधित्वं (Iconic Representation (Image-Based) च प्रतीकात्मकं प्रतिनिधित्वं।

**नॉम चोम्स्की**

एवरम नोम चोम्स्की एकः प्रमुखः भाषावैज्ञानिकः, दार्शनिकः, राजनैतिकः लेखकः च अस्ति। चोम्सकी महोदयेन जेनेरेटिव ग्रामरस्य सिद्धांतस्य प्रतिपादकः एवं विंशति सदिस्य भाषाविज्ञाने सर्वाधिकं वृहद् योगदानकर्ताः मन्यते। शिक्षा क्षेत्रे तस्य महती योगदानं अस्ति।

**अपनी प्रगति जांचिए**

5. याज्ञवल्क्यः कुत्रवासी आसीत्?
   (क) विदर्भवासी   (ख) मिथिलावासी
   (ग) उज्जैनवासी   (घ) जनकपुरीवासी
6. आचार्य पाणिनिः कस्मिन् भाषायाः महान् वैय्याकरणः आसीत्?
   (क) संस्कृतभाषायाः   (ख) हिंदीभाषायाः
   (ग) अपभ्रंशभाषायाः   (घ) प्राकृतभाषायाः

## 1.5 संस्कृतप्रचाराय शासकीयाशासकीयप्रयत्नाः

संस्कृतम् जगतः एकतमा अतिप्राचीना समृद्धा शास्त्रीया च भाषा वर्तते। संस्कृतं भारतस्य जगतः वा भाषासु एकतमा प्राचीनतमा। भारती, सुरभारती, अमरभारती, अमरवाणी, सुरवाणी, गीर्वाणवाणी, गीर्वाणी, देववाणी, देवभाषा, संस्कृतवाक्, दैवीवाक्, इत्यादिभिः नामभिः एतद्भाषा प्रसिद्धाः। भारतीयभाषासु बाहुल्येन संस्कृतशब्दाः उपयुक्ताः। संस्कृतात् एव अधिकाः भारतीयभाषाः उद्भूताः। तावदेव भारत–यूरोपीय–भाषावर्गीयाः अनेकाः भाषाः संस्कृतप्रभावं संस्कृतशब्दप्राचुर्यं च प्रदर्शयन्ति।

व्याकरणेन सुसंस्कृता भाषा जनानां संस्कारप्रदायिनी भवति। पाणिनीयाष्टाध्यायी इति नाम्नि महर्षिपाणिनेः विरचना जगतः सर्वासां भाषाणां व्याकरणग्रन्थेषु अन्यतमा वैयाकरणानां भाषाविदां भाषाविज्ञानिनां च प्रेरणास्थानम् इवास्ति।

संस्कृतवाङ्गमयं विश्ववाङ्गमये अद्वितीयं स्थानम् अलङ्करोति। संस्कृतस्य प्राचीनतमग्रन्थाः वेदाः सन्ति। वेद–शास्त्र–पुराण–इतिहास–काव्य–नाटक–दर्शनादिभिः अनन्तवाङ्गमयरूपेण विलसन्ती अस्ति एषा देववाक्। न केवलं धर्म–अर्थ–काम–मोक्षात्मकाः चतुर्विधपुरुषार्थहेतुभूताः विषयाः अस्याः साहित्यस्य शोभां वर्धयन्ति अपितु धार्मिक–नैतिक–आध्यात्मिक–लौकिक–वैज्ञानिक–पारलौकिकविषयैः अपि सुसम्पन्ना इयं देववाणी।

संस्कृतभाषाया साहित्यमतीव सरसं वर्तते। तथा अस्या व्याकरणं नितान्तं व्यवस्थितम् अस्ति। संस्कृतसाहित्यं वैदिककालादारभ्य अद्यावधिपर्यन्तं सुललितं विराजते। वर्ण्यविषयाणां बाहुल्यात् अस्याः भाषायाः शब्दकोषः अतिविशालः। संस्कृतभाषाया भाषमाणाः ग्रामाः बहवः सन्ति। कर्णाटके मत्तूः, मध्यप्रदेशे झिरि इत्यादयः उदाहरणानि।

संस्कृतस्य सर्वतोमुखविकासं सम्पाद्य भारतस्य सर्वाङ्गीणोन्नतिसम्पादनमेव 'संस्कृतभारत्यः' चरमं लक्ष्यम्। दूरगामिलक्ष्यमिदं साकारीकर्तुम् अपेक्षितस्य देशव्यापिनः, विशालस्य, गुणसम्पन्नस्य, शक्तिशालिनः 'संस्कृतभारती'–नामकस्य जनसङ्घटनस्य निर्माणं समीपवर्तिलक्ष्यम् वर्तते। परं सङ्घटनस्य प्रत्येकं घटकस्य कृते तु लक्ष्यं भवति संस्कृतस्य विकासाय कार्यकरणं, राष्ट्रोन्नतिसम्बन्धिषु कार्येषु सहभागः चेति।

### 1.5.1 शासकीयाः – संस्कृतायोगौ, विश्वविद्यालयाः, संस्थानानि, अकादम्यः, निदेशालयाश्च

सर्वकारीयनीतिपरिवर्तनं तु बहुसमयसाध्यम्। शैक्षिकं चिन्तनं प्रयोगश्च प्रत्यक्षतः परोक्षतः वा अस्माकं संस्कृतज्ञानम् अधीनानि भवन्ति। अतः शैक्षिकपरिवर्तनं प्रारम्भबिन्दुः भवितुम् अर्हति। संस्कृत–शिक्षणे 'संस्कृतस्य शिक्षणं' भवेत्, न तु केवलं संस्कृतस्य विषये, वाङ्गमयसम्बन्धे वा। संस्कृतशिक्षणविधेः गुणवत्ता, पाठ्यपुस्तकानां गुणवत्ता, शिक्षकाणां गुणवत्ता इति त्रिषु अंशेषु गुणवर्धनाय प्रयत्नः भवेत्। संस्कृतस्य संस्कृतमाध्यमेन पाठनं भवेत्। संस्कृतशिक्षणे प्राचीनार्वाचीनयोः उभयोः अपि विषययोः सङ्गमः भवेत्। कक्ष्यासु संस्कृतभाषाशिक्षणं तावद् आकर्षकं करणीयं यद् सर्वे छात्राः संस्कृतमेव स्वीकुर्युः, तावद् प्रभावि करणीयं यद् सर्वे छात्राः संस्कृतेन भाषितुं लेखितुं च समर्थाः भवेयुः, तावद् प्रेरणादायि करणीयं यद् सहस्रशः छात्राः पश्चात् शास्त्राध्ययने प्रवृत्ताः भवेयुः।

संस्कृतभाषायाः कार्यसाधनार्थं कार्यकर्तारः अपेक्षिताः एव। ''सर्वे जनाः अधिकाधिकं समयं दद्युः, अधिकाः जनाः सर्वं समयं दद्युः।'' इति ज्येष्ठसोदराणां निर्देशानुसारं संस्कृतं उन्नतस्थानं नेतुं प्रतिगृहं प्रतिहृदयं च प्रापयितुम् अधिकाधिकाः युवानः पूर्णं समयं समर्पयेयुः। प्रत्येकं संस्कृतच्छात्रः स्वस्य अध्ययन कालानन्तरम्, उद्योगप्रवेशात् पूर्वम् न्यूनातिन्यूनम् एकं वर्षं संस्कृताय समर्पयेत्। वेतनेन विना, अन्यव्यक्तिगत–आकाङ्क्षा विना पूर्णसमर्पणभावेन भारते यत्र कुत्रापि सूचितं यत्किमपि संस्कृतकार्यं कर्तुम् अग्रे आगच्छेत्। यदि प्रत्येकं संस्कृतच्छात्रः एतादृशं स्वल्पं चेदपि महत्त्वभूतं त्यागं करोति तर्हि द्वित्रेषु वर्षेषु एव वयं महतीं सिद्धिं प्राप्तुं शक्नुयाम्। मित्राणि, संस्कृतमातुः सेवार्थं आत्मानं समर्पयामः। ''जयतु संस्कृतम् जयतु भारतम्।''

भारतसर्वकारः संस्कृतशिक्षायाः सम्यग् अभ्युदयाय 1956 तमेखिष्ट्राब्दे संस्कृतायोगः भारतमानवसंसाधनविभागस्य प्रयासेन डॉ. सुनीति कुमार चटर्जी महोदयस्य अध्यक्षतायाम् एकादशसदस्यीया संस्कृतायोगस्य संस्तुतिप्रभावेण भारतसवतकारेण 1970 तमस्यखिष्ट्राब्दस्य अक्टूबरमासस्य 15 ताररकायांराष्ट्रियसंस्कृतसंस्थानंसंस्थापितम्। एवं संस्कृतायोगस्य संस्तुतिप्रभावेण सम्पूर्णदेशे यथास्थितिःयथावसरं संस्कृतप्रचारे प्रसारे स्वीयं योगदानं प्रयच्छतयेव। तेषां प्रयासः संस्कृतशिक्षयाः सर्वांगीणविकासाय देशस्य विभिन्नभागेषु– संस्कृतविश्वविद्यालयः, विद्यापीठः, संस्थानम् आतयादीनां संस्थानानांसंस्थापितम्।

संस्कृतप्रचाराय शासकीयप्रयत्नेषुरानरियसंस्कृतसंस्थानस्य भूमिका सर्वकारदृष्ट्या संस्कृतप्रचारस्य प्रधानसंस्थारूपेण संस्थानस्य अधिकः प्रभावः अनुभूयते। संस्थानेन मुख्यदायित्वं अ़विवेच्यते। राष्ट्रियसंस्कृतसंस्थानं संस्कृते शास्त्रेषु च सम्भावितविचारेषु अध्यापनम् अनुसन्धानं च प्रोत्साहियतुं अनवरतं प्रयत्नमानम् अस्ति। संस्थानपरररसराः एते

अध्ययन–अध्यापनानुसन्धानानां केन्द्ररूपेण कार्यानुवर्तयन्ति। अतः राष्ट्रियसंस्कृतसंस्थानं स्वीयेभ्यः परिसरेभ्यः/प्राध्यापकेभ्यः परियोजनानां प्रकल्पनद्वारा अनसुन्धानं प्रोत्साहयति। तदङ्गतया संस्थानं प्रतिपरिसरं प्रतिवर्ष द्वित्रिणी महा/लघुपरियोजनाः परिकल्पयति।

मुक्स् तावत् मुक्त स्वाध्यायप्रणाल्याः अभिनवस्वरूपं भवति। मूकजालस्थानं सन्मतंविकसनशीलं सत् इति उच्च शिक्षा क्षेत्रे अध्ययनाय नवनवान् अवसरान् सृजति। अस्मिन् जालस्थाने संस्कृताध्ययन सामग्रीणां निर्माणाय सङ्घटितोपक्रमस्य न्यूनतामवगत्य राष्ट्रियसंस्कृतसंस्थानं तस्यां दिशि अपि आत्मानं व्यापारयित्।

मानवसंसाधनविकासमन्त्रालयेन केन्द्रसवतकारस्य कार्यातलयेषु राजभाषायाः (हिन्दीभाषायाः) समुिचतप्रयोगं प्रोत्साहितुंस्वीकृतोपक्रमस्य अनुसारेण संस्थानभिः अपि विभिन्नान कार्यक्रमान् अयोजयति। 'डेकनकालेज' संस्कृतशब्दकोशपरियोजना राष्ट्रियसंस्कृतसंस्थानस्य माध्यमेन मानवसंसाधनविकासमन्त्रालयेन प्रदत्तेन अनुदानेन 'डेकनकालेज पूणेस्थित संस्थायाः संस्कृत विभागः ऐतिहासिक–मूल्याधारित–संस्कृतविश्वकोष– परियोजनांसञ्चालयित्। 1948 तमेवर्षे समारब्धा विशिष्टा परियोजना। 1973 वर्षं यावत् 1,10,00,000 परिमतानि सन्दर्भस्रोतासि सङ्कलितानि। तदनुकोशसम्पादनकार्यं समारभ्य 2016 यावत् 10,00,000 सन्दर्भाणांसम्पादनंत्रिंशत् खण्डेषुसमजायत। परम्पराशास्त्रार्थविचारशीलं प्रशिक्षितुं, शास्त्रीयविचारचिन्तनधारां संरक्षितुं राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं यथासौक्युं किस्मिंश्चित् परिसरे अल्पावधिक शास्त्रार्थ प्रशिक्षणवर्गतः समायोज्यते। यत्र च साहित्य–व्याकरण–न्याय–मीमांसा–वेदान्त–ज्योतिषशास्त्रेषुशास्त्रार्थतस्य प्रशिक्षणं प्रदीयते। संस्थानस्य सर्वेषां परिसराणां चिन्ताः छात्राः वर्गेऽस्मिन् भागं वोढुम् अर्हन्ति। भारतस्य प्रथितः यशसः विद्वांसः वर्गेऽस्मिन् उपस्थाय छात्रान्बोधयन्ति। भारतशासन संसाधन विकासमन्त्रालयेन भारतीय–भाषासुविद्यमानस्य ज्ञानस्य प्रसाराय 'भारतवाणी' इति परियोजना समारब्धा। तस्याः जालपुटेराष्ट्रियसंस्कृतसंस्थानेसंस्कृतविषयकाः – ग्रन्थाः समावेशन्ते। भारतशासनेन 1956 तमे वर्षे संस्कृतवाङ्गमये अरेबिक भाषायां पारसी भाषायां च कृत भूरि परिश्रमाणां विदुषां राष्ट्रपति द्वारा अभिनन्दनाय सम्मानपत्रं इति योजना समारब्धा। 1996 तमे वर्षात् पालि/प्राकृतभाषायां कृत भूरिपरिश्रमाः अपि अनया योजनया सम्माननीयाः इति निर्णयः शासनेन कृतः।

## 1.5.2 अशासकीयाः – संघटनानि, संस्थाः, परिषदः, अन्ये प्रयत्नाश्च

सामाजिकस्तरेषुऽपि संस्कृतभाषासाहित्यप्रचारप्रसाराय बहुप्रयत्नाः क्रियमाणाः सन्ति। एतेषु प्रयत्नेषु सामाजिक चेतनायाः विकासेन सह जनसामान्यस्य भाषाः संस्कृतं भवेदिति धिया कार्याणि क्रियन्ते। भारते कानिचन् सङ्घटनानि सन्ति ये राष्ट्रियान्तर्राष्ट्रियस्तरेषु संस्कृताय स्वयोगदानं कुर्वन्ति। संस्कृतभारती, लोकभाषा प्रचारसमितिः, अमृत वाणीसेवासमितिः चेतयादिसंस्थाः अशासकीयरूपेण कार्याणि कुर्वन्ति। विशिष्ट्य संस्कृतभारतयाः कार्याणि प्रभावपूर्णानि सन्ति।

टिप्पणी

संस्कृतस्य सर्वतोमुखविकासं सम्पाद्य भारतस्य सर्वाङ्गीणोन्नतिसम्पादनमेव 'संस्कृतभारत्याः' चरमं लक्ष्यम्। दूरगामिलक्ष्यमिदं साकारीकर्तुम् अपेक्षितस्य देशव्यापिनः, विशालस्य, गुणसम्पन्नस्य, शक्तिशालिनः 'संस्कृतभारती'–नामकस्य जनसङ्घटनस्य निर्माणं समीपवर्तिलक्ष्यम् वर्तते। परं सङ्घटनस्य प्रत्येकं घटकस्य कृते तु लक्ष्यं भवति संस्कृतस्य विकासाय कार्यकरणं, राष्ट्रोन्नतिसम्बन्धिषु कार्येषु सहभागः चेति।

(1) **व्यावहारिकभाषारूपेण** : पुनरानयनमचतुःशतात् वर्षेभ्य : पूर्वं विश्वे 5000 भाषाः आसन्। इदानीम् उपद्विसहस्राः सन्ति। व्यवहारः परित्यक्तः इत्यतः 3000 भाषाः विनष्टाः। व्यवहारह्रासादेव सहस्राधिकाः भाषाः विनाशपथे सन्ति। 'संस्कृतभाषा नित्यव्यवहारस्य भाषा करणीया' इति।

(2) **शैक्षिकपरिवर्तनम्** : सर्वकारीयनीतिपरिवर्तनं तु बहुसमयसाध्यम्। शैक्षिकं चिन्तनं प्रयोगश्च प्रत्यक्षतः परोक्षतः वा अस्माकं संस्कृतज्ञानम् अधीनानि भवन्ति। अतः शैक्षिकपरिवर्तनं प्रारम्भबिन्दुः भवितुम् अर्हति। संस्कृत–शिक्षणे 'संस्कृतस्य शिक्षणं' भवेत्, न तु केवलं संस्कृतस्य विषये, वाङ्गमयसम्बन्धे वा। संस्कृतशिक्षणविधेः गुणवत्ता, पाठ्यपुस्तकानां गुणवत्ता, शिक्षकाणां गुणवत्ता इति त्रिषु अंशेषु गुणवर्धनाय प्रयत्नः भवेत्। संस्कृतस्य संस्कृतमाध्यमेन पाठनं भवेत्। संस्कृतशिक्षणे प्राचीनार्वाचीनयोः उभयोः अपि विषयोः सङ्गमः भवेत्। कक्ष्यासु संस्कृतभाषाशिक्षणं तावद् आकर्षकं करणीयं यद् सर्वे छात्राः संस्कृतमेव स्वीकुर्युः, तावद् प्रभावि करणीयं यद् सर्वे छात्राः संस्कृतेन भाषितुं लेखितुं च समर्थाः भवेयुः, तावद् प्रेरणादायि करणीयं यद् सहस्रशः छात्राः पश्चात् शास्त्राध्ययने प्रवृत्ताः भवेयुः।

(3) **स्वाध्ययनसामग्रीनिर्माणम्** : अभ्यासस्य पूरकरूपेण पुस्तकानि, ध्वनिमुद्रिकाः, 'डिविडि' इति त्रिविधाः सामग्र्यः अत्यन्तम् आवश्यकः। तासु अपि बहुवैविध्यानि भवेयुः। यथा– शिक्षार्थिनां वयसः अनुगुणं, शैक्षिकपृष्ठभूम्यानुसारं, वृत्त्यानुसारं, रुच्यानुसारं च विभिन्नानि पुस्तकानि भवितुम् अर्हन्ति। विभिन्नविषयाणां द्वारा शिक्षणाय बहुविधानि पुस्तकानि, भाषाशिक्षणस्य विभिन्नविधीनां द्वारा शिक्षणाय पुस्तकानि, संस्कृत–वाङ्गमयस्य विविधांशानां शिक्षणाय पुस्तकानि, व्याकरणस्य एकैकं प्रकरणम् अधिकृत्य पुस्तकानि – इत्येवंप्रकारेण सहस्राधिकविधपुस्तकानि भवितुम् अर्हन्ति। तावन्ति एव डिविडि, ध्वनिमुद्रिकाः च भवेयुः।

(4) **सान्ध्यशिक्षणकेन्द्राणि** : संस्कृताभिमानिनः संस्कृतपिपठिषवः समाजे असंख्याः सन्ति। स्थाने–स्थाने, नगरे–नगरे, ग्रामे–ग्रामे सान्ध्यशिक्षणकेन्द्रम् आरब्धम्। तत्र बहुविधाः कक्ष्याः भवन्ति – प्रारम्भिकाः कक्ष्याः, प्रगतपाठ्यक्रमाः, विविधविषयाणां शिक्षणकार्यक्रमाः चेति। स्वल्प–कालिकाः दीर्घकालिकाः च पाठाः।

(5) **शास्त्रशिक्षणम्** : संस्कृतभाषाध्ययनं नाम प्रथमसोपानम्। काव्याध्ययनं द्वितीयं सोपानम्। वास्तविकं संस्कृताध्ययनं नाम शास्त्राध्ययनम् एव। समग्र–संस्कृतवाङ्गमयस्य नवनीतभूतं तु शास्त्राणि। भारतीयं ज्ञानम् इति कथ्यमानं तत्रैव वर्तते। परन्तु अद्यत्वे शास्त्राध्येतारः विरलाः। सुष्ठु अध्यापयितारः तु विरलतराः। सा शास्त्रपरम्परा नष्टा चेद् भारतस्य सर्वस्वमपि नष्टमिव। अतः अस्माभिः

शास्त्राध्ययनसम्बन्धे विशेषचिन्तनं करणीयम्। सर्वेऽपि तदर्थं प्रेरणीयाः। केचन् प्रतिभावन्तः छात्राः एतदर्थं चेतव्याः, शास्त्राध्ययने योजनीयाः, अपेक्षितम् अर्थव्यवस्थादिकं कर्त्तव्यं च। शास्त्रपरिचायकशिविराणि, शास्त्रार्थचिन्तनगोष्ठ्यः, शास्त्रकक्ष्याः, शास्त्रपरीक्षाः इत्यादयः स्थाने–स्थाने आयोजनीयाः। प्रतिशास्त्रं व्युत्पन्नाः युवविद्वांसः निर्मातव्याः।

(6) **नवसाहित्यनिर्माणम्** : यथा जनाः गतसप्ताहस्य दिनपत्रिकां पठितुं न इच्छन्ति। अतः संस्कृते अपि अद्यतनजगतः सम्बद्धानां विषयाणां नवं साहित्यं स्रष्टव्यम्। तत्रापि बालसाहित्यं, मनोरञ्जनसाहित्यं, कथासाहित्यं, विज्ञानसाहित्यम् – इत्येवं साहित्यस्य विविधप्रकाराणां निर्माणं करणीयम्। सृष्टे नवसाहित्ये अद्यतनसन्निवेशाः, अद्यतनविषयाः, अद्यतननामानि, अद्यतनं जीवनम्, अद्यतन वैज्ञानिकी प्रगतिः इत्यादिकं प्रतिबिम्बितं स्यात्। अद्यत्वे विश्वे सर्वासु अपि भाषासु महोन्नतसाहित्येषु अपि सरलतमभाषायाः प्रयोगः, गद्यात्मकता इति एतद् अंशद्वयं प्रचारे अस्ति। तदुभयमेव जनैः इष्यते, तथैव लिख्यते च। अतः संस्कृते अपि वाचकरुच्यनुगुणं सरलतमसंस्कृतेन प्रणीतं गद्यात्मकम् अभिनवं साहित्यं स्रष्टव्यम्। एतस्मिन् कार्ये अनुवादः, अनुकरणं, सर्जनम् इति सोपानत्रयं भवितुम् अर्हति।

(7) **दूरस्थशिक्षणम्** : संस्कृतभारत्या द्वारा पत्राचारमाध्यमेन संस्कृतस्य पाठनस्य व्यवस्था कतिपयेषु राज्येषु अस्ति। यथा–यथा शक्तिः वर्धेत तथा–तथा सर्वेषु अपि राज्येषु एषा व्यवस्था आरब्धा भवितुम् अर्हति। पत्राचारमाध्यमेन बहूनां संस्कृतविषयाणां बहुविधपाठ्यक्रमाः भवितुम् अर्हन्ति। इण्टरनेट्माध्यमेन शिक्षणम, ''सेटलैट् चेनल' माध्यमेन संस्कृतशिक्षणम् इत्येतादृश्य कश्चन् महाव्यवस्था अपि करणीया।

**कार्यक्रमाः**

लक्ष्यसाधने कार्यक्रमाः साधनभूताः भवन्ति। कार्यक्रमः एव उद्देशः न, उद्देशार्थं कार्यक्रमः भवति। विचारप्रचारः, भाषाशिक्षणं, कार्यकर्तृनिर्माणं, धनसङ्ग्रहः, नूतनक्षेत्रप्रवेशः, उत्साहवर्धनं, सङ्घटनं, कार्यस्य दृढीकरणम् इत्यादीन् विविधान् उद्देशान् साधयितुं तदनुगुणं कार्यक्रमान् रूपयामः। स्थानीयस्तरे कर्तुं योग्याः कार्यक्रमाः, जिला–महानगर–विभाग–राज्यस्तरेषु कर्तुं योग्याः कार्यक्रमाः इति अत्र द्विधा दद्मः।

1. स्थानीयस्तरे
2. सम्भाषणशिविरम्
3. साप्ताहिकमेलनम्
4. संस्कृतदिवसः संस्कृतसप्ताहश्च
5. प्रतियोगिताः (स्पर्धाः)
6. संस्कृतबालकेन्द्रम्
7. सान्ध्यशिक्षणकेन्द्राणि
8. विविधजयन्त्यः / सामाजिकसमरसतादिनम्

टिप्पणी

9. पत्रालयमाध्यमेन संस्कृतशिक्षणम्
10. संस्कृतगृहम्
11. स्नेहमेलनम् / कौमुदीकार्यक्रमः
12. संस्कृतप्रवासः
13. संस्कृतसन्ध्या
14. प्रदर्शिनी
15. शोभायात्रा
16. वीथीनाटकम्
17. वीथीभाषणम्

    सम्भाषणशिविरप्रत्यक्षिकाणि– संस्कृतभारत्याः दशदिनसम्भाषणशिविरम् अधुना सम्पूर्णे भारते तथा प्रमुखविदेशेषु च विश्वविख्यातं जातम्। संस्कृतप्रेमिणः दशदिनेषु प्रतिदिनं होराद्वये संस्कृतसम्भाषणसामर्थं सम्पादयन्ति। अत्यन्तम् आनन्देन संस्कृतं पठितुं सरलः उपायः एषः। अत्र वयोमर्यादा कापि नास्ति। संस्कृतस्य पूर्वज्ञानस्यापि आवश्यकता अपि नास्ति। सम्भाषणशिविरस्य अन्तिमे दिने प्रत्येकं छात्रः नित्यजीवने सरलसंस्कृते सम्भाषितुं धैर्यं, प्रेरणां च प्राप्नोति। आगच्छन्तु सम्भाषणशिविरं प्रविशन्तु संस्कृतपठनस्य रुचिम् आस्वादयन्तु।

18. सन्देशाभियानम्
19. सम्पर्कसप्ताहः / सम्पर्कपक्षः
20. छात्रशिक्षणशिविरम्
21. स्वाध्यायशिविरम्
22. संस्कारशिविरम् / ग्रीष्मशिविरम्

संस्कृतभाषायाः संरक्षणार्थं एते कार्यक्रमाः आयोजनीयाः। ते क्रमशः भवन्ति।

1. अभ्यासवर्गः
2. भाषाबोधनवर्गः
3. शिक्षकप्रशिक्षणशिविरम्
4. व्याकरणशिविरम् / सिद्धान्तकौमुदीशिविरम्
5. संस्कृतगृहसम्मेलनम्
6. शिक्षकसम्मेलनम्
7. छात्रसम्मेलनम्
8. महिलासम्मेलनम्
9. शास्त्रगोष्ठी / शास्त्रशिविरम्
10. संस्कृतविज्ञानकार्यक्रमाः

11. शैक्षिककार्यशाला
12. नाटकोत्सवः
13. सम्भाषणोत्सवः / शिविराभियानम्

संस्कृतभाषायाः प्रचार–प्रसाराय सामाजिकाः प्रयासाः एव प्रधानाः। कारणं भाषा समाजस्य एव सम्पत्तिः। कस्मिञ्चित्समाजेव कस्यांश्चित्भाषायाः अस्तितवंतिष्ठित। भाषायाः भरण–पोषणं समाजः एव करोति। अतः समाजस्य असामाजिकाः प्रयासाः अपि संस्कृताय जीवनरक्षकाः इति। एतदर्थुं भारतीयजनसामान्यः साकम् अन्तर्राष्ट्रिय संस्थाभिः च अगणिताः महन्तः प्रयत्नाः विधीयमानाः सन्ति। एतेषुप्रयत्नेषु केचित् शिक्षिकाः केचित्सांस्कृतिकाः सन्ति। परं यथा संस्कृतस्यकायुं शक्यं तथा वैयक्तिकाः सामाजिकाः वा प्रयत्नाः अस्माभिः अवलोक्यन्ते। अत्र बिन्दुरूपेण के विशिष्टाः प्रयत्नाः प्रतिपाद्यन्ते–

1. शङ्कराचार्यतस्थापितानांमठानांमाध्यमेन संस्कृतप्रचाराः
2. भण्डारकर अनुसन्धानसंस्थानम्, मुक्तिबोध अनुसन्धानसंस्थानम्, अरविन्द अनुसन्धानकेन्द्रं च सदृशानांसंस्थानांसंस्कृतसाहित्य–धमत–दशतनादीनां–तत्त्वप्रकाशनम्।
3. लोकभाषाप्रचारसमितिद्वारा संस्कृतशिविराणि, लोकसंपर्ककार्यक्रमाः।
4. गूगल–माइक्रोसॉफ्ट आदिभिः प्रौद्योगिकीयाः प्रयासाः।
5. यू–ट्यूब–फेसबुक–ट्विटर आदिभिः आधुनिकसामाजिक संप्रेषण साधनः संस्कृतभाषा–साहित्ययोः लोकजागृतकार्यक्रमाः।
6. सांस्कृतिकलोकसंस्थाभिः सङ्गीतसंस्थाभिः संस्कृतगीत–सङ्गीतानां लोकप्रस्तुतः. यथा वा संस्कृतसङ्गीतसंस्था।
7. साधुमातादिपत्र–पत्रिकानां प्रकाशनम।

### संस्कृतभारत्याः

पाठयेम् संस्कृतं जगति सर्वमानवान्! प्राप्येम् भारतं सपदि परमवैभवम्!! अस्माकं कार्यम् संस्कृतभाषायाः पुनःजीवनम्, संस्कृतेः पुनरुत्थानम्, भारतस्य पुनर्निर्माणम्। संस्कृतभारती (या 1981 तमे वर्षे आरब्धा) कश्चन् उद्यमः यः निरन्तरं संस्कृतभाषायाः, साहित्यस्य, परम्परायाः, संस्कृते निहितज्ञानभण्डारस्य च संरक्षणं विकासं प्रचारं च करोति। संस्कृतभारती निष्ठावतां समर्पितानां कार्यकर्ता सङ्घटनं, ये विना लाभापेक्षां समाजे सर्वत्र जाति–धर्म–वर्ग–लिङ्गभेदान् परित्यज्य संस्कृतज्ञानं प्रसारयन्ति।

संस्कृतभारत्याः अखिलभारतीयः केन्द्रीयकार्यालयः नवदेहल्याम् अस्ति, तथैव स्थानीयाः कार्यालयाः राज्यराजधानीषु, जनपदकेन्द्रेषु वा सन्ति। संस्कृतपठनस्य प्रोत्साहनं समाजस्य सर्ववर्गेभ्यः संस्कृताध्ययनार्थम् अवसरप्रकल्पनम्। संस्कृतस्य प्रचाराय वैश्विकस्तरे संस्कृतसंस्थाभिः सह संयोजनम्।

संस्कृतपरम्परायाः संस्कृते निहितज्ञानस्य विषये च यथा योगः, मनोविज्ञानं, कला, सङ्गीतं, नृत्यम्, आयुर्वेदः इत्यादिशास्त्रेषु अनुसन्धानकार्याणां व्यवस्थापनं सहयोगो वा।

संस्कृतभाषायाः पारम्परिकशास्त्राणां संरक्षकेभ्यः प्रचारकेभ्यश्च सहयोगः, सहकारः, छात्रवृत्तिः, मानदेयम्, इत्यादीनाम् आलम्बनकार्याणां व्यवस्थापनम्। संस्कृते निहितज्ञानस्य संस्कृतविषयकसमाचारस्य सम्प्रेषणार्थं प्रचारार्थं च पुस्तकानां, पत्रिकाणां, वार्तापत्र–पत्रिकाणां च प्रकाशनम्।

संस्कृतभाषायाः शास्त्रपरम्परायाश्च प्रचारार्थम् अपेक्षितानाम् आर्थिकस्रोतसां निर्माणम्।

**अपनी प्रगति जांचिए**

7. संस्कृतस्य प्राचीनतमग्रन्थाः काः सन्ति?

   (क) आरण्यकाः (ख) वेदाङ्गाः

   (ग) वेदाः (घ) उपनिषदाः

8. धर्म–अर्थ–काम–मोक्षात्मकाः कतिविधः पुरुषार्थाः कथ्यते?

   (क) द्विविधः (ख) चतुर्विधः

   (ग) पञ्चविधः (घ) षड्विधः

## 1.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि

1. (क)
2. (ग)
3. (क)
4. (घ)
5. (ख)
6. (क)
7. (ग)
8. (ख)

## 1.7 सारांशः

परिष्कृतं, व्याकरणादिदोषरहितं यत् भाषा तत् संस्कृतम् अस्ति। इयं भाषा एवं देववाणी, सुरभारती, गीर्वाणवाणी इत्यादिकैः नामभिः व्यवह्रयते। संस्कृत भाषा संसारस्य सर्वासु भाषासु प्राचीनतमा, परिष्कृततमा च विद्यते। अस्याः भाषायाः साहित्यम् अपि सुविशालं, परमोन्नतं, विविध– ज्ञान–समन्वितं च अस्ति। भारतस्य प्राचीनाः ग्रन्थाः चत्वारः वेदाः संस्कृतभाषायां सन्ति। धर्मशास्त्राणि, अष्टादश–पुराणानि, अष्टादश स्मृतयः, षट् दर्शनानि च संस्कृत भाषायां एव लिखिताः सन्ति। सम्पूर्ण कर्मकाण्ड विभागः सम्पूर्ण च आयुर्वेद पद्धतिः, एते सर्वे ग्रन्थाः संस्कृतभाषायां एवं निबद्धाः सन्ति।

संस्कृतलेखनं पूर्वं ब्राह्मीलिप्या आसीत्। कालान्तरे एतस्य लेखनं देवनागरीलिप्या अभवत्। मूलतो यस्मिन् प्रदेशे या लिपिर्जनैर्मातृभाषां लेखितुमुपयुज्यते तस्मिन्प्रदेशे तया एव लिप्या संस्कृतमपि लिख्यते। पूर्वं सर्वत्र एवमेव आसीत्, अत एव प्राचीनाः हस्तलिखितग्रन्थाः अनेकासु लिपिषु लिखिताः सन्ति। अर्वाचीने काले तु संस्कृतग्रन्थानां मुद्रणं सामान्यतो देवनागरीलिप्या दृश्यते।

संस्कृते नाम दैवी वागन्वाख्याता महर्षिभिः। संस्कृतभाषैवास्ति विश्वस्य प्राचीनतमा भाषा। परिष्कृता व्याकरणादि दोषरहिता भाषा संस्कृत भाषैति कथ्यते। अपरंच सा सर्वासामपि भाषायां जननी। आसीदियम् पुरा भारतीयानाम् लोकप्रिया जनभाषा। ऋग्वेद संसारस्य प्रथमः ग्रन्थः इति सर्वे प्राच्यप्रतीच्यै पण्डितैश्च एकस्वरेण स्वीकृतम् स वेदः संस्कृतभाषामेव संशोभते। अतः सिद्धं तस्याः आदि भाषात्वम्। सर्वासां भारतीयभाषाणां इमं जननी वर्तते।

अतिव्यापकं च संस्कृतसाहित्यम्। इदं सर्वाङ्गपूर्णं यतोऽत्र मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारोऽपि पुरुषार्थाः विवेचिताः। धर्मशास्त्रं प्रथमं एव, अर्थशास्त्रमपि कौटिल्यादिप्रणीतमत्र न कुतोऽपि हीयते। कामशास्त्रमपि परमप्रसिद्धमत्रत्यम्, मोक्षशास्त्रस्यापि परमप्रकृष्टता तर्कसम्मता। एवं संस्कृते मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिता इति कथनं समुचितमेव। अत्र प्रेयः शास्त्रं श्रेयः शास्त्रं चोभयं समभावेन समेधितम्, अतएव चात्र भोगमोक्षयोरुभयोः सत्तया सकलसाहित्यापेक्षया विशिष्टता विद्यते।

स्मृतिसाहित्यकाराः स्मृतिग्रन्थानां रचनाम् अकुर्वन्। स्मृतिकाले मन्वादिप्रणीतानां सर्वेषामपि धर्मशास्त्राणां प्रामाण्यमङ्गीक्रियते न कस्याप्यप्रामाण्यमिति महती गौरवावहेयं भारतीयपरम्परा। तेषु धर्मशास्त्रग्रन्थेषु मनुस्मृतिः यथा सर्वमान्या तथैव सर्वप्राचीना। योगीश्वरेण धर्मशास्त्रकाराणां नामानि व्याहरता मनुः सर्वप्रथमं प्रदर्शितः। सर्वैः स्मृतिकारैरपि मनुः साक्षाद् वेदद्रष्टत्वात् सर्वज्ञत्वाच्च प्रथमधर्मशास्त्रकाररूपेणोद्घोषितः। मनुविरोधिस्मृतेः प्रामाण्यमपि न स्वीक्रियते।

संस्कृतम् जगतः एकतमा अतिप्राचीना समृद्धा शास्त्रीया च भाषा वर्तते। संस्कृतं भारतस्य जगतः वा भाषासु एकतमा प्राचीनतमा। भारती, सुरभारती, अमरभारती, अमरवाणी, सुरवाणी, गीर्वाणवाणी, गीर्वाणी, देववाणी, देवभाषा, संस्कृतवाक्, दैवीवाक्, इत्यादिभिः नामभिः एतद्भाषा प्रसिद्धाः। भारतीयभाषासु बाहुल्येन संस्कृतशब्दाः उपयुक्ताः। संस्कृतात् एव अधिकाः भारतीयभाषाः उद्भूताः। तावदेव भारत–यूरोपीय–भाषावर्गीयाः अनेकाः भाषाः संस्कृतप्रभावं संस्कृतशब्दप्राचुर्यं च प्रदर्शयन्ति।

संस्कृतभाषायाः प्रचार–प्रसाराय सामाजिकाः प्रयासाः एव प्रधानाः। कारणं भाषा समाजस्य एव सम्पत्तिः। किस्मिञ्चित्समाजेव कस्यश्चित्भाषायाः अस्तितवंतिष्ठित। भाषायाः भरण–पोषणं समाजः एव करोति। अतः समाजस्य असामाजिकाः प्रयासाः अपि संस्कृताय जीवनरक्षकाः इति। एतदर्थं भारतीयजनसामान्यः साकम् अन्तर्राष्ट्रियः संस्थाभिः च अगणिताः महन्तः प्रयत्नाः विधीयमानाः सन्ति। एतेषु प्रयत्नेषु केचित् शिक्षिकाः

केचित्सांस्कृतिकाः सन्ति। परं यथा संस्कृतस्यकायुं शक्यं तथा वैयक्तिकाः सामाजिकाः वा प्रयत्नाः अस्माभिः अवलोक्यन्ते।

## 1.8 मुख्यशब्दावलीः

- **सम्यक्** : अच्छी प्रकार से
- **परिष्कृतं** : शुद्ध रूप
- **प्राप्यन्ते** : प्राप्त करते हैं
- **मन्यते** : माना जाता है
- **वर्तते** : होता है
- **सिध्यति** : सिद्ध होता है
- **त्यक्त्वा** : त्यागकर
- **प्राप्तुं** : प्राप्त करके
- **प्रयुज्यते** : प्रयुक्त होता है।
- **यावत्** : जब तक

## 1.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च

### लघु–उत्तरीय प्रश्न

1. संस्कृतभाषायाः प्रकृत्याः संक्षिप्तरूपेण वर्णनं करोतु।
2. वैदिककाले च उत्तरवैदिककाले संस्कृतशिक्षणस्य तुलनात्मकं अध्ययनं प्रतिपादयतु।
3. संस्कृतभाषाप्रचाराय शासकीयाशासकीयाप्रयत्नाः संक्षिप्तरूपेण विवेचयतु।

### दीर्घ–उत्तरीय प्रश्न

1. अनुशासनात्मकदृष्टया संस्कृतभाषायाः महत्त्वं प्रतिपादयतु।
2. संस्कृतभाषायाः शिक्षणेतिहासः विवेचनं करोतु।
3. संस्कृत टिप्पणी लिखतु–

   (क) याज्ञवल्क्यः     (ख) पाणिनिः

   (ग) जीनप्याजे     (घ) ब्रूनर

## 1.10 सहायकपाठ्यसामग्री

**पाण्डेय, रामशकल (2003)** संस्कृत शिक्षण. आगराः विनोद पुस्तक मंदिर।

**शर्मा एवं सिंह (4996)** संस्कृतशिक्षणम् भारतमुद्रा, त्रिचूरः पुरनाट्टकरा।

**शर्मा, वि. मुरलीधर (2003)** संस्कृतशिक्षणसमस्याः. तिरुपतिः राष्ट्रिय संस्कृत विद्यापीठ

**संस्कृतभाषाशिक्षणम (2004)** भोपालः मध्यप्रदेश संस्कृत बोर्ड लोक शिक्षण संचालनालय, स्कूलशिक्षा विभाग, मध्यप्रदेश।

**साम्बशिवमूर्ति, कम्भम्पाटि, (2006)** संस्कृतशिक्षणम् जयपुरम् दीपशिखा प्रकाशन।

**सफाया, रघुनाथ (1997)** संस्कृतशिक्षण, चण्डीगढ़ः हरियाणा साहित्य अकादमी।

**विश्वासः (2004)** कौशलबौधिनी, नई दिल्लीः संस्कृत भारती, माता मंदिर गली, झण्डेवालान।

**व्यास, भोलाशंकर (1994)** संस्कृत भाषा. दिल्लीः चौखम्बा विद्याभवन, गोपाल मंदिर लेन, 39, यू ए. बंगलो रोड, जवाहरनगर।

**आप्टे, वामन शिवराम (2009)** संस्कृत हिन्दी शब्दकोश, दिल्लीः न्यू भारती बुक कारपोरेशन।

# एककः 2 संस्कृतशिक्षणस्य सिद्धान्ताः, उद्देश्यानि, उपागमाश्च



## संरचना

2.0 परिचयः
2.1 उद्देश्यानि
2.2 संस्कृतशिक्षणस्य सिद्धान्ताः
 2.2.1 स्वाभाविकता सिद्धान्तः
 2.2.2 अभिरुचिः सिद्धांतः
 2.2.3 अभ्यास स्वतन्त्रता च सिद्धान्तः
 2.2.4 अनुकरणं सिद्धांतः
 2.2.5 सक्रियताः सिद्धान्तः
2.3 विविधस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि
 2.3.1 प्राथमिक–माध्यमिक–उच्चमाध्यमिकस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि
 2.3.2 शिक्षणाय व्यावहारिकोद्देश्यानां लेखनम्
2.4 संस्कृतशिक्षणोपागमाः
 2.4.1 सम्प्रेषणात्मकोपागमः
 2.4.2 संरचनात्मकोपागमः
 2.4.3 निदानात्मकोपागमः
 2.4.4 उपचारात्मकोपागमः
 2.4.5 अभिक्रमितानुदेशनोपागमः
2.5 संस्कृतशिक्षणसूत्राणि उपकरणानि च
 2.5.1 शिक्षणसूत्राणि, श्रव्योपकरणानि, दृश्योपकरणानि, श्रव्य–दृश्योपकरणानि
2.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि
2.7 सारांशः
2.8 मुख्यशब्दावलीः
2.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च
2.10 सहायकपाठ्यसामग्री

## 2.0 परिचयः

**यस्याः प्रभावमतुलं भगवाननन्तो, ब्रह्माहरश्च नहि वक्तुमलं बलञ्च।**
**सा चण्डिकाऽखिलजगत्परिपालनाय, नाशाय चाशुभभयस्य मतिं करोतु।।**

वस्तुतः कस्यापि राष्ट्रस्य उन्नतौ तच्छिक्षणव्यवस्थैव हेतुभूता भवति। उत्तमशिक्षणव्यवस्था शिक्षितादीक्षिताश्च तत्रत्या नागरिकाः तद्राष्ट्रोन्नतौ समर्थाः भवन्ति एषैव भारतीया व्यवस्था भारतं विश्वगुरुपदे प्रतिष्ठापयत्।

भारतीयशिक्षणसंस्थानेषु भवन्ति अद्यत्वे अनेकानि शोधपरककार्याणि तद्विषयमेवाधारी कृत्य जाह्नवी अनवरतं प्रकटयति विदुषां तत्र भवतां पुरस्तात् स्वविचारान्। अद्यतनकाले संस्कृतविषयमधिकृत्य शोधनिबन्धाः प्रकाशपथमायान्ति तेषु गुणवत्ता स्थितेः मूल्यांकनमस्माभिः कर्त्तव्यमेव। संस्कृतजगति पुरातनविषयमेवादाय प्रायः शोधकार्याणि भवन्ति। नवीनविषया

प्रायः गौणीभूताः भवन्ति एतस्य कारणमिदमेव यत् प्रायः आधुनिकं कवीनां विदुषां लक्षणग्रन्थकाराणां वा पुरातनविषयस्य एव पिष्टपेषणं नूतनशैल्या शब्दान्तरैर्वा भवन्ति।

**टिप्पणी**

संस्कृतसाहित्यस्य शिक्षणशोधपरम्परा श्रमसाध्याऽस्ति। तत्राध्ययनाध्यापनव्यवस्था प्रायः विलुप्तैव। अतः तस्मिन् विषये अस्माभिः ध्यानावस्थितैः भाव्यम्। प्रेक्षागृहाणां निर्माणं, प्रेक्षागृहभेदाः, कस्मिन् स्थाने कीदृशं शिक्षागृहं स्यात् इत्यादि सर्वेऽपि अनुसन्धेयविषया अस्माभिर्द्रष्टव्या।

वैदिककाले आसीत् या शिक्षणव्यवस्था तदपेक्षया आधुनिकीयं शिक्षणव्यवस्था उत्कृष्टेति वदन्ति अर्वाचीनपण्डिताः किन्तु मिथ्येदम्। यतो हि तस्मिन् काले शिष्याणां गुरुं प्रति अनिर्वचनीया श्रद्धा तथा गुरुणां शिष्यान् प्रति आसीत् अतिशयप्रेम। उभावपि परस्परं सम्मिल्य शिक्षणव्यवस्थां सश्रद्धं सम्पादयत् स्म। वैदिकपरम्परा सुरक्षायै सर्वेऽपि प्राणपरेण यतमानाः आसन्। योग्यानां शिष्याणाम् एव यथोचिता नियुक्तिरासीत् गुरुकुलेषु। छलच्छद्महीनैः एभिः सरस्वती–समुपासकैः शिक्षणव्यवस्था आसीत् शिखरारूढा अतएव भारतं विश्वगुरुपदमलंकरोति स्म।

अद्य नियुक्तिप्रक्रियायां सम्बन्धविशेषस्य दृश्यते विशेष्यता। सम्बन्धसामान्यं विशेषणं भवति अतः ज्ञानसम्बन्धापेक्षया यत्र सम्बन्धमात्रस्योत्कृष्टता भवति तादृशे आधुनिकेऽस्मिन् काले कथं शिक्षणव्यवस्था उत्कृष्टेति मनः शङ्कापङ्कावलेपलेपितमस्ति। अतः तां शिखरारूढां वैदिकपरम्परां पुनरवाप्तुं यतमानैः सा जाह्नवी पत्रिका तत्र भवतां भवतां पुरस्तात् समुपस्थाप्य अमन्दमानन्दमनुभवामि यत्र ज्ञानसम्बन्ध एव भवति विशेषः।

**गलेभुजगसन्ततिः शिरशि यस्य बालोधुर्विभाति वरमस्तके सुरधुनी प्रवाहो महान्।**
**अशेषफलदायकः श्रुतिनुतः कुमारप्रियो ददातु मम वाञ्छितं फलमुदारचित्तः शिवः।।**

प्रस्तुते एकके संस्कृतशिक्षणस्य सिद्धान्ताः विविधस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि, संस्कृतशिक्षणोपागमाः, संस्कृतशिक्षणसूत्राणि उपकरणानि च प्रतिपादयन्ते।

## 2.1 उद्देश्यानि

इमम् एककं पठित्वा वयम्–

- संस्कृतशिक्षणस्य सिद्धान्ताः विषये ज्ञातुम् शक्नुमः;
- विविधस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि विषये ज्ञास्यामः;
- विभिन्नसंस्कृतशिक्षणोपागमानां परस्परं तुलनां कर्तुं शक्नुमः;
- संस्कृतशिक्षणसूत्राणि उपकरणानि च प्रभावीरूपेण पाठयितुं शक्नुयामः।

## 2.2 संस्कृतशिक्षणस्य सिद्धान्ताः

संस्कृतशिक्षणस्य निम्नप्रकाराणि सिद्धान्ताः सन्ति–

- स्वाभाविकता सिद्धान्तः
- अभिरुचिः

- अभ्यासः स्वतन्त्रता च
- अनुकरणम्
- सक्रियता

## 2.2.1 स्वाभाविकता सिद्धान्तः

स्वभाविकतास्य अर्थम् भवति – केनापि भाषायां गृहे वातवरणे एवं स्वाभाविकरूपेण अधिग्रहीतुं अर्थात विना कोपि प्रभावे भाषायां गृहे वातावरणे अभिगम्यतु शक्नुवन्ति, तत् एतद् अर्थम् भवति यत छात्रः भाषायां स्वाभाविकरूपेण अधिग्रहति। अर्थात् तां भाषायां वदानि जनाः तस्या परितः उपस्थितः भवति। एव ते सर्वान् वार्तालापं शृणुयाम् विना व्याकरणस्य ज्ञानं सहजरूपेण तत् भाषायां अधिग्रहीतु।

एतेषां सिद्धांतानां किंचित् महत्वपूर्णं बिंदु निम्नप्रकाराणि सन्ति–

1. एते सिद्धान्ते भाषा स्वाभाविकरूपेणस्य हि अधिगमतु।
2. अध्यापकानाम् तु केवलं संस्कृतभाषस्य प्रयोगं कुर्यात्।
3. संस्कृत श्लोकस्य बालगीतं च आयोजनं कुर्यात्।
4. शुद्ध उच्चारणस्य अभ्यासं कुर्यात्।
5. एतेषां बालकः भयमुक्तः – कृत्रिमतारहितः अधिगमं करोति।
6. महत्वपूर्णश्लोकानां उक्तियां च कक्षायां सुसज्जितं कुर्यात्।
7. सम्भाषण शिविरं आयोजनं कुर्यात्।

## 2.2.2 अभिरुचिः सिद्धांतः

एते सिद्धान्तयाः पिंसेंट महोदयेन तेषां पुस्तकं 'द प्रिंसिपल ऑफ़ टीचिंग मेथड' प्रस्तुतं कृतः।

यस्य विषयात् बालकस्य रूचि भवति तस्य विषयं बालकः शीघ्रं अधिगमतु।

- अतः शिक्षकस्य दृश्य – श्रव्य माध्यमेन प्रयोगं कुर्यात्।
- कथा प्रसंगा माध्यमेन शिक्षण कार्यं कुर्यात्।
- क्रीड़ा माध्यमेन शब्द धातुरूपस्य च अध्यापनं कार्यं कुर्यात्। पूर्वज्ञानं तु नवीनं ज्ञानस्य संयोजयतु।
- पाठ्य सहगामी क्रियाणां आयोजनं कुर्यात् यत् – अंताक्षरी, वाद–विवाद, भाषण, निबंध लेखन, सस्वर वाचनादि।

## 2.2.3 अभ्यास स्वतन्त्रता च सिद्धान्तः

बालकः कर्तुं अधिगमति अतः बारम्बारं कार्याणां कुर्वाण।

कठिनशब्दानां ध्वन्यानां च उच्चारणस्य कुर्यां।

संस्कृत भाषायां विचारस्य अभिव्यक्ति।

व्याकरणानां विभिन्नांगानी सिद्धान्तहस्तता।

**टिप्पणी**

संस्कृतस्य संस्कृतेन माध्यमेन पठन–पाठनम्।

संस्कृतस्य परिच्छेदानं उच्च स्वरे गतिप्रवाहे च पाठनं कुर्यात्।

मौन वचनस्य अभ्यासे पतंजलिमुनिः त्री–सूत्राणि अनुकरणं कुर्वन्तु–

1. रुचिः अर्थात् रुचिपूर्वकं अभ्यासः,
2. वैराग्यं अर्थात् अभ्यस्य बाधक तत्वात् दूरिः।
3. निरंतरताः अर्थात् सतत् अभ्यासः।

### 2.2.4 अनुकरणं सिद्धांतः

छात्रस्य अधिकाधिकं वदनाय अवसरं प्रदानं कुर्यात्।

संस्कृतशब्दावलीः व्याकरणस्य विभिन्न रूपाणी मौखिक रूपेणं अधिगमं शक्नोतु।

लिखितकार्येषु आधारः मौखिक अभिव्यक्ति – अस्ति।

सर्वप्रथमं मौखिक तत्पश्चाद् लिखित कार्यं कुर्यात्। एतद् प्रकारेण बालकः सक्रियः भवतु एवं ज्ञानं चिरस्थाई भवतु।

### 2.2.5 सक्रियताः सिद्धान्तः

पुस्तकस्य पाठाय पाठनाय च पाठस्य चयं सक्रियता–उत्साह–मुख्यदिवसाधारितः कुर्यात्।

समवाय अर्थात् पाठस्य संलग्ने हि अपेक्षित अंशानां ज्ञानं प्रदानं कुर्यात्।

विभिन्नाः छात्राः अनुसारे स्वयमस्य शिक्षणस्तरः समायोजितं कुर्यात्।

**अपनी प्रगति जांचिए**

1. संस्कृतशिक्षणस्य सिद्धान्ताः किम् अस्ति?

   (क) अभिरुचिः (ख) अभ्यासः

   (ग) अनुकरणम् (घ) उपर्युक्तसर्वेषाम्

2. छात्रस्य अधिकाधिकं वदनाय अवसरं प्रदानं करोति–

   (क) अनुकरणं सिद्धान्तः (ख) स्वाभाविकता सिद्धान्तः

   (ग) अभिरुचिः सिद्धान्तः (घ) सक्रियता सिद्धान्तः

## 2.3 विविधस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि

अत्र विविधस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानी विविचयन्ते।

### 2.3.1 प्राथमिक–माध्यमिक–उच्चमाध्यमिकस्तरेषु संस्कृतशिक्षणस्य उद्देश्यानि

भारतीयभाषाणां जननी प्राचीतमा भाषा च संस्कृतभाषा अस्ति। भारतीयभाषासु संस्कृतस्य स्थानं संस्कृतवतभाषारूपेणौ अस्ति। अन्यभाषाभ्यः काचन् शिविरा संस्कृतभाषा

टिप्पणी

रचनाशिलचतिशते। इयं संस्कृतभाषा व्याकरणप्रधान भाषा अस्ति। शुद्धरूपेण संस्कृतस्य उच्चारणे बोधने च व्याकरणमति यशं अस्ति। विचाराणाम् अभिव्यक्ते भाषा माध्यमा अस्ति। प्रो. कैलाश पवनमाश्रमोर्दयानुसारेण– मम दृष्ट्या यत्र संस्कृतं तत्र संस्कृति तथा च तत्र राष्ट्रियैकताऽपि संरक्षितातिशते।

संस्कृतभाषायां ज्ञानविज्ञानस्य गाथा अस्ति। आधुनिक परिवेशे मनोविज्ञानस्य प्रभावः समाजे निरन्तरंधिशेते। संस्कृत भाषवैज्ञानिकी भाषा रूपेणाऽपि समाजे आदरं लब्धतः। अतः संस्कृतशिक्षणं अत्यन्तंमनोयोगेन संस्कृतशिक्षकैः करणीयम्।

"प्रयोजनमनुवदश्यमन्दोऽपि न प्रतिशते" इत्युक्ताः परं अभवत् यत् संस्कृतशिक्षणस्कयाऽपि कांचन् उद्देश्यानितिशन्ते। संस्कृत भाषा संस्कृत सिशासां भाषाणां प्राचीनतमा भाषाऽपितिशते। संस्कृतशिक्षकै. प्रथमं दानयतास्ति उद्देश्यान् शिक्षणं न मातुः, वपतुः, अन्यपरि–सदस्यभ्यः मातृभाषां आगच्छत्। श्रवणं – भाषणं, पठनं, लेखनं च कस्कयाऽवप भाषायाः शिक्षणाय चतुर्धाः विकासः अपेक्षते। संस्कृतभाषा–शिक्षणस्कय अनैकानन् उद्देश्यान् सन्ति। उद्देश्येषुमानुसारं बलं प्रदीयते।

अतः संस्कृतशिक्षणसूत्राणां निम्नलिखितानि उद्देश्यानि तद्यथा–

1. छात्राः संस्कृतसम्भाषणे दक्षता प्राप्नुयुः।
2. शुद्धिलेखने उच्चारणे च समर्थाः भियुः।
3. संस्कृतव्याकरणस्य ज्ञानं भिते।
4. संस्कृतस्य प्रचार–प्रसारं भिते।
5. छात्राणां शाब्दिकं अध्ययनं भिते।

संस्कृतशिक्षणस्य उद्देश्यान् मातृभाषाशिक्षणस्य उद्देश्येभ्यः भिन्नान् सन्ति, यतः मातृभाषाशिक्षणं प्रथमकक्ष्यातः आरभ्यते, संस्कृतशिक्षणं तु पंचमीकक्ष्यातः षष्ठीतोभवत्। बालकाः अध्ययनारम्भात् पूर्वं मातृभाषायां मौखिकव्यवहारं कर्तुं समर्थाः सन्ति। बालकानां मातृभाषायां भाव अभिव्यक्तेः विचारस्य च यादृशी योग्यता भवति तादृश्य योग्यता संस्कृते न भवते। संस्कृतशिक्षणस्य उद्देश्यान् आंग्लभाषाशिक्षणस्य उद्देश्येभ्यो भिन्नाः सन्ति। सम्पर्क भाषारूपेण अन्तर्राष्ट्रियभाषारूपेण च आंग्लभाषायाः शिक्षणं प्रचलत्ये यद्यपि भारते संस्कृताध्यापनस्य पररनधः न्यूनो अतिशते तथापि संस्कृताध्यनस्य मतं आंग्लभाषायाः अध्ययनस्य मतं अधिकं भवेत्। संस्कृतं तु भारतीयसंस्कृते आधारेण माध्यमं च भारतीयसंस्कृतेः सभ्यताय उन्नत्यस्य कारणं संस्कृतम् भवति। अतः आंग्लभाषाशिक्षणापेक्षया संस्कृतशिक्षणस्य उद्देश्यान्पूर्णाः सन्ति।

### 2.3.2 शिक्षणाय व्यावहारिकोद्देश्यानां लेखनम्

अन्यभाषाणाम् इव संस्कृतस्य अपि भाषारूपेण सार्वत्रिकप्रयोगः भवेत् एवञ्च विद्यमाना संस्कृतभाषा पूर्णरूपेण परिष्कृता निर्दुष्टा प्रवाहयुक्ता सारगर्भिता च स्यात् इति अस्माभिः आकाङ्क्ष्यते चेत् विश्वस्य सर्वेषु क्षेत्रेषु अपि संस्कृतभाषा प्रवहेत् इति अपेक्षते चेत् तस्य

**टिप्पणी**

पुरातनस्य कार्यस्य प्रारम्भः कुतः भवेत् इति प्रश्नः उदेति। संस्कृतभाषायाः प्रासङ्गिकता, उपयोगिता, वाचिकता वर्तते न वा इत्येषः विषयः जनानां मनासु संस्कृतम् अध्ययनात् प्राक् एव उत्पद्यते। तथा च एतं विषयं विचिन्त्य जनाः अध्ययने अध्यापने च प्रवृत्ताः न भवन्ति एव। तस्मात् कारणात् संस्कृतभाषायाः ज्ञानं न भवति कस्यश्चिद् भाषायाः ज्ञानं विना तया भाषया लिखितस्य विषयस्य चर्चाकरणं, तस्मिन् विषये अनुसन्धानाय वार्ताकरणं वा किं कदापि सम्भवेत्। देशस्य अनेकेषु विश्वविद्यालयेषु सम्प्रति संस्कृतस्य अध्ययनं जायमानं तु वर्तते परन्तु तादृशी स्थितिः नैव दृश्यते यस्याः आवश्यकता अनुभूयते विश्वविद्यालयेषु संस्कृतमहाविद्यालयेषु जनाः संस्कृतम् अधीयानाः तु वर्तन्ते परन्तु लेखने भाषणे वदने च तेषां प्रायशः प्रत्येकस्मिन्नपि वाक्ये दोषाः दृश्यन्ते, ये च निर्दुष्टतया संस्कृतेन लेखने पठने भाषणे च समर्थाः सन्ति तादृशाः जनाः अङ्गुलिगण्याः सन्ति तथा हि संस्कृतज्ञानां भारतमातुः च अपेक्षा वर्तते यत् अनेके जनाः सर्वात्रिकरूपेण संस्कृतस्य प्रयोगे दक्षाः स्युः तत्रैव संस्कृताय कलंकरूपेण प्रभावं जनयन्ती अध्ययनशैली दृश्यते। या सम्प्रति संस्कृतानुवादरूपेण राजते, छात्रैः संस्कृतं पठ्यते परन्तु कदापि तैः संस्कृतभाषा नैव श्रूयते। भाषायाः तु चत्वारि कौशलानि भवन्ति, यदि तेषां कौशलानां माध्यमेन संस्कृतस्य अध्ययनं भवति तर्हि शीघ्रतया एव छात्राणां संस्कृताधिगमः भवति। तद्यथा श्रवणं, भाषणं, पठनं, लेखनं च इति एतानि सोपानानि वर्तन्ते। यदि छात्राणां श्रवणाभ्यासः न भविष्यति तर्हि तेषां भाषाभ्यासः कथम्? पठनलेखनयोः तु भिन्ना कथा। अद्यत्वे संस्कृतस्य या अध्ययनशैली वर्तते सा नितान्तम् अवैज्यानिकी वर्तते। चतुर्दशविद्यालयेषु सत्सु अपि संस्कृतक्षेत्रे नूतनं किमपि नैव दृश्यमानम् अस्ति इत्येतस्य कारणम् अनुवादपद्धतिः अस्ति। परन्तु उदाहरणत्वेन शिविराणां प्रयोगेण द्रष्टुं शक्यते यत् दशसु दिनेषु अश्रुतपूर्वसंस्कृतजनाः अपि संस्कृतेन सम्भाषणे दक्षाः भवन्ति। अधुना देशे विदेशे अपठितसंस्कृतजनाः अपि दोषान् विना वदन्तः भवन्ति। परन्तु तेषां भाषणे प्रान्तीयदोषाः, उच्चारणगतदोषाः, रूपगतदोषाः, प्रत्ययगतदोषाः, प्रयोगगतदोषाः इत्यादयः बहुविधदोषाः दृश्यन्ते। तेषां दोषाणां निवारणाय निराकरणाय च अपेक्षिता वर्तते 'भाषाव्युत्पत्तिः' इति।

## अपनी प्रगति जांचिए

3. भारतीयभाषाणां जननी कः भाषा अस्ति?

   (क) हिंदी भाषा  (ख) प्राकृतभाषा

   (ग) संस्कृतभाषा  (घ) अपभ्रंशभाषा

4. भाषायाः कति प्रकाराणि कौशलानि भवन्ति?

   (क) त्रीणि  (ख) चत्वारि

   (ग) पञ्च  (घ) षड्

## 2.4 संस्कृतशिक्षणोपागमाः

- सम्प्रेषणात्मकोपागमः
- संरचनात्मकोपागमः
- निदानात्मकोपागमः
- उपचारात्मकोपागमः
- अभिक्रमितानुदेशनोपागमः

शिक्षणार्थं येषां पद्धतीनां प्रयोगः क्रियते, ताः पद्धतयः उपागमाः (Approaches) भवन्ति। प्राचीनकाले तु श्रुति–स्मृति–परम्परया शिक्षणं प्रचलति स्म परन्तु वर्तमानकाले काश्चन् नवीनाः पद्धतयः आविष्कृताः। एताः नवीनाः शिक्षणपद्धतयः एव उपागमरूपेण प्रसिद्धाः। ऐतेषाम् उपागमानां प्रयोगेण शिक्षणं प्रभावीः भवति। अतः संस्कृतशिक्षकाणां कृते संस्कृतशिक्षणोपागमानां ज्ञानम् आवश्यकं भवति। एतेः उपागमाः पञ्चप्रकारकाः भवन्ति। यथा– सम्प्रेषणात्मकः उपागमः, संरचनात्मकः उपागमः, निदानात्मकः उपागमः, उपचारात्मकः उपागमः तथा अभिक्रमितानुदेशनः उपागमश्च। अत्र वयं संस्कृतं पाठनार्थं ये विभिन्नाः उपागमाः भवन्ति तान् पठिष्यामः।

### 2.4.1 सम्प्रेषणात्मकोपागमः

सम्यक् रूपेण प्रेषणम् इति सम्प्रेषणं भवति। यत्र प्रेषणे 'सम्यक्' शब्दः आगच्छति तदा केवलं प्रेषणं न अपितु ग्रहणं अथवा प्राप्तिः अपि भवति। यथा कश्चिदपि मनुष्यः कस्मैचिदपि पत्रं प्रेषयति तदा अन्यः (यस्मै पत्रं प्रेषितं सः) पत्रं प्राप्नोति, तर्हि वयं वक्तुं शक्नुमः यत् पत्रस्य प्रेषणं सम्यक् रीत्या अभवत्। परन्तु यदि पत्रं न प्राप्तं, चेत् सम्यक् रीत्या पत्रस्य प्रेषणं न अभवत्। एवं प्रकारेण एव यदा कक्षायां शिक्षणं प्रचलति तदा छात्रशिक्षकयोर्मध्ये ज्ञानस्य प्रेषणं ग्रहणं च भवति। शिक्षकपक्षतः ज्ञानस्य प्रेषणं तथा च छात्राणां पक्षतः ज्ञानग्रहणं भवति। यदि शिक्षकः छात्राणां रुच्यानुसारं स्तरानुसारं च न पाठयति तर्हि सम्यक्रूपेण शिक्षणाधिगमः न भवति। परन्तु यदि शिक्षकः यं विषयं यथा चिन्तयति तथैव वदति, छात्राः च तं विषयं तथैव श्रृवणन्ति, तथैव च ते छात्राः अपि चिन्तयन्ति तर्हि शिक्षणधिगमप्रक्रियायाः उद्देश्यं पूर्णं भवति। तदा एव ज्ञानस्य सम्यक् प्रेषणं भवति। एतस्य नाम एव सम्प्रेषणम्। इतोऽपि छात्राणां मनसि याः जिज्ञासाः उद्भवन्ति तासां जिज्ञासानां ज्ञानं शिक्षकस्य भवेत्। शिक्षकः तासां जिज्ञासानां समाधानम् अपि कुर्यात्। ज्ञानप्रेषणग्रहणयोः इदं स्वरूपं यदा योजनाबद्धरूपेण भवति तदा तस्य एव नाम सम्प्रेषणात्मकः भवति। बहव्यः पद्धतयः शिक्षणस्य भवन्ति अतः इयं पद्धति सम्प्रेषणात्मकः उपागमः कथ्यते। 'उपागम' शब्दस्य कृते वयं 'पद्धति' अपि वक्तुं शक्नुमः। आंग्लभाषायाम् उपागमशब्दस्य कृते 'Approch' इति शब्दः प्रयुज्यते। सम्प्रेषणस्य कृते आंग्लभाषायां 'Communication' शब्दः उपयुज्यते। सम्प्रेषणात्मकोपागमस्य कृते 'Communicative Approach' इति शब्दः ज्ञातव्यः। सम्प्रेषणम् एका एतादृशी प्रक्रिया भवति यस्यां छात्रशिक्षकयेः परस्परं विचारविनिमयः भवति।

**टिप्पणी**

## परिभाषा

1. स्ट्रोस– मानवेषु परस्परम् अर्थपूर्णतथ्यानाम् आदानप्रदानप्रक्रिया एव सम्प्रेषणम्।
2. एण्डरसन्– सम्प्रेषणम् एका गत्यात्मिका प्रक्रिया। अस्यां प्रक्रियायां व्यक्तिः चेतन–अचेतन–संज्ञान–साङ्केतिकादिरूपेण उपकरणैः साधनैः वा अन्यान् प्रभावयति।

सम्प्रेषणस्य प्रमुखकार्याणि– सम्प्रेषणस्य चत्वारि प्रमुखानि कार्याणि भवन्ति–

(1) सूचनाप्रदानम्।

(2) निर्देशम्, आदेशं, संदेशं वा प्रेषणम्।

(3) परस्परविश्वासस्थापनम्।

(4) समन्वयसाधनम्।

सम्प्रेषणस्यप्रमुखतत्त्वानि–

सम्प्रेषणस्य त्रीणि प्रमुखतत्त्वानि भवन्ति–

(1) स्रोतः

(2) संदेशः

(3) ग्राहकः

(1) **स्रोतः** – शिक्षकः सम्प्रेषकः वा विभिन्नः स्रोतभिः संदेशं प्रेषयति। शिक्षकस्य अध्यापनं, व्याख्यानं, श्यामपट्टलेखनं चित्रनिर्माणम् इत्यादीनि स्रोतांसि भवन्ति। पुस्तकानि, समाचारपत्राणि पत्रपत्रिकाः संगणकं मोबाइलयन्त्रं दूरवाणीयन्त्रं फैक्सयन्त्रं अन्तर्जालम् इत्यादीनि अपि विभिन्नाधुनिकसम्प्रेषणस्रोतांसि भवन्ति।

(2) **संदेशः** – विभिन्नस्रोतसा यस्य प्रेषणं भवति तदेव संदेशः भवति। संदेशः लिखितमौखिको वा भवितुम् अर्हति। आधुनिकप्रविधौ तु बहुसरलमाध्यमेन एव प्रेषितुम् शक्नुमः। अस्मिन् समये मौखिकः संदेशः अधिकं प्रचलति।

(3) **ग्राहकः** – यः संदेशं प्राप्नोति सः ग्राहकः भवति। सः सन्देशं प्राप्य चिन्तनं करोति। चिन्तनं कृत्वा पुनः तस्य उत्तरं ददाति। एवं प्रकारेण सन्देशस्य प्रक्रिया चलति। अस्मिन् भाषणस्य श्रोता, समाचारपाठकः क्रीडाव्याख्यानश्रोता चलचित्रदर्शकोऽपि ग्राहकः एव अस्ति।

सम्प्रेषणस्य निम्नलिखित प्रकाराः वर्तन्ते। तद्यथा–

सम्प्रेषणम्
↓
शाब्दिकम् | अशाब्दिकम्
↓ | ↓
मौखिकम् | मुखमुद्रा

↓ लिखितम् ↓ वाणीसंकेतः

↓ नेत्रसम्पर्कः स्पर्शसम्पर्कः

पुनः सम्प्रेषणस्य प्रकारद्वयम्–

सम्प्रेषणम्

↓

शैक्षिकम् | लौकिकम्

**शैक्षिकम्**– शैक्षिकसम्प्रेषणे शिक्षकः च छात्राः भवन्ति। शिक्षकः सन्देशस्य स्रोतः भवति एवं च सः दाता अपि भवति। छात्राः सन्देशस्य ग्राहकाः भवन्ति।

**लौकिकम्**– लौकिकसम्प्रेषणे असंख्यकेभ्यः जनेभ्यः स्व सन्देशं प्रेषयति। अस्मिन् सम्प्रेषणे आकाशवाणी, दूरदर्शिम्, समाचारपत्राणि, ग्रन्थध्वनिमुद्रिकाः, सान्द्रध्वनिमुद्रिकाः, चलनपत्राणि, व्यवहारपट्टाः, अन्तर्भवन्ति।

### सम्प्रेषणोपागमस्य बाधकतत्त्वानिः

सम्प्रेषणोपागमे निम्नलिखितबाधकतत्त्वानि सन्ति– 1. शब्दः 2. भाषा 3. पूर्वानुभवः 4. सम्वेगाः 5. पारिस्थितिकसन्दर्भः। ऐतेषां विस्तृतं वर्णनम् अत्र प्रस्तूयते। तद्यथा–

(1) **शब्दः** – सम्प्रेषणे बाधा तदा प्रभवन्ति यदा स्पष्टः ध्वनिः न आगच्छति। तदा तत्र विपरीतार्थेन वा स्वीक्रियते। अतः अत्र शब्दरूपेण बाधा आगच्छति। इयं बाधा निवारणार्थं ध्वनिः सम्यक् भवेत्। अपि च शब्दाः स्पष्टरूपेण प्रदर्शिताः भवेयुः। सरल–सरलशब्दस्य प्रयोगः भवेत्।

(2) **भाषाः** – सम्प्रेषणे भाषायाः स्पष्टता अवश्यमेव स्यात्। तथा च शब्दस्य प्रयोगः किमर्थं एवं च (कुत्र) इति सन्दर्भस्य ज्ञानं अवश्यमेव करणीयः। अन्यथा सन्देशस्य ग्रहणे अनेके भ्रमाः सम्भवेयुः। अतः वक्तुं शक्यते यत् भाषायाः प्रयोगः शब्दः स्पष्टः, सरलमाध्यमेन एव भवेत्।

(3) **पूर्वानुभवः** – पूर्वस्य अनुभवः एव पूर्वानुभवः इति कथ्यते। पूर्वानुभवेऽस्मिन् कोडिङ्ग, डीकोडिङ्गकरणे पृष्ठभूमेः अनुभवः अवस्यमेव करणीयः। यदि पूर्वस्य अनुभवः सम्यक् न भवति चेत तस्य आगामी अनुभवः अपि सम्यक् न भविष्यति। अतः पूर्वानुभवस्य ज्ञानं अवश्यमेव करणीयः।

(4) **सम्वेगाः** – मनोविज्ञाने विलियम् मैक्डूगलमहोदयेन चतुर्दशः मूलप्रवृत्तयः एकत्रिताः। तस्याः 14 सम्वेगाः वर्तन्ते। इति उक्तवान् प्रत्येकमूलप्रवृत्तेः संवेगाः भवन्ति। संवेगस्य नाम भयः, क्रोधः, घृणा, वात्सल्यम्, कष्टम्, कामुकता, आश्चर्यः, आधीनतायाः भावना, श्रेष्ठतायाः भावना, एकाकीभावना, बुभुक्षा, अधिकारस्य भावना, रचनायाः आनन्दः, आमोदः इत्यादयः सम्वेगाः सन्ति। ऐते सम्वेगाः भावनाश्च सम्प्रेषणप्रक्रियायां

बाधां उत्पादयन्ति। सम्वेगोऽपरि नियंत्रणं अवश्यमेव स्यात्। अन्यथा तैः दोषैः भाषायां अपि दोषाः उत्पन्नः भविष्यन्ति। अतः सर्वान् जनान् संवेगोऽपरि नियंत्रणं स्थापनीयम्।

**टिप्पणी**

(5) **पारिस्थितिकसंन्दर्भः** – एकस्य शब्दस्य अनेके अर्थाः भवितुमर्हन्ति। यस्मिन् स्थाने यस्य शब्दस्य प्रयोगः भवति तस्य शब्दस्य इतोऽपि अर्थाः भवन्ति। पूर्वं तु चिन्तनं स्यात् यत् अस्य शब्दस्य अर्थम् ज्ञात्वा एव तस्य प्रयोगः स्यात्। अन्यथा अर्थस्य अनर्थम् अपि भवितुं शक्नोति। अतः अर्थम् ज्ञात्वा तस्यशब्दस्य प्रयोगः भवेत्।

### सम्प्रेषणात्मकोपागमस्य महत्त्वानि

सम्प्रेषणात्मकोपागमस्य बहूनि महत्त्वानि वर्तन्ते। आधुनिकयुगे सम्प्रेषणस्य एव प्रभावः दृश्यते। अयं तकनीकस्ययुगः वर्तते। युगेऽस्मिन् सम्प्रेषणस्य प्रभावः सर्वत्रैव दृश्यते ज्ञायते वा। सम्प्रेषणं विना अस्माकं जीवनं पशुवत् भवति। अतः सम्प्रेषणस्य महत्त्वं अस्माकं जीवने अतीव अस्ति। अत्र सम्प्रेषणस्य महत्त्वं निम्नलिखितानुसारेण वर्तते–

1. सम्प्रेषणात्मकोपागमः उद्देश्यप्राप्तौ सहाय्यं करोति।
2. सम्प्रेषणात्मकोपागमः अधिगमप्रक्रियासु सार्थकं प्रभावपूर्णं च योगदानं प्रददाति।
3. सम्प्रेषणात्मकोपागमे आन्तरिकप्रेरणं, जिज्ञासा च वर्धते।
4. सम्प्रेषणात्मकोपागमस्य प्रयोगे छात्राः अधिकसक्रियाः भवन्ति।
5. उपागमेऽस्मिन् पाठ्यवस्तुः स्पष्टं भवति।
6. छात्रेभ्यः सम्यक्प्रेरणा मेलिष्यति।
7. भाषायाः विकासः सुष्ठुः भवति।
8. एतानि सम्प्रेणात्मकोगमस्यमहत्त्वानि वर्तन्ते।

### सम्प्रेषणात्मकोपागमस्य प्रकृतिः

पारस्परिकसम्बन्धस्थापनं काचित् प्रक्रिया। विचारविमर्शेषु विचारविनिमयेषु च अत्र विशेषावधानं क्रियते। सम्प्रेषणं उद्देश्यपूर्णप्रक्रिया वर्तते। सम्प्रेषणप्रक्रियायां अन्तःक्रिया प्रतिपुष्टिश्च भवति। परस्परं अन्तःक्रिया अपेक्षते। सम्प्रेषणं काचित् गतिशीला निरंतरप्रक्रिया। अत्र सूचनाः विचाराश्च मौखिकलिखितसांकेतिकरूपेण गृह्यन्ते प्रेषयन्तेच।

सम्प्रेषणप्रक्रिया सन्देशप्रेषकः → सन्देशः → साधनम् प्रतिपुष्टि ग्राहकः

कस्यचिद् विषयस्य सम्प्रेषणं कयाचिद् भाषया एव भवितुमर्हति। भाषां विना कस्यापि विचारस्य सम्प्रेषणं न भवत्येव। भाषाशिक्षणेऽपि सम्प्रेषणम् एव उत्तमं साधनं भवतीति उपागमोऽयं निरूपयति। उपागमोऽयं (The communicative language Teaching) इति त्रिनाम्ना विदेशेषु प्रसिद्धः। एतद् अनुसारम् मातृभाषा तु व्यवहारेणैव अस्माभिः अधिगम्यते। एवमेव अन्यासां अपि भाषाणां अधिगमः यदि भवति। तर्हि मातृभाषावत् ताभिः अपि व्यवहृतुं शक्यते। यावत् भाषा न भाष्यते तावत् तस्याः भाषिककौशलानां अभ्यासो न भवति। केवलं व्याकरणमाध्यमेन भाषाभाषणस्य अभ्यासो न भवितुम्

अर्हति। प्रथमं भाषा ततः व्याकरणम्। यावन्मूलमेव नास्ति तर्हि तत्र शुद्धाशुद्धविवेकस्य आवश्यकता हि कुत्र?

टिप्पणी

### सम्प्रेषणस्य क्षेत्रम्

सम्प्रेषणात्मकोपागमस्य विविधक्षेत्राणि वर्तन्ते। अपि च अस्य क्षेत्रं व्यापकम् अपि वर्तते। अस्मिन् उपागमे प्रेषकग्राहकयोर्मध्ये अन्तःक्रिया वर्तते। ग्राहकः विचारस्य, भावनायाः, मनोवृत्तेश्च, इत्यादीनाम् स्वीकरोति। ततः सः प्रेषकः अपि तस्य विचार–भावना–मनोवृत्तिः इत्यादीनां श्रवणं करोति। एवं च अस्यां प्रक्रियायां बहुविधसंकेतानाम् उपयोगः अपि क्रियते। अयं च संकेतः शब्दैः, क्रियाभिः, चित्रैः, संख्यादिभिश्च भवितुमर्हति। सम्प्रेषणं तु निर्देशनेन पाक्षिकसम्प्रेषणं एव भवति किन्तु उच्चस्तरीयसम्प्रेषणं तु द्विपाक्षिकसम्प्रेषणं भवति। एतत् सम्प्रेषणं तु द्विधा भवति–

1. आन्तरिकसम्प्रेषणम् 2. बाह्यसम्प्रेषणम्।

(1) **आन्तरिकसम्प्रेषणम्** – आन्तरिकरूपेण सम्प्रेषणमेव आन्तरिकसम्प्रेषणम् इति कथ्यते। निर्देशनं, समन्वयनं, अवस्थापनं, प्रेरणा, इत्यादीनां प्रबंधनकार्याणां निष्पादने आन्तरिकसम्प्रेषणं सहायकं भवति।

(2) **बाह्यसम्प्रेषणम्** – बाह्यसम्प्रेषणं संघटनात् बहिः सन्देशप्रेषणेन सम्बद्धम् अस्ति। एतत् सम्प्रेषणं शिक्षायाः, सर्वकारस्य, तदीयविभागानां च व्यवस्थापने सम्बद्धं वर्तते। यथा ध्वनिवर्धकम्, दूरवाणी इत्यादीनि।

### सम्प्रेषणावरोधानां समाधानानिः

सम्प्रतियुगेऽस्मिन् मानवः स्वस्य सन्देशं शीघ्रं द्वितीयव्यक्तिसमीपे प्रेषयति। पुनः ग्राहकः अपि तस्य सन्देशं पठित्वा शीघ्रं प्रतिपुष्टिः ददाति। एवं रूपेण सम्प्रेषणप्रक्रियायां निरन्तरता भवति। अस्मिन् निरन्तरतायामपि अनेके अवरोधाः उत्पन्नाः भवन्ति। तेषां समाधानं निम्नानुसारेण क्रियन्ते। तद्यथा–

1. सर्वप्रथमं तु भाषा सरला, स्पष्टा, सुबोधा च प्रयोजनीया।
2. सन्देशः सन्देशसंग्राहकानुसारेण भवेत्।
3. सन्देशे यदि किमपि प्रमुखबिन्दुः अस्ति चेत् तस्य पुनः लेखितुं शक्यते।
4. एकस्य अनंतरं द्वितीयमाध्यमस्य प्रयोगः कर्तुं शक्यते।
5. सन्देशस्य प्रतिपुष्टेः व्यवस्था सम्यक् भवेत्। एते बिन्दवः प्रमुखरूपेण वर्तन्ते। इतोऽपि समाधानानि सन्ति किन्तु ते गौणरूपेण भवन्ति इति।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् सम्प्रेषणात्मकोपागमस्य महती आवश्यकता वर्तते। यतो हि मानवीयभावाः सम्प्रेषणमाध्यमेन एव मनुष्यस्य समीपे आगच्छति। एतस्य प्रयोगः रोचकतया तथ्यानां, भावानां, विचाराणां आदानप्रदानेन सुष्ठुः भवति। आधुनिकप्रविधिना चलचित्रम्, आकाशवाणी दूरदर्शनं, ध्वनिमुद्रिका, संगणकम् इत्यादयः सम्प्रेषणस्य विधयः वर्तन्ते येषां प्रयोगेण व्यापकोपयोगः जायते। एवं प्रकारेण सम्प्रेषणम् अस्मान्, विकासयितुं शिक्षयितुं जागरूककर्तुं समायोजयितुं च प्राधान्यं भजते।

**टिप्पणी**

## 2.4.2 संरचनात्मकोपागमः

1952 तमे आङ्ग्लभाषाशिक्षणार्थं प्रथमतः उपागमोऽयं उपयुक्तम्। भाषायाः वाक्यसंरचना तदभेदाश्च प्रमुखतया अध्याप्यन्ते। तद्द्वारा भाषावगमनं प्रयोगावगमनं च छात्राणां भवति इति निरूपितः। उपागमोऽयं आदौ मद्रासनगरे आङ्ग्लभाषाध्यापने ब्रिटिश काउंसिल (परिषद) इति संस्थया प्रयुक्तः। संस्कृतभाषास्वरूपं सर्वमपि संस्कृतवाक्यसंरचनायां अन्तर्निहितम् इति कथने नास्ति। संरचना भाषायाः अभिभाज्यम्। संरचनाधारेण एव भाषायाः स्वरूपंस्य आकृतिः पूर्णतां याति। चयनं विभाजनं च– बोधनीयवाक्यानां संग्रहणम्। यथा– विभक्त्यभ्यासः। भूत–भविष्य–वर्तमानप्रयोगाः, अव्ययानां प्रयोगाः, अविकारीकर्तुकर्मभावप्रयोगाः अंशाः परिशीलनीयाः

1. आवृत्तिः
2. उपयोगिता
3. शिक्षणयोग्यता
4. निर्माणयोग्यता।

एतेषां विवरणं अधः प्रस्तूयते।

(1) **आवृत्तिः** – यस्य (पाठांशस्य) विभिन्नसन्दर्भेषु आवृत्तिः भवति। तस्यांशस्य भेदावगाहनपूर्वकं अभ्यासः करणीयः।

(2) **उपयोगिताः** – विषयस्य अभ्यासः छात्राणां उपयोगीः भवति। अन्यथा सः अभ्यासः निरर्थकः स्यात्। षष्ठसप्तमकक्षयोः विभक्त्याभ्यासः पर्याप्तोभवति चेत् तावदेव बोधनीयम्। कर्मणि प्रयोगः बोधनेन तस्य उपयोगिता क्षमता न भवति।

(3) **शिक्षणयोग्यताः** – स्वीकृतांशस्य शिक्षणयोग्यता भवेत्। यथा– छात्रः श्लोकम् इति बोधयितुं सरलं "किन्तु सूर्यः प्रतिदिनं प्राच्यं दिशि उदेति" इत्यस्य पाठने क्लेशः उत्पादयति। प्राथमिकस्तरे ईदृशानि वाक्यानि अभ्यासक्लेशं उत्पादयति।

(4) **निर्माणयोग्यताः** – पठितांशस्याधारेण नूतनं सर्जनं कर्तुं प्रयतेरन् छात्राः तादृशाः योग्यांशयः स्वीकरणीयाः।

**अर्थ परिभाषा च** – संरचनायाः अथवा संग्रन्थनस्य सामान्यार्थः भवति बन्धनं, योजनं वा। एतस्याः एकः नाम वाक्यघटनोपागमः इत्यपि परिभाषा– "शब्दानां विभिन्नरूपेण वाक्येषु ग्रन्थनमेव संग्रन्थनम् इति।" आङ्ग्लभाषायां 'Structural Approch' इति नाम अस्ति।

**संरचनात्मकोपागमस्यगुणाः**– संरचनात्मकोपागमस्य बहवो हि गुणाः वर्तन्ते। अस्योपागमस्य माध्यमेन एव विद्यालयस्तरे उपयुक्तं रोचकं, सुग्राह्यं च कर्तुं संस्कृतव्याकरणनियमानां ज्ञानप्रदानाय उपागमोऽयं अत्यन्तोपयुक्तः विद्यते। अस्योपागमस्य केचनगुणाः अधोलिखितं वर्तन्ते–

1. संरचनात्मकोपागमे भाषाशिक्षणस्य मनोवैज्ञानिकी शैली वर्तते।
2. उपागमेऽस्मिन् सरलवाक्यानां प्रयोगं कृत्वा छात्राणां समक्षे उपस्थाप्यन्ते।

3. संरचनात्मकोपागमस्य प्रयोगद्वारा छात्राणां मौखिकाभिक्तेः विकासः भवति।
4. संस्कृतकक्षायां संस्कृतस्य प्रयोगः अनिवार्यरूपेण क्रियते।
5. संस्कृतभाषायाः यानि चत्वारि कौशलानि वर्तन्ते तेषु कौशलेषु दक्षता समागच्छति।
6. अस्योपागमस्य प्रयोगमाध्यमेन व्याकरणस्य नियमान् छात्राः सरलरूपेण अधिगच्छन्ति।
7. अस्योपागमे ये अधिगमसिद्धान्तस्य नियमाः वर्तन्ते तेषां प्रयोगः अत्र क्रियते।
8. उपागमेऽस्मिन् भाषा मधुरा मनोनुकूलं, सरलं एवं सरसं भवति। संरचनात्मकोपागमस्य प्रयोगसमये छात्राणां स्तरं अवश्यं मनसि निधाय एव पाठनीयः। अस्योपागमस्य प्रयोगः सर्वस्तरीय छात्राणां कृते संस्कृतशिक्षणाय नितराम् प्रयुज्यते।

**टिप्पणी**

**संरचनात्मकोपागमस्य निर्माणप्रक्रियाः** – संरचनात्मकोपागमस्य निर्माणप्रक्रियायां बहवो बिन्दवः वर्तन्ते, किन्तु प्रमुखरूपेण केचन बिन्दवः वर्तन्ते। तद्यथा–

1. पदानां क्रमः।
2. उपसर्गनिपातादीनां प्रयोगः।
3. विभक्तीनां प्रयोगः।

अस्य विवरणं अधः प्रस्तूयते–

(1) **पदानां क्रमः** – उपागमेऽस्मिन् पदानां क्रमः महत्त्वपूर्णाः वर्तन्ते। पदस्य एकः व्यवस्थितः क्रमः वर्तते, तेनेव क्रमेण पदान् स्थापनीयाः। यथा– कर्ता–क्रम–क्रियादीनां क्रमः तु निर्दिष्टम् अस्ति।

(2) **उपसर्गनिपातादीनां प्रयोगः** – संरचनात्मकोपागमस्य निर्माणे उपसर्गनिपातादीनां प्रयोगः यथा स्थानं भवेत्। यथा उपसर्गस्य प्रयोगं क्रियापदस्य पूर्वं भवति एवं च चादिनिपातस्याऽपि प्रयोगः उचित स्थाने भवेत्।

(3) **विभक्तीनां प्रयोगः** – अस्योपागमे विभक्तीनां अपि प्रयोगः यथास्थानं स्यात्। यदि तस्य प्रयोगः उचितरूपेण न भविष्यति चेत् बहवो हि दोषाः आगमिष्यन्ति। अतः तस्य प्रयोगः उचितस्थाने स्यात्।

**संरचनात्मकोपागमस्य सिद्धान्तः**

1. भाषा प्राथमिकतया भाषणरूपा।
2. भाषणं विभिन्नाभ्यासानां समूहः भवति।
3. भाषाशिक्षणं न तु भाषाविषयकं शिक्षणम्। भाषाशिक्षणम् अर्थात्–श्रवणं, भाषणं, पठनं, लेखनम्, इत्यादीनां शिक्षणं भवेत्।
4. भाषाः परस्परं भिन्नाः भवन्ति। प्रत्येकं भाषायाः संरचनाऽपि भिन्ना भवति।

**संरचनात्मकोपागमस्य पाठयोजनायाः सोपानानि**

संरचनात्मकोपागमस्य पाठयोजनायाः सोपानानि प्रमुख रूपेण षड् एव सन्ति। तेषां विवरणम् अधः प्रस्तूयते–

टिप्पणी

(1) **प्रस्तावना**— अस्मिन् सोपाने संरचनात्मकोपागमस्य पाठयोजनायाः संक्षिप्तपरिचयः भवति।

(2) **उद्देश्यकथनम्**— द्वितीयसोपाने पाठयोजनायाः उद्देशस्य कथनं भवति। अस्मिन् विशिष्टम् एवं च सामान्यं द्विविधम् उद्देश्यं भवन्ति।

(3) **प्रस्तुतीकरणं**— तृतीयसोपाने या पाठयोजना अस्ति। तस्याः पाठयोजनायाः प्रस्तुतीकरणम् भवति। प्रस्तुतीकरणसमये सर्वे छात्राः ध्यानेन श्रृण्वन्ति। अस्मिन्नेव सोपाने त्रीणि उपसोपानानि वर्तन्ते— (क) प्रथमसंग्रन्थनम् (ख) द्वितीयसंग्रन्थनम् (ग) तृतीयसंग्रन्थनम्।

(4) **स्पष्टीकरणम्**— चतुर्थ सोपाने स्पष्टीकरणं भवति।

(5) **अभ्यासकार्यम्**— पंचमसोपाने अभ्यासकार्यं भवति। पठितांशस्य अभ्यासः अस्मिन् भवति।

(6) **गृहकार्यम्** — षष्ठसोपाने छात्राणां कृते गृहकार्यं दीयन्ते। एते पाठयोजनाः सोपानानि वर्तन्ते।

अत्र निष्कर्षतः यत् संरचनात्मकोपागमस्य उपयोगिता अस्माकं जीवने अतीव वर्तते। अस्योपयोगेन संस्कृतव्याकरणं, संस्कृतभाषा, एवं च संस्कृतवाग्व्यवहारः सरलतया छात्राः अधिगच्छन्ति तथा च मनोवैज्ञानिकीशैलीमाध्यमेन अस्य प्रयोगः भवति। अतः अस्योपयोगः अस्माकं जीवने भवेत् एव।

## 2.4.3 निदानात्मकोपागमः

अस्योपागमे शिक्षार्थिषु वंश–लिङ्ग–वयः परिवेषादिविभिन्नेभ्यः कारणेभ्यः वैयक्तिकभिन्नताः भवन्ति। केचन् धीमन्तः भवन्ति। केचन् अल्पबुद्धयः भवन्ति। येषां अल्पबुद्धिः भवति अथवा ये छात्राः न्यूनाः भवन्ति तेषां छात्राणां निदानात्मकोपचारः निदानात्मकोपागमेन क्रियते। यथा— वैद्यः औषधिमाध्यमेन तस्य उपचारं करोति। तथैव शिक्षकः अपि अस्योपागममाध्यमेन तस्य (छात्रस्य) निदानं करोति।

**अर्थ परिभाषाश्च**— निदानम् इति शब्दस्य अर्थः भवति मूलकारणम् अथवा रोगनिर्णयः। आङ्ग्लभाषायां (डायग्नॉसिस) इत्युच्यते।

परिभाषा— "चिकित्सकः रोगिनः लक्षणानि परिशील्य रोगस्य निदानं करोति एवमेव शिक्षकोऽपि छात्राणां विषयगतमन्दताम् अधिगमसम्बद्धत्रुटिः, लोपांश्च ज्ञात्वा तेषां निदानं करोति।" योकन् सिंसन् महोदयोरनुसारं, "निदानं एका कला, यया कलया छात्रेषु विद्यमानैः चिह्नैः, लक्षणैर्वा कस्या अपि कठिनतायाः ज्ञानं प्राप्यते।"

### निदानात्मकोपागमस्य उद्देश्यानि

प्रत्येककार्यस्य किमपि उद्देश्यं भवति। यदि कार्यस्य उद्देश्यं न भवति चेत् कार्ये सफलताऽपि न मिलिष्यति। अतः कार्ये प्रथमं उद्देश्यस्य निर्माणं भवेत्। उद्देश्याधारेण कार्ये सफलता मिलति। एवमेव निदानात्मकोपागमस्याऽपि केचन् उद्देश्यानि सन्ति। तेषां विवरणं निम्नपंक्तौ विद्यते। तद्यथा—

1. छात्रेषु पाठ्यपुस्तकसम्बंधित् जन्मजात अथवा स्वाभाविककठिनतानां ज्ञानप्राप्तिः स्यात्।

2. छात्राणां पाठ्यविषयसम्बद्धनां विविधकठिनतानां च अवगमनम्।
3. छात्राणां व्यक्तित्वस्य विश्लेषणम्।
4. छात्राणां समस्यायाः समाधानम्।
5. विभिन्नेभ्यः घटकेभ्यः छात्राणां समाधानम्।

## निदानात्मकोपागमस्य क्षेत्रम्

सार्धद्विशतवर्षेभ्यः पूर्वमेव गद्यप्रकारस्य हृदयताम् अवगत्य भगवान् यास्कः 'निरुक्तम्' स्वग्रन्थं गद्ये प्रायुङ्तः। ततः गच्छता कालेन शास्त्रग्रन्थाः व्याख्यानग्रन्थाः च हृदये गद्ये निरमीयन्त। तत्रैकम् उदाहरणं 'महाभाष्ये' पश्यामः। यथा– एवं हि श्रूयते। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। बृहस्पतिश्च प्रवक्तेन्दश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम। इति।

महर्षिः चरकः अपि चरकसंहितायां गद्यं प्रयुक्तवान्। यथा– नारत्नपाणिर्नास्नातो नोपहतवासा नाजपित्वा नाहुत्वा देवताभ्यो नानिरूप्य पितृभ्यो नाद्त्वा गुरुभ्यो नातिथिभ्यो

टिप्पणी

नोपाश्रितेभ्यो नापुण्यगन्धो नाऽप्रक्षालितपाणिवदनो नाशुद्धमुखो नोदङ्मुखो न विमना न प्रतिकूलोपहितमन्नमाददीत्। इति।

तत्त्वशास्त्राणां दर्शनशास्त्राणां व्याकरण–ज्योतिष–न्यायायुर्वेद–मीमांसादिशास्त्रग्रन्थाः तु विपुलतया गद्येऽतन्यन्त इति तु नाविदितं विद्वद्भिः। महामनाः कौटिल्यः स्वकीये कौटिलीयम् अर्थशास्त्रम् इति ग्रन्थे यथा सुन्दरं गद्यं प्रायुङ्तः अवलोक्यताम्। "दर्शने प्रसीदति। वाक्यं प्रतिगृह्णाति। आसनं ददाति। विविक्तो दर्शयते। शङ्कास्थाने नातिशङ्कते। कथायां रमते। परिज्ञाप्येष्ववेक्षते। पथ्यमुक्तं सहते। स्मयमानो नियुङ्क्ते। हस्तेन स्पृशति। श्लाघ्ये नोपहसति।"

## 4.2.2 गद्यशिक्षणोद्देश्यानि

- व्याकरण सम्मतं भाषायां प्रयोगं कर्तुं।
- शब्दानां प्रभावशाली प्रयोगे।
- शब्दभण्डारे वृद्धि करणीयं।
- संक्षिप्त जीवनिम् लिखतु शक्यं।
- सभानां उत्सवानां च प्रविवेचनं कर्तुं।
- लेखने सृजनात्मकता मौलिकता च विकसितं कर्तुं।
- लिपिस्य मानकरूपं व्यवहाराय।
- रूपविज्ञानं ध्वनिविज्ञानं आधारितं शब्दानां वर्तनिं ज्ञानं कर्तुं।
- शब्दकोशानां द्रष्टुं योग्यतानां विस्तरेण कर्तुं।
- विराम चिह्नानि उचितं प्रयोगं कर्तुं।

## 4.2.3 गद्यशिक्षणभेदाः– नाटक–कथा–निबन्ध– अनुवादशिक्षणानि

गद्यकाव्यं हि द्विविधं कथा, आख्यायिका चेति। तत्र कथा हि कविकल्पितवस्तुपात्रादिविषया यथा बृहत्कथा। आख्यायिका तु ऐतिहासिकवृत्ताधारा। कथा हि स्वयं नायकेन वाऽन्येनापि कथिता भवति, यदा आख्यायिका तु स्वयं नायकेनैव कथिता भवति। आख्यायिका उच्छवासाख्येषु विभागेषु विभक्ता भवति। तत्र वक्तापरवक्तवृत्तप्रणीतपद्यान्यपि भवन्ति, किन्तु कथायां नैव। कथायां हि कन्याहरण–सङ्ग्राम–विप्रलम्भ–सूर्योदय–चन्द्रोदयप्रभृतिविषयाणां सुविस्तृतं वर्णनं भवति आख्यायिकायां नैव। संस्कृतगद्यकाव्ये यथासम्भवमेतेषां नियमानां पालनं कृतमेव दृश्यते। दण्डी कथयति यत्कथाख्यायिकयोः नैव तथा महत्त्वदर्शितो भेदः सम्भवति। ते हि गद्यकाव्यस्य द्वे संज्ञे एवेति। कोषकारस्त्वेवमाह– 'प्रबन्धकल्पना कथा', 'आख्यायिकोपलब्धार्था', बालरामायणम् 'गद्यं कवीनां निकषं वदन्ति' इति निगदति। यः गद्यं तादृशं विलिख्य कविः इति प्रशंसितः भवति सः नितरां काव्यशास्त्रदोषज्ञानां विमर्शनिकषोपले निघृष्टसुवर्णाभरणोपमः सन् सहृदयैः नित्यं कण्ठे धार्यत एव। अत एवोक्तम् यथा–

पद्यं वद्यं गद्यं हृद्यम्। इति। अपि च –

अपरे काव्यसंसारे कविरेकः प्रजापतिः।

यथास्मै रोचते विश्वं तथेदं परिवर्तते।। इति वदन्ति।

किन्तु तादृशविश्वसृष्टौ समर्थाः कवयोऽपि विरला एव। विस्मयावहायां कविपरम्परावाहिन्यां संस्कृतसाहित्यसरस्वत्यां बाणभट्टसदृशाः गद्यं प्रणीय एव कविरितिविख्याताः न बहवः उपश्रूयन्ते। यतः कस्यामपि भाषायां गद्यकाव्यनिर्मितिः न सुलभा। संस्कृते तु कठिनतरा। तथापि संस्कृतभाषायां गद्यकाव्यश्रीः विपुला दृश्यते। वेदेषु, उपनिषत्सु, विविधशास्त्रग्रन्थेषु च गद्यानां प्रयोगाः तत्तद्गहनतत्त्वप्रतिपादननैपुणीं दर्शयन्त्यपि गद्यसाहित्यस्तोमे नान्तर्भवन्ति। यतः तादृशगद्येषु यद्यपि शास्त्रप्रौढिमा, पाण्डित्यप्रकर्षश्च गोचरति, तथापि रसस्यन्दीनि वाक्यानि तत्र न भवन्ति। आचार्यः दिङ्नागः स्वस्य किरणावलिः नाम्नि ग्रन्थे उत्तमां गद्यसरणिं प्रदर्शयत्। जयन्तभट्टः न्यायमञ्जरी इति ग्रन्थे तत्र तत्र गद्यसुषमां शैलीमभिव्यनक्ति।

किन्तु एतादृशेषु शास्त्रग्रन्थेषु शास्त्रप्रतिपाद्यविषयमात्रे प्रवृत्तं गद्यं न हि खलु काव्यप्रपञ्चं संवर्धयति। समुपलब्धेषु गद्यकाव्येषु बाणकर्तृकं कादम्बरीनामकं सर्वप्रथमम्। एतत् काव्यं 'प्रबन्धकल्पना कथा' इति कोशोक्तप्रकारेण कथाप्रकारे अन्तर्भवति। द्वितीयं च बाणकृतम् आख्यायिकाप्रकारे अन्तर्भूतं गद्यकाव्यं हर्षचरितम् इति। बाणकवेरपि पूर्वकालीनः गद्यकाव्यकर्ता सुबन्धुः। एतस्य कृतिः वासवदत्ता इति। महाकविः दण्डी दशकुमारचरितम् अवन्तिसुन्दरीकथा इति गद्यकाव्यद्वयं प्रणिनाय। ततः वामनभट्टबाणः नामा कविः वेमभूपालचरितम् नामं काव्यं व्यरचयत्। अष्टादश शतमानस्योत्तरार्धे आन्ध्रीयः महाविद्वान् लक्ष्मणसूरिः भारतसङ्ग्रहः नलोपाख्यानम् इति गद्यकाव्यद्वयं लिखितवान्। गते नवदशशतमाने औत्तरेयः अम्बिकादत्तव्यासः शिवराजविजयः नामानं गद्यग्रन्थं निरबध्नात्। तथा च पण्डिता क्षमा नाम्नी विदुषी 'कथामुक्तावली' इति गद्यकथाग्रन्थं रमणीयगद्यग्रथनकौशलेन विरचितवतीति श्रुतम्। एवं च आसप्तमशतकादारभ्य वर्तमानकालपर्यन्तमपि महान्ति गद्यकाव्यानि गणयामश्चेत् तानि केवलम् अङ्गुलिगण्यान्येव भवन्तीति ज्ञायते। एतेन स्पष्टं भवति यत् संस्कृते हृद्यं गद्यं विरचयितुं ''चापलाय प्रचोदितः'' कोऽपि कविः न प्रभवति इति।

### 4.2.4 गद्यशिक्षणस्य विधयः– व्याख्या–टीका–भाष्य–प्रत्यक्ष–कोश–तुलनाविधयः

मानवेतिहासे पद्यकाव्यात् गद्यकाव्यं प्राचीनतमं वर्तते, यतोहि विचाराणां भावनाश्च सम्प्रेषणं गद्येन भवति। तथापि गद्यकाव्यस्य विकासं तादृशं नाभूत् यादृशं पद्यकाव्यस्य। यतोहि गद्यकाव्यं पद्यकाव्यात् क्लिष्टतरं वर्तते। उक्तमपि– "गद्यं कवीनां निकषं वदन्ति।" संस्कृतजगति काव्यस्य मूलरूपेण भेदद्वयं भवति–

1. दृश्यकाव्यं
2. श्रव्यकाव्यश्च।

दृश्यकाव्ये दशरूपकाणां तथा च अष्टादशोपरूपकाणां च समाहारः वर्तते। दृश्यकाव्येषु गद्यपद्ययोः समाहारः प्रायः सर्वत्रैव भवति।

संस्कृतसाहित्ये प्राचीनकाव्यशास्त्रज्ञैः गद्यस्य मुख्यरूपेण भेदद्वयं स्वीकृतम्–कथा आख्यायिका चेति। एतयोः भेदयोः निरूपणं सर्वप्रथममग्निपुराणे समुपलभ्यते। तत्र गद्यकाव्यस्य पञ्च भेदाः स्वीकृताः–आख्यायिका, कथा, खण्डकथा, परिकथा, कथानिका

टिप्पणी

चेति। तदुपरान्तं गद्यकाव्यस्य भेदानां विवेचनं भामहकृतस्य 'काव्यालङ्कारम्' नाम्नि ग्रन्थे प्राप्यते। यत्र आख्यायिका कथा च एतयोः उल्लेखः वर्तते–

संस्कृतानावुफलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता।।
न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि।
संस्कृता, संस्कृता चेष्टा कथापभ्रंशभाक्तथा।।

आचार्यदण्डिना काव्यादर्शे गद्यकाव्यस्य अन्यौ भेदौ स्पष्टरूपेण निरूपितौ–

अपादः पदसन्तानो गद्यमाख्यायिका कथा।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल्।।

"ओजस्समासभूयस्त्वमेतद् गद्यस्य जीवितम्" समासबाहुल्येन गद्यस्य काठिन्यं लेखने पठने च सर्वथा प्रसिद्धमस्ति। किन्तु आधुनिकयुगस्य गद्यकाराः पाण्डित्यप्रदर्शनं विहाय समासरहितया सरलया स्वाभाविकभाषया च गद्यरचनां कुर्वन्तः सन्ति। येन सामान्यसंस्कृतज्ञोपि तां रचनां पठित्वा आनन्दं प्राप्नोति। समासप्रयोगेण वृत्तनिवेशेन च गद्यं चतुर्विधम्– 1. मुक्तकं 2. वृत्तगन्धिं 3. उत्कलिकाप्रायम् 4. चूर्णकश्चेति। मुक्तके समासरहिता रचना क्रियते। आधुनिकाः गद्यलेखकाः गद्यरचनायां मुक्तकविधस्य एव प्रयोगं कुर्वन्ति। वृत्तगन्धौ कुत्राचित् वृत्तभागः समाविष्टो भवति। उत्कलिकायां दीर्घसमासरचना भवति। चूर्णके अल्पसमासरचना भवति। प्राचीनैः काव्यशास्त्रज्ञैः गद्यकाव्यस्य प्रायः भेदद्वयं स्वीकृतं, कथारूपं आख्यायिकारूपश्च। केवलमग्निपुराणे एव पंचभेदाः उल्लिखिताः। किन्तु आधुनिकैः काव्यशास्त्रज्ञैः गद्यकाव्यस्यानेकभेदाः कल्पिताः, यथा– कथोपन्यास–संस्मरणात्मकम्–कथा–रेखाचित्र–जीवनचरित–यात्रावृत्तादयः।

आधुनिकेषु काव्यशास्त्रज्ञेषु श्रीमद्राधावल्लभ– त्रिपाठिवर्यः अभिराजराजेन्द्रमिश्रश्च प्रमुखं स्थानं भजति। उपर्युक्तानां भेदानां निरूपणं प्रो. राधावल्लभत्रिपाठिना स्वकाव्यशास्त्रग्रन्थे 'अभिनवकाव्यालङ्कारसूत्रो' कृतम्। तस्यैवाधारेण एतेषां भेदानां विवेचनमत्र प्रस्तूयते। तत्र कथायाः लक्षणमुक्तं त्रिपाठिमहोदयेन–

**'जीवनस्यैकदेशनिरूपणपरमाख्यानं कथा।'**

अर्थात् कस्यचित् पात्रविशेषस्य जीवनस्यैकभागस्य रोमांचकमुत्कृष्टश्च वर्णनं कथा भवति। आधुनिक काले कथायाः स्वरूपं पूर्णरूपेण परिवर्तितम्। अधुना सरलभाषया प्राञ्जलभाषया च कथा लिख्यते। वर्तमाने कथायाः स्वरूपं कादम्बरी दशकुमारचरितमिव च नास्ति। सम्प्रति कथायाः स्वरूपं लघु अभवत्। कादम्बर्यादिषु प्राचीनकथासु जन्मान्तरमपि वर्णितम्। किन्तु आधुनिकासु लघुकथासु जीवनस्यैकमंर्गमेव वर्णयति लेखकः।

### उपन्यासः

उपन्यासस्य लक्षणमेवमुल्लिखितं प्रो. त्रिपाठिना अभिनव– काव्यालङ्कारसूत्रो– 'गद्यबद्धउपन्यासो महाकाव्यमयी कथा।' उपन्यासे कविः महाकाव्यमिव जीवनस्य सर्वांगीणं रूपं निरूपयति। अत्र चतुर्थः अवस्थाः कथारम्भः संघर्षः आरोहः अवसानश्च भवन्ति।

उपन्यासस्य प्रमुखाः भेदाः घटनाप्रधानः, सामाजिकः, राजनैतिकः, ऐतिहासिकः, मनोवैज्ञानिकः, आंचलिकः, जीवनचरितात्मकश्चेति वर्तते।



### निबन्धः

अस्य लक्षणमेवमुल्लिखितं त्रिपाठिमहोदयेन–

'विचारविशेषस्य भावविशेषस्य गद्येन बन्धो निबन्धः।'

विचाराणां भावानां च निबन्धनाबिन्ध इति व्यपदिश्यते। निबन्धः द्विविधः विषयप्रधानो विषयिप्रधानश्च। विषयप्रधाने निबन्धे विचारस्य चिन्तनस्य च प्राधान्यं भवति। अस्य त्रयो भेदाः स्वीकृताः, वर्णनात्मकः, विवरणात्मकः, विचारात्मकश्चेति। विषयप्रधाने निबुद्धिर्वैयक्तिकाः भावाः महीयन्ते। अयं द्विविधः–भावात्मको ललितनिबन्धश्च।

### संस्मरणम्

'यथावृत्तस्य स्मृत्या आख्यानं संस्मरणम्।'

पूर्वं घटितायाः कस्याश्चित् घटनायाः वर्णनं संस्मरणमित्याहुः। अत्र स्मृत्यलङ्कारस्य प्राधान्यं भवति। कस्याश्चित् घटनायाः प्रसङ्गैस्य व्यक्तेः जातेर्वा साक्षात्कारं कृत्वा तथैव निरूपणं क्रियते।

### रेखाचित्रम्

रेखाचित्रस्य लक्षणमेवं निगदितम्– 'शब्दैर्घटनायाः व्यक्तेश्चित्रमिव निर्मितं रेखाचित्रम्।' कस्याश्चित् घटनायाः व्यक्तेश्च शब्दमाध्यमेन चित्रमिवावर्णनं रेखाचित्रं भवति। अत्र स्वभावोक्तेः प्राधान्यं भवति? स्मृतिरलङकारोऽपि कुत्रचित् भवति। रेखाचित्रं विषयप्रधानं गद्यकृतिः वर्तते। रेखाचित्रस्य कृते आंग्लसाहित्ये 'ड्रॉइंग' इति शब्दस्य प्रयोगः वर्तते। 'ड्रॉइंग' इति शब्दः क्रियासंज्ञयोः द्वयोः रूपयोः प्रयुज्यते। क्रियारूपे 'ड्रॉइंग' इति शब्दः प्रतिबिम्बस्य निर्माणाय कस्मिंश्चित् स्थाने कर्गदे वा आकृतेः निर्माणस्य कार्यं वर्तते। निर्मिता आकृतिरपि 'ड्रॉइंग' कथ्यते इति संज्ञारूपे।

### जीवनचरितम्

कस्यचित् महापुरुषस्य ऐतिहासिकपुरुषस्य वा प्ररेणाप्रदं चरितनिरूपणं जीवनचरितं भवति। क्वचिदिदं पद्यात्मकमपि भवति तथापि गद्ये एव विशेषरूपेण लिख्यते। अस्य लक्षणमेवमाह त्रिपाठी महोदयः–

'कस्यचिन्महापुरुषस्य प्रेरणाप्रदं चरितनिरूपणं जीवनचरितम्।'

### आत्मकथा

अत्र कविः प्रणेता वा स्वस्य जीवनवृत्तान्तं स्वयमेव वर्णयति। अस्य लक्षणमिदमुक्तम्–

'जीवनचरितस्यैव प्रकारविशेष आत्मकथा।' जीवनचरितमिव भवति आत्मकथा। द्वयोः मध्ये केवलमन्तरमिदं वर्तते यत् आत्मकथायां लेखकः स्वयमेव स्वस्य जीवनवृत्तान्तं लिखति तथा च जीवनचरिते अन्यः।

### यात्रावृत्तम्

कविना कृतायाः यात्रायाः वर्णनं यात्रावृत्तं भवति। तस्य लक्षणम्– 'यात्रायाः यथानुभूतं वर्णनं यात्रावृत्तम्।' गद्यकाव्यस्य एते भेदाः प्रो. राधावल्लभत्रिपाठिना आधुनिकपरिदृश्यस्याधारे विभाजिताः। एषु भेदेषु अधुना संस्कृतवाङ्मये बहु गद्यं लिख्यते।

भरतेन प्रतिपादितं यत् गद्यलक्षणम् अनियताक्षरं यस्यापरनाम् चूर्णबन्धः, तदेव स्वीकरोति मिश्रमहोदयः। शैल्याधारे गद्यं चतुर्विधं, ये भेदाः साहित्यदर्पणे प्रतिपादिताः विश्वनाथेन त एव अंगीकृताः। गद्यस्य भेदविषये अभिराजेन विभिन्नाचार्याणां मतं प्रस्तुतम्। अग्निपुराणे उल्लिखिताः गद्यस्य पश्चभेदाः अपि तेन स्वीकृताः। तेषु खण्डकथा, लघुकथा इति नाम्ना स्वीकृता। ध्वनिकारेण उल्लिखितायाः सकलकथायाः स्थाने अधुना दीर्घकथा प्रचलिता इति तेषां मतम्।

### 4.2.5 गद्यशिक्षणस्य पाठयोजना

संस्कृतभाषाः विश्वस्य प्राचीनतमं भाषा अस्ति। संस्कृतेन अनेन गद्य विधानां सूत्रपातं भवति, तेषां सरल संस्कृतेन माध्यमेन अधिकं हृदयग्राही कर्तुं शक्नोति। सरल संस्कृतेन गद्यपठनं निम्नानुसारं कर्तुं शक्नोति – (1) कथासाहित्य पठनं (2) कहानी पठनं (3) नाट्य पठनं (4) चम्पूकाव्य पठनं

संस्कृतभाषायां गद्यपठनं साहित्यं अनेन विधाः सन्ति, तेषां माध्यमेन जनमानसपर्यन्तः प्रचारयति। मनुष्यः स्वहृदयस्य संकल्पनां व्यक्तं कर्तुं गद्यस्य प्रयोगं कुर्वन्ति। छात्रनाम् संस्कृत भाषायां लेखनं वदनं च अभ्यासं गद्य माध्यमेन कर्तुं अधिकं श्रेयस्करं अस्ति। लघु–लघु कथा माध्यमेन सरल संस्कृतां गद्यपठनं खलु हि बाल मस्तिष्कं विकसितं करिष्यामि। उक्त विधानां पठनं शुद्धतापूर्वकं उच्चारणं अभ्यासं छात्रानां पर्याप्त दीयते।

**अपनी प्रगति जांचिए**

1. "अपादपटसन्तानो गद्यं" इति गद्यकाव्यविषये कः कथयति?

   (क) दण्डी (ख) भारवि

   (ग) माघ (घ) कालिदास

2. गद्यकाव्यं कतिविधं भवति?

   (क) चतुर्विधं (ख) द्विविधं

   (ग) पञ्चविधं (घ) षड्विधं

## 4.3 पद्यशिक्षणम्

पद्यशिक्षणे पद्यसाहित्य परिचयः, उद्देश्यानि, पद्यशिक्षणस्य भेदाः पद्यशिक्षणविषयः च पद्यशिक्षणस्य पाठयोजना विविचयन्ते।

### 4.3.1 पद्यसाहित्यपरिचयः

यद्यपि शब्दार्थया साहित्यं सर्वेषु वाक्येषु साधारणम् तथापि काव्यगतेषु वाक्येषु तद्विलक्षणमेव। तत्र यादृशं साहित्यं प्रतीयते तादृशं साहित्यमन्यत्र सुतरां नोपलभ्यते। अत्र हि वाक्येषु

विलक्षणं सादृश्यं वर्तते। वैलक्षण्यं च शब्दानाम् अलङ्कृतत्त्वेन व्यञ्जकत्वेन च अर्थानां तु कल्पितत्त्वेन व्यञ्जकत्वेन च। इदं वैलक्षण्यं मनसिकृत्यैव भामहादय आलङ्कारिकाः 'काव्यं नाम सहितौ शब्दार्थौ' इत्याचचक्षिरे।

टिप्पणी

काव्यगतयोः शब्दार्थयोः विलक्षणस्य साहित्यस्य दर्शनादेव काव्यविचारपरस्यास्य शास्त्रस्य साहित्यशास्त्रम् इति नामधेयं सम्पन्नम्। युक्तं चेदम्, वाक्यान्तरे अविद्यमानस्य साहित्यस्य प्रतिपादनात्। अलङ्कारशास्त्रमिति तु नामान्तरम्। अलङ्काराणां बाहुल्येन प्रतिपादनस्य सद्भावात् नामेदं प्रवृत्तम्। यद्वा, प्राचीनैः भामहादिभिः सत्स्वपि बहुषु पदार्थेषु काव्ये सारभूततया अलङ्कारमेव अङ्गीचक्रुः नान्यम् औचित्यादिकम्। अनेन तस्मिन् काले तस्यैव प्राधान्यं सिद्धम्। 'प्राधान्येन व्यपदेशा भवन्ति' इति नियमेन प्रधानभूतानामलङ्काराणां प्रतिपादकस्यास्य शास्त्रस्य तदेव नाम सम्पन्नम्। यद्यपि उत्तरे काले अन्यस्यैव रसादेः सारभूतत्त्वात् प्राधान्यतः पाश्चात्यैः विमर्शकैः निर्धारितम् तथापि कृतपूर्वस्य नामधेयस्य अनपायात् अद्यापि तदेव नाम प्रवर्तते।

### 4.2.2 पद्यशिक्षणोद्देश्यानि

संसारेऽस्मिन् मानवसभ्यताप्रवर्तकानामार्याणां वेद–उपनिषत्–स्मृत्यादिभिर्ग्रन्थैर्यथा सर्वतो महत्त्वं स्थापितमभूत्, तथा भारतीयैः पद्यैरपि आर्याणां गौरवं भूमण्डले सर्वतो विख्यातमभूत्। न केवलं भारतवासिनः एव, अपितु पारेसमुद्रवासिनः पाश्चात्य पण्डिताः अपि महाकविकालिदासादीनां पद्यैः प्रभाविताः सन्ति। एतेषां पद्यानां विवेचनार्थं, काव्यानामेषां निर्माणार्थं च साहित्यशास्त्रस्याऽविर्भावोऽभवत्। पूर्वकाले साहित्यशास्त्रमिदम् अलङ्कारनाम्ना प्रसिद्धमभूत्। यतस्तस्मिन् समये सहृदयानामाकर्षकतया अलङ्कारा एव काव्येषु प्रधानतामलभन्त। किन्तु काव्यानां मीमांसापरेऽस्मिन् साहित्यशास्त्रे प्रारम्भतः प्रभृति अद्यपर्यन्तं काव्यानां विषये अतीव गम्भीरमालोचनमभूत्। यथा यथा च मार्मिकमालोचनमभूत् तथा तथैव साहित्यशास्त्रस्याऽस्य उत्तरोत्तरं वृद्धिरभूत्। साहित्यशास्त्रस्य तत्त्वसमृद्धया च काव्येऽपि उत्तरोत्तरं चमत्कारवृद्धिरभूत्। यतो हि साहित्यशास्त्रे गम्भीरमालोचनमेव जीवितस्थानीयमुक्तं कोविदैः। यथा हि सुप्रसिद्धमिदम्–

**सङ्गीतमथ साहित्यं सरस्वत्याः स्तनद्वयम्।**
**एकमापातमधुरमन्यदालोचनाऽमृतम्।।'' इति।**

एतद्धि विहारिपद्येन अविकलं संवदते। अन्यकवीनां रचनागन्धं मनसाऽपि परिहरन, नितान्तमभिमानशाली पण्डितराजः, तत्सामयिकस्य भाषाकवेः पद्यच्छायां इच्छया अनुचकार, अथवा सामयिकः प्रभावो यदृच्छयाऽस्य रचनायामागच्छत्? इति अन्वेषणशीलाः पण्डितमहाभागा एव गवेषयन्तु। किन्तु सामयिको युगप्रवाहः सर्वथाऽनुल्लङ्घनीयो भवतीत्येव मे कथनस्य तात्पर्यम्।

ततश्च प्रारभतोऽद्यावधि सर्वामपि साहित्यस्य परिसीमां दृष्टवान् मार्मिकः पण्डितराजो मननसमुद्रे निमज्ज्य रसगङ्गाधरनाम्नीमिमां काव्यमीमांसां विरचयामास। अतएव काव्यलक्षणे अर्थस्य समावेशार्थं पण्डितराजेन विचारो न कृतः स्यात्, इति को वा विचारशीलो वक्तुं पारयेत्। किन्तु तार्किकम्मन्यानां संक्षिप्त–सुदृढ़लक्षणनिर्माणगर्वं खर्वं कुर्वन् सुदृढ–संक्षिप्तं लक्षणं निबन्ध– ''रमणीयार्थप्रतिपादक शब्दः काव्यं' इति।

टिप्पणी

यत्किञ्चित्काव्यं शब्दतः शृण्वतां पाठकमहाभागानाम् अर्थचमत्कारस्तु पुरस्तादनुभवगम्यो भवेदेव, किन्तु कर्णाभ्यां श्रुतमात्रैव सुन्दरशब्दशय्या सहृदयानाकर्षतीति वर्णिका (बानगी) रूपेण नवीनानि पद्यानि कानिचित् सम्मुखमुपस्थापयामि। एवंविधरचनाविषये काव्यादिषु सुप्रसिद्धेषु संस्कृतसाहित्यकेन्द्रेषु काव्यगतसौष्ठवविषयमवलम्ब्य पूर्णो विमर्शः समभूत्। विचारोत्तरं रचनामार्मिकैरनुगृहीता सेयं रचना प्रमोदप्रकटनरूपपुरस्कारेण।

**पद्यशिक्षणोद्देश्यानि**

1 अनुभूतिः

2 सौंदर्य अनुभूतिः

3 कल्पनाशक्ते विकासः

4 पूर्ण मनोयोगेन पद्य शृणुयाम् योग्यं कर्तुं

5 पद्येन प्रति रुचि प्रेम च उत्पन्नं कर्तुं

6 पद्यानां विभिन्न शैल्याः परिचयं कर्तुं

7 छंद अलंकार रस आदिनां ज्ञानं दातुं

## 4.3.3 पद्यशिक्षणभेदाः– श्लोक–गीतशिक्षणे

श्लोक–गीतशिक्षण विधीनां मुख्यतः प्राथमिक स्तरे प्रयोगं कर्तुं। एतद् विधिः माध्यमेन बालगीताः, छंदबद्ध च तुकबंदियुक्तं विद्यार्थियानां पाठियाष्टि। गीत विधीनां विद्यार्थियानां गायनं माध्यमेन प्रभावितं कर्तुं शक्नोति। गायनं माध्यमेन विद्यार्थियानां कंठस्थ कर्तुं सरलः भवति। एव च एतेषां माध्यमेन ते भावानुभूति अपि सरल प्रकारेण कर्तुं शक्नोति। एतेषां प्रणाल्याम् शिक्षकः सर्वप्रथमं स्वयं उचित सुरे, ताले, लये हाव–भावेन च गीतस्य सस्वरः वाचनं करोति। एतद् विधीनां प्रयोगं हेतु शिक्षकान एतानि प्रकाराणी गीतस्य चयनं कुर्यतां भाषाः ध्वन्यात्मकं च सरलं भवतु। अपि च तेषां लयबद्ध–तालबद्ध गायने आनन्दस्य अनुभूतिः शक्नोति।

## 4.3.4 पद्यशिक्षणविषयः– दण्डान्वयखण्डान्वयौ, व्याख्या, टीका, तुलना

**दण्डान्वय विधि**– एतेषां विधीनां अन्वयाः विशेषा महत्त्वं अस्ति। एतद् सर्वप्रथमं छात्रः स्वयं अथवा शिक्षके साहय्यं कवितानां प्रधान वाक्यं अन्वेषणं करोति। ते सदैव अन्वार्थाय कर्ता–क्रिया–कर्म सम्बन्धितं प्रश्नं करोति। एतेषां क्रियाणां दण्डान्वयः कथ्यते। अन्वय बोधं दंडवत दंडवत बोधं अन्वयं च भवति। “दंडवत खंडवच्चैव विभेदः अन्वयः उच्चयते।” मुख्यवाक्यानां अन्वेषणं कृत्वा आश्रित वाक्यानां प्राप्नोति। एतानि प्रकाराणि सम्पूर्णं पदं एकं वाक्यरूपेण परिवर्तितं भवति, एव हि दण्डान्वयः। एतद् विधे सर्वकार्यं व्याकरणेन सम्बन्धितं भवति। अतः काव्यानि रसादिनां बोधं न भवेत्।

**खण्डान्वय विधिः** – एतेषां विधीनां अपि दंडान्वयस्य सदृश्यं अन्वयार्थं भवति। सर्वप्रथमं प्रधानं वाक्यं अन्वेषितं जातं। दंडान्वनाय प्रश्नाः व्याकरणात्मका भवति तथापि खण्डान्वनाय प्रश्नाः साहित्यात्मकं विषयवस्तु आधारिताः भवति।

**पद्य शिक्षणस्य टीका विधिः** – एतद् विधीनां प्रवचनं विधिः अपि कथ्यते। एतद् विधिः उच्च स्तर उच्चतर स्तर च माध्यमे अति उपयोगी भवति। एते विधे शब्दस्य व्युत्पत्ति संधि, समास, कारक, विभक्ति, विलोम आदिनां समन्वितं कृत्वा पाठयति। यत् समन्वयन विधिस्य रूपः अस्ति।

उदाहरणं– मल्लिकानाथ टीका, पाणिनि टीका, याज्ञवल्क्य टीका इत्यादयः। एते टीके श्लोकस्य साहित्यं च व्याकरणस्य व्याख्या दीयते। एवं प्रसंगानुसारः अमरकोश तुलना प्रयोगः व्युत्पत्ति प्रयोगश्च क्रियतां।

**व्याख्या विधिः** – एतद् विधिः शंका समाधाने अत्यंतं उपयोगी भवति। एते विधे एकः–एकः शब्दस्य व्याख्याः क्रियतां। तदनन्तरं प्रत्येकं श्लोकस्य अर्थः क्रियतां। एते विधे व्यंगार्थ, लक्ष्यार्थ च दार्शनिक पक्षे विशेष बलं दीयतां।

उदाहरणं–

1. नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
   विक्रमार्जितसत्त्वस्य स्वयमेव मृगेंद्रता।।
2. प्रदोषे दीपकः चन्द्रः प्रभाते दीपकः रविः।
   त्रैलोक्ये दीपकः धर्मः सुपुत्रः कुलदीपकः।।

**तुलनां विधिः**– प्रस्तुत श्लोकस्य भावार्थ सम श्लोकस्य कथ्यते। अर्थात् समान अर्थस्य श्लोकानां प्रतिपादयते। एतस्य विधीनां काव्य सौन्दर्यस्य अनुभूति प्राप्यते।

उदाहरणं– देवो रुष्टे गुरुस्त्राता गुरो रुष्टे न कश्चनः।
गुरुस्त्राता गुरुस्त्राता गुरुस्त्राता न संशयः।।

समतुल्य श्लोकार्थ

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म, तस्मै श्रीगुरवे नमः।।

## 4.3.5 पद्यशिक्षणस्य पाठयोजना

पद्य पाठ योजना

1. पूर्व ज्ञान परीक्षणं
2. प्रस्तावनाः
3. उद्देश्य कथनं
4. प्रस्तुतिकरणं
5. आदर्श वाचनं, अनुकरण वाचनं
6. अशुद्धि संशोधनं काठिन्य निवारणं
7. बोद्ध प्रश्नं
8. मौन वाचनं
9. विचार विश्लेषणात्मकं
10. सार कथनं

11. पुनरावृत्ति प्रश्नः
12. गृह कार्यः

**टिप्पणी**

### अपनी प्रगति जांचिए

3. पद्यशिक्षणस्य उद्देश्य अस्ति–
   (क) अनुभूतिः (ख) प्रस्तावनाः
   (ग) प्रस्तुतिकरणम् (घ) पूर्व ज्ञान परीक्षणम्
4. पद्यशिक्षणस्य पाठयोजना अन्तर्गतः किम् अस्ति?
   (क) प्रस्तावनाः च उद्देश्य कथनं (ख) पूर्वज्ञान परीक्षणं च प्रस्तुतिकरणम्
   (ग) मौन वाचन च सार कथनं (घ) उपर्युक्तसर्वेषाम्

## 4.4 व्याकरण शिक्षणम्

व्याकरण शिक्षणे संस्कृतव्याकरणस्य परिचयः, उद्देश्यानि, व्याकरण शिक्षणस्य विधयः च व्याकरण शिक्षणस्य पाठयोजना प्रतिपादयते।

### 4.4.1 संस्कृतव्याकरणस्य परिचयः

संस्कृतभाषायामेव भारतीयज्ञानपरम्परा विद्यमाना वर्तते। भाषेयं विश्वस्य प्राचीनतमा भाषा। भारतदेशः विश्वगुरु इति। अतः भारतीयज्ञानपरम्परासंरक्षणार्थे संस्कृतभाषायाः व्याकरणस्य परमावश्यकता वर्तते, यतोहि वेदानां रक्षकत्वात् वेदार्थावबोधने सहायकत्वाच्च 'मुखं व्याकरणं स्मृतम्' इति वचनं कथ्यते। संस्कृतव्याकरणं तच्छास्त्रमुच्यते, यस्य स्वस्य स्वतन्त्रामस्तित्त्वमस्ति तथा च स्वयमेव सर्वांगपूर्णमस्ति। व्याकरणं नाम शब्दशास्त्रा–मुच्यते। अथ शब्दानुशासनमिति।

"व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्।" संस्कृतव्याकरणपरम्परायां ब्रह्मादितः पाणिनिकात्यायनपत–जल्यादिपर्यन्तं महाकृतिषु निबद्धम्। आचार्यवररुचिः व्याकरण–शास्त्रस्य वैशिष्ट्यं प्रतिपादयन् तस्य पञ्चप्रयोजनानि प्रतिपादयति। पतञ्जलेः त्रयोदश प्रयोजनानि सन्ति। तेन हि व्याकरणशास्त्रस्य नितरां वैशिष्ट्यमागतम्। पतंजलिनोक्तम्–

शब्दप्रमाणकाः वयम्। यच्छशब्दमाह तदस्माकं प्रमाणम्।

भर्तृहरिणोक्तम्–

न सो अस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

### 4.4.2 व्याकरणशिक्षणस्य उद्देश्यानि

व्याकरणशास्त्रस्य प्रयोजनावसरे अनेके विचाराः दृष्टिपथमवतरन्ति, 'प्रयोजनमनुद्दिश्य न मन्दो अपि प्रवर्तते' इति सूक्त्या अस्य शास्त्रस्य महत्त्वानि प्रयोजनानि पुरतः आयान्ति, तेषां प्रयोजनानां संकलनं चतुर्षु भागेषु भवति।

1. परमपरमप्रयोजनम् – मोक्षः।
2. परमप्रयोजनम् – अथ शब्दानुशासनम्।
3. प्रयोजनानि – रक्षोहागमलघ्वसंदेहाः प्रयोजनम्।
4. गौणप्रयोजनानि – 'ते असुराः'। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुणेति।।

अथ च सर्वेषां प्रयोजनानां क्रमेणैव व्याख्यां प्रस्तौमि–

1. **मोक्षः**– सर्वशास्त्रवद् व्याकरणशास्त्रस्यापि 'मोक्ष' एव प्रामुख्येन प्रयोजनं वर्तते, शब्दरूपात्मकं ब्रह्मेवेति परिज्ञाय मानवाः मुक्तिपथम् अधिगच्छन्ति, अत आह 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'। भर्तृहरिणा तुद्धजुमार्गरूपेण व्याकरणशास्त्रं मोक्षाय भवति इति प्रतिपादितम्। तथा चोक्तम्–

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं मोक्षमाणानामजिह्मा राजपद्धतिः।।

अर्थात् इदं शब्दशास्त्रं मोक्षाय अजिह्मराजपद्धतिः अस्ति, तस्मादध्येयं व्याकरणम्।

2. **परमप्रयोजनम्**– अथ शब्दानुशासनम्– भाष्यकारः विवरणकारत्वाद् व्याकरणस्य द्वितीयं साक्षात् प्रयोजनं वदति 'अथ शब्दानुशासनम्' इति, यद्यपि अपरे आचार्याः यत् शास्त्रारम्भप्रयोजनसूचकं भगवतः कात्यायनस्य वार्त्तिकमेतत् इति। भाष्यकारस्यैतद्व्याकरण–प्रयोजनप्रदर्शनवाक्यमिति वदन्तौ कैयटनागेशौ तु भ्रान्तौ एवेति आहुः। भाष्यकारेण वार्त्तिकं विव्रियते यत् अथेत्ययं शब्दोधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्। अधिकारः–प्रस्तावः, अर्थात् प्रारम्भस्य द्योतकः अयमथशब्दः, निपातानाश्च द्योतकत्वं वाक्यपदीये निर्णीतं वर्तते। व्याकरणस्य चेदमन्वर्थं नाम शब्दानुशासनमिति, अत्र षष्ठीतत्पुरुषसमासः, अत्र कर्तुरनुपादानात् 'उभयप्राप्तौ कर्मणि' इत्यनेन षष्ठी न, अपितु 'कर्तृकर्मणोः कृति' इत्यनेनैव षष्ठी भवति तथा च समासः शब्दानुशासनमिति।

प्रयोजनानि– रक्षोहागमलघ्वसंदेहाः प्रयोजनम्– भगवान् भाष्यकारः प्रयोजनरूपेण रक्षा उह आगम लघु असंदेहाः इति पञ्च प्रयोजनानि प्रोक्तवान्।

रक्षा– रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपा आगमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति।

उहः– उहः खल्वपि न सर्वैः लिगैः स च सर्वाभिर्विभक्तिर्विभेदे मन्त्राः निगदिताः। ते च अवश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः ता वैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।

आगमः– आगमः खल्वपि–ब्राह्मणेन निष्कारणो धर्मः षडंगैः वेदो अध्येतव्यः ज्ञेयश्चेति। प्रधानं षडंगेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।

लघुः– लघ्वर्थं चाध्येयं व्याकरणम्। ब्राह्मणेना अवश्यं शब्दा ज्ञेयाः इति। न च अन्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्।

असन्देहः– असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति–स्थूलपृषतीमाग्नि–वारूणीमनड्वाहीमालभेतेति। तस्यां सन्देहः–स्थूला चासौ पृषती च स्थूलपृषती स्थूलानि वा पृषन्ती यस्या सेयं स्थूलपृषतीति? तां नाऽवैयाकरणः स्वरतोअध्यवस्यति–

एवं प्रकारेण निबंधे अस्मिन् महाभाष्यमाधारीकृत्य अथ गुरूपरम्पराम् अधिकृत्य प्रयोजनानां वर्गीकरणं विहितम्, शब्दानुशासनस्य महद्वैशिष्ट्यं वर्तते, अतो निष्कर्षरूपेण कथयितुं शक्नुमो यत् संस्कृतभाषायाः व्याकरणमेव पूर्णं यत्र यल्लिख्यते तदेवोच्चार्यते, एको नियमः सर्वत्रा। इत्यादिकमपि संस्कृतभाषायाः वैशिष्ट्यं वर्तते। अतः उक्तश्च–

यद्यपि बहुनाधीषे तथापि पठ पुत्रा व्याकरणम्।
स्वजनः श्वजनो मा भूत सकलं शकलं सकृच्छकृत्।।

### 4.4.3 व्याकरणशिक्षणस्य विधयः– आगमन–निगमनविधिः, सूत्रविधिः, अनौपचारिकविधिः

व्याकरण शिक्षणाय निम्न विधिनां प्रयोगं भवति–

(1) आगमन विधिः

(2) निगमन विधिः वा सिद्धांत विधिः

1. सूत्र विधिः
2. पाठ्य–पुस्तक विधिः

(3) सहयोग विधि या समवाय विधिः

(4) विश्लेषण–संश्लेषण विधिः

(5) भाषा–संसर्ग विधि या अव्याकृत विधिः

#### (1) आगमन विधिः

एतेषां विधियां विद्यार्थियानां उदाहरणं दत्त्वा तेषां तर्कशक्तिः एवं चिंतन क्षमतास्य विकासं कर्तुं जातं। उदाहरणेन तेषां ज्ञानं विकसितं जातं यत् ते स्वयं हि नियमानां ज्ञातं लभते। एतद् विधिः तेषां उदाहरणेन नियमेन आगच्छति। एते कारणेन तेषां अधिगमः व्यावहारिकः, सार्थकः, स्थिरः, स्थायी च भवति। एतद् विधिस्य सम्बन्धे राइबर्न उच्यते – "शिक्षकः व्याकरण शिक्षणाय आगमन विधिस्य तु प्रयोगं कुर्यात्, विभिन्न उदाहरणेन दृष्ट्वा विद्यार्थी स्वयंएव हि नियमानां ज्ञातुं समर्थं जातुं।" अतः प्राथमिक एवं माध्यमिक स्तरे व्याकरणशिक्षणस्य एतद् सर्वोत्तम विधिः अस्ति।

**(2) निगमन विधिः वा सिद्धांत विधिः** – 1. सूत्र विधिः, 2. पाठ्य–पुस्तक विधिः।

1. **सूत्र विधिः** – एतद् विधिः प्राचीनतं विधियां एकं अस्ति। एतेषां व्याकरणस्य सिद्धांतः सूत्रः च एवं तेषां उपयोगानां विद्यार्थीयां ज्ञातं करोतु। विद्यार्थीः सर्वे सूत्राणां सर्वप्रथमं कंठस्थं करोति, तद्पश्चाद् तेषां आधारे शब्द रूपः, धातु रूपः, वाक्यः भावादिस्य भेदं कर्तुं। एतद् विधिः अज्ञातं तु ज्ञातः, अमूर्तं तु मूर्तं सिद्धान्ताय कार्यं करोति।

2. **पाठ्य–पुस्तक विधिः** – एते विधे व्याकरणस्य पुस्तकाय आधारे व्याकरणस्य अध्ययनं कुर्वन्ति। व्याकरणाय एकः निर्धारितं पाठ्य–पुस्तकं भवति। शिक्षक प्रथमे पुस्तकात् नियमानां व्याख्यां करोति। तदुपरांत विद्यार्थी तेन नियमानां उदाहरणानां च कंठस्थ करोतु। एते विधे माध्यमिक कक्षायां प्रयोगं कर्तुं शक्नोति, किन्तु एते विद्यार्थीयानां सहयोगानि अध्यापनं कुर्यात् तदैव हि विधिः प्रभावी शक्नोति।

**टिप्पणी**

**अनौपचारिक विधिः** – व्याकरण विषयः स्वयमेव अत्यंत क्लिष्ट विषयः अस्ति, एतस्य अधिगमनस्य अनेकशः विधियां सन्ति किन्तु संस्कृत व्याकरण शिक्षणस्य अनौपचारिक विधिः एकः सारगर्भितः सरलः, सुगम्य च विधिः अस्ति। अनौपचारिक अर्थात् पारम्परिक विधियात् भिन्नः प्रक्रियाः। बालकः स्वपरिजनस्य यथा माता – पिता, भ्राता – भगिनिस्य अश्रुणयां व्याकरणस्य ज्ञानं अर्जनं करोति। एतद् भिन्नाः परिवेशः, समाजे, जनसंचार माध्यमेन अपि बालकः व्याकरणस्य ज्ञानं अधिगमतु। एते विधे अनुकरण विधिः अपि कथ्यते। विद्वानस्य मतं अस्ति यत् व्याकरण अधिगमन व्यावहारिक भवेत्।

### 4.4.4 व्याकरणशिक्षणस्य पाठयोजना

1. अशुद्धि संशोधनं काठिन्य निवारणं
2. बोद्ध प्रश्नं
3. मौन वाचनं
4. विचार विश्लेषणात्मकः
5. सार कथनं
6. पुनरावृति प्रश्नाः
7. गृह कार्यः
8. आदर्श वाचनं, अनुकरण वाचनं

**अपनी प्रगति जांचिए**

5. व्याकरणस्य अन्य नाम किम्?

   (क) शब्दानुशासनम् (ख) तर्कशास्त्रम्

   (ग) साहित्यशास्त्रम् (घ) अलंकारशास्त्रम्

6. "व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्" कस्य परिभाषा अस्ति?

   (क) निरूक्तस्य (ख) व्याकरणस्य

   (ग) कल्पस्य (घ) छन्दस्य

## 4.5 संस्कृतशिक्षणे मूल्यांकनम्

मूल्यांकनं एव प्रक्रिया अस्ति येन आधारे वयं कोऽपि छात्रस्य ज्ञानं आकलनं करोति। मूल्यांकनाय आधारं हि छात्रस्य कोऽपि विषयां त्रुटिः, तेषां केनापि विषयस्य प्रति रुचि एवं तस्य प्रतिभास्य आकलनं क्रियतां।

**मूल्यांकनस्य परिभाषा**

क्विलिन व हन्ना अनुसारे मूल्यांकनस्य परिभाषाः – "छात्राणां व्यवहारे विद्यालयं माध्यमेन आगतः परिवर्तनां विषये प्रमाणस्य संकलन एवं तस्य व्याख्यां कर्तुं प्रक्रिया हि मूल्यांकनं अस्ति।"

टिप्पणी

मूल्यांकनं द्वि प्रकाराः सन्ति –

**जांच सूची** – जांच सूची विद्यार्थियानां व्यवहारस्य अन्य पक्षायां संबंधे मूल्यांकनस्य एकः सरलं एवं प्रभावी साधनं अस्ति।

**स्तरस्य मापन** – एतेषां प्रयोगः सूक्ष्म अवलोकनस्य योग्यता साधनं अस्ति।

## 4.5.1 मूल्यांकनतात्पर्यम्

मूल्यांकन केनापि अध्ययन – अध्यापनस्य अभिन्नं भागः अस्ति। यत् कदापि कश्चिद् प्रश्नं प्रच्छतुः एवं तस्य उत्तरं दीयतां, तदा एतद् मूल्याङ्कनं प्रक्रिया एव अस्ति। अतः अध्यापन – मूल्याङ्कन च आश्रितः अस्ति। विना मूल्यांकने अध्ययन – अध्यापनं कदापि सम्भवं न अस्ति। अध्यापन एवं मूल्यांकन उभे तेन अनुदेशनात्मकः उद्देश्यां आधारिता अस्ति, एवं तेषां दिशां प्रदानं करोति।

अनुदेशनात्मकः उद्देश्य ते वांछनीय व्यवहारः अस्ति, येनां विद्यार्थियां क्रियतां अपेक्षितं अस्ति। एतेषां उद्देश्यानां प्राप्ताय शिक्षां प्रदातु। एतद् अपि सुनिश्चितं क्रियतां यत् विद्यार्थी एतद् उद्देश्यानां प्राप्नं शक्नोति अथवा न प्राप्नं शक्नोति।

अध्ययन–अध्यापनस्य त्रीणि घटकानि सन्ति – उद्देश्य, शिक्षण (अनुदेशी) प्रक्रियाः वा अधिगम अनुभव एवं मूल्याङ्कनं। एतानि घटकानि एकः परितः निर्भरः भवति। मूल्यांकने अध्यापकः न केवलं अस्य आकलनं करोति यत् विद्यार्थी अध्यापनस्य उद्देश्यस्य किति प्राप्तं क्रियतां तथापि एतेषां उद्देश्याम् प्राप्तनाय प्रयुक्तं साधनानां एवं सामग्रियां, अध्ययन उद्देश्यायां क्रियाविधियाः किति प्रभावशाली अभवत्।

## 4.5.2 मूल्यांकनप्रकाराः– वस्तुनिष्ठं, आत्मनिष्ठं च, मौखिकं लिखितं च।

### मौखिक मूल्यांकन

मौखिक मूल्यांकने प्रश्नः, वाद–विवादः, नाटकः इत्यादि सम्मिलिताः अस्ति। प्राचीनकाले एतद् एव तकनीकं हि प्रयोगमस्तु तत् काले मुद्रण तकनीकं विकसितं न अभवत्। इति च मन्यते यत् सर्वप्रथमं मौखिकं परीक्षास्य प्रयोगः ग्लेंडाइटस महोदयेन अकरोत्। तत्पश्चाद् सुप्रसिद्ध दार्शनिक सुकरात महोदयेन यत् प्रणालिस्य शुभारम्भं अकरोत्।

मौखिक परीक्षायां परीक्षक एवं परीक्षार्थी प्रत्यक्ष रूपेण अंतर्क्रियां करोतु। एतद् परीक्षाणां उद्देश्य मौखिक प्रश्नानां माध्यमेन बालकानां अभिव्यक्ति एवं क्रियाशीलतास्य परीक्षणं कृतां भवति।

### लिखित मूल्यांकन

मौखिक मूल्यांकनस्य अनन्तरं लिखित मूल्यांकनस्य शुभारम्भं अभवत्। मूल्यांकनं मापनं क्षेत्रे एतद् परीक्षायां अत्यंत महत्त्वपूर्णं स्थानं भवति। एतस्य द्वि स्वरूपः प्रचलितं अस्ति– 1. वस्तुनिष्ठ मूल्यांकन, 2. आत्मनिष्ठ (निबंधात्मक) मूल्यांकन।

**1. वस्तुनिष्ठ मूल्यांकन** – एतद् परीक्षाः विधिमान्य, वस्तुनिष्ठ उपयोगी च भवति। एतेषां परीक्षायां उत्तरलेखनस्य विधिः अत्यंत सरलं एवं संक्षिप्तं भवति। अस्ये प्रमाणिकं कर्तुं शक्नोति।

**टिप्पणी**

स्टैनले एवं रॉसस्य अनुसारेण वस्तुनिष्ठ परीक्षास्य निर्माणस्य चत्वारः सोपानं अस्ति–

1. नियोजनं
2. पदस्य रचना
3. परीक्षास्य परीक्षणं
4. मूल्याङ्कनं

वस्तुनिष्ठ परीक्षाः द्वि प्रकारस्य भवति –

1. प्रत्याभिज्ञान रूप
2. प्रत्यास्मरण रूप

**1. प्रत्याभिज्ञान रूप** : प्रत्याभिज्ञान रूपे एकस्य प्रश्नस्य अनेकाः संम्भावितः उत्तरां दीयतां एवं छात्राणां तेषां एकः एव उत्तरस्य चयनं कुरीतां। एतद् माध्यमेन छात्रस्य चयनं शक्तिस्य परीक्षाः भवति।

एतद् प्रकारेण प्रत्याभिज्ञान रूपस्य पञ्च प्रकाराः सन्ति–

**(क) एकान्तर अनुक्रिया रूप** : एतेषां सत्य–असत्य रूपः अपि कथ्यते। एतेषां किंचिद् कथनं भवतु, ते सत्य असत्य वा भवतु। छात्राणां द्विविकल्पमेतु एकस्य विकल्पस्य अंकितं कर्तुं भवति।

एतद् प्रकारस्य प्रश्नानां रचना करणं सरलं भवति।

**(ख) बहुनिर्वाचनं रूप** : एतस्य प्रकारस्य प्रश्नानां एकस्य प्रश्नस्य अनेकः विकल्पः दीयतां, तेषां सर्वाधिकं उचितं उत्तरस्य चयनं क्रियतां। एतद् प्रश्नानां माध्यमेन तर्कपूर्ण चिंतनस्य क्षमतास्य परीक्षाः भवति।

**(ग) समानताः रूप** : एतेषां प्रश्नानां द्वे स्तम्भ मध्ये लिखितां। एके स्तम्भे केचन् प्रश्नं दीयतां एवं अन्य स्तम्भे तेषां उत्तरं दीयतां, ते क्रमबद्ध रूपेण न भवति। छात्रस्य उचितं उत्तरस्य चयनं क्रियतां।

**(घ) वर्गीकरणः रूप** : एतद् प्रकारस्य मुल्यांकने कश्चिद् शब्दाः ससंगतः भवति किन्तु तेषां एकः शब्दः असंगतः भवति। छात्रस्य तस्य एकः असंगतः शब्दस्य चयनं क्रियतां। एतेषां प्रश्नानां उद्देश्य छात्राणां विभेदीकरणस्य क्षमतास्य ज्ञातुं भवतु।

**(ङ) सादृश्य अनुभव रूप** : एतेषां प्रश्नानां द्वि समान परिस्थिति प्रस्तुतं क्रियतां। प्रथम परिस्थितिस्य आधारे समानतास्य संबंधानां स्थापितं कृत्वा द्वितीय परिस्थितियां पूर्णं क्रियतां।

**2. प्रत्यास्मरण रूप** : प्रत्यास्मरणस्य अर्थम् भवति – प्रति + स्मरणः अर्थात् पुनः स्मरण। एतेषां प्रश्नानां विषये सम्बंधित सूचनानां पुनः स्मरण कृत्वा तेषां दीयतां। ये द्वे प्रकारस्य भवति–

**(क) सामान्य प्रत्यास्मरण रूप** : एतेषां साधारणं प्रश्नं प्रच्छतां। प्रश्नस्य स्वरूपः एतद् प्रकारस्य भवति यत् तस्य एकहि विशिष्टं उत्तरं भवति।

**(ख) रिक्त स्थानं पुर्तिः रूप** : एतद् प्रकारस्य प्रश्नः अपूर्ण कथनं अथवा वाक्यानां रूपं भवति। प्रत्यास्मरणस्य आधारे छात्रः रिक्त स्थानस्य पूर्ति करोति।

**टिप्पणी**

**आत्मनिष्ठ मूल्यांकनः** – एतद् विधे व्यक्तित्व – गवेषणा स्वयं परीक्षकस्य अथवा तस्य परिचितानां सहाय्यं क्रियतां। एतेषां निम्नलिखित विधियां प्रयोगः क्रियतां –

1. जीवन इतिहास विधिः
2. प्रश्नावली विधिः
3. साक्षात्कार विधिः
4. आत्मकथालेखन विधिः

### 4.5.3 निर्माणात्मकं योगात्मकं च मूल्यांकनम्

निर्माणात्मक मूल्यांकनस्य उद्देश्य शिक्षकानां छात्राणां च अनेकाः जनाः द्वाराः 'अधिगम्याय आकलनः' अपि कथ्यते। एतेषां आकलनस्य मुख्यप्रयोजनं छात्राणां तत् रचनात्मक प्रतिक्रियाः प्राप्तं करणाय सक्षम करोति, यत् तेषां श्रेयस्कर अधिगम एवं प्रभावी प्रगतिः करणाय तेषां सहाय्यं करिष्यामि। अस्य प्रतिक्रिया सामान्यतः शिक्षकेन माध्यमेन दीयतां।

योगात्मक आकलन – योगात्मक आकलनस्य 'अधिगमस्य आकलन' अपि कथ्यते। एतेषां आकलनस्य मुख्यप्रयोजनं शिक्षकायां छात्राणां उपलब्धिं एवं कार्यं प्रदर्शनस्य चयनं सक्षमं कारयतु, एतेषां अधिगमस्य अवधि एक सत्र वा एक वर्षः शक्नोति।

### 4.5.4 संस्कृत क्षेत्रे मूल्यांकन सम्बद्ध समस्या समाधानि च

भारतीयशिक्षणे 'मूल्यांकन' शब्दः परीक्षा, तनावः, दुश्चिंतास्य प्रतीकः अस्ति। पाठ्यक्रमस्य परिभाषा एवं नवीनीकरणस्य सर्वे प्रयासाः विफलः जाता यत् ते विद्यालयस्य शिक्षा प्रणाले समाहित मूल्यांकन एवं परीक्षातंत्रस्य अवरोधे संघर्षं कर्तुं न शक्नोति। वयं मूल्यांकनस्य तस्य दुष्प्रभावीनां चिन्ताः अस्ति यत् शिक्षणस्य प्रक्रियां सार्थकं कर्तुं एवं बालकाय आनंददायी कर्तुं प्रयासायां अवरोधति।

एकः श्रेष्ठः मूल्यांकन पद्धति अधिगमस्य प्रक्रियायां अभिन्नं अंगः शक्नोति येतेषां शिक्षार्थीः एवं शिक्षा तंत्रः उभयस्य एव विवेचनात्मकं एवं आलोचनात्मकं प्रतिपुष्टे लाभः संभवति।

#### अपनी प्रगति जांचिए

7. वस्तुनिष्ठं, आत्मनिष्ठं, मौखिकं लिखितं च कस्मिन् प्रकाराः सन्ति?

   (क) व्याकरण शिक्षणम् (ख) पद्यशिक्षणम्

   (ग) मूल्यांकनम् (घ) गद्यशिक्षणम्

8. प्रश्नः, वाद–विवादः नाटकः कस्मिन् मूल्यांकने सम्मिलिताः अस्ति?

   (क) लिखितं (ख) मौखिकं

   (ग) वस्तुनिष्ठं (घ) आत्मनिष्ठं

## 4.6 आत्मनम् आकलयन्तु प्रश्नोत्तराणि

1. (क)
2. (ख)

**टिप्पणी**

3. (क)
4. (घ)
5. (क)
6. (ख)
7. (ग)
8. (ख)

## 4.7 सारांशः

गद्यकाव्यसाहित्यं गीर्वाणवाण्यां चिरन्तनं नित्यनूतनं च। गद्यकाव्यविषये दण्डी कथयति – ''अपादपटसन्तानो गद्यं'' इति। वस्तुतस्तु पदानां वृत्तापेक्षया प्रयोगो यत्र तत्पद्यं यत्र तु स्वातन्त्र्येण प्रयोगस्तद्गद्यं भवति। गद्यं नाम भाषायाः प्राकृतिकं स्वरूपं तद्विपरीतं पद्यं तस्य निर्मितं रूपम्। यथा गद्यते तद् गद्यम्, यथा अहं पुस्तकं पठामीति। एतद्धि अनियतवर्णावसानं भवति। पद्यं तु नियतवर्णावसानं पादबद्धमेव। कृष्णयजुर्वेदे एतादृशाः अनेके मन्त्राः उपलभ्यन्ते, ये च प्राचीनतमां गद्यशैलीं प्रख्यापयन्ति। अतः एवं ज्ञातुं शक्यते यत् यस्याः कस्या अपि भाषाया प्रथमो विकासः गद्यरूप एव भवितुमर्हति। संस्कृते तु वेदोपनिष्दां साहित्यराशिम् अवलोकयामश्चेत् गद्यप्रकारः शनैः शनैः विकचीबभूवेति अवगन्तुं शक्यते। वेदानां काले यादृशि गद्ये साहित्ये विदुषाम् अभिरुचिः आसीत्, न खलु तदुत्तरकाले। गीतेषु, पद्येषु, छन्दस्सु च जनप्रियता यदाऽवर्धत् तदा गद्यसाहित्यनिर्माणेऽपि वैरल्यं दृश्यते। किन्तु महाभारतेतिहासेऽपि तत्र तत्र गद्यप्रयोगाः अवलोक्यन्ते। यथा– स तथेत्युक्त्वा तमश्वमधिरुह्य प्रत्याजगामोपाध्यायकुलमुपाध्यायानी च स्नाता केशानावा– पयन्त्युपविष्टोत्तङ्को नागच्छतीति शापायास्य मनो दधे।

मानवेतिहासे पद्यकाव्यात् गद्यकाव्यं प्राचीनतमं वर्तते, यतोहि विचाराणां भावानां च सम्प्रेषणं गद्येन भवति। तथापि गद्यकाव्यस्य विकासं तादृशं नाभूत् यादृशं पद्यकाव्यस्य। यतोहि गद्यकाव्यं पद्यकाव्यात् क्लिष्टतरं वर्तते।

यद्यपि शब्दार्थया साहित्यं सर्वेषु वाक्येषु साधारणम् तथापि काव्यगतेषु वाक्येषु तद्विलक्षणमेव। तत्र यादृशं साहित्यं प्रतीयते तादृशं साहित्यमन्यत्र सुतरां नोपलभ्यते। अत्र हि वाक्येषु विलक्षणं सादृश्यं वर्तते। वैलक्षण्यं च शब्दानाम् अलङ्कृतत्त्वेन व्यञ्जकत्वेन च अर्थानां तु कल्पितत्त्वेन व्यञ्जकत्वेन च। इदं वैलक्षण्यं मनसिकृत्यैव भामहादय आलङ्कारिकाः 'काव्यं नाम सहितौ शब्दार्थौ' इत्याचचक्षिरे।

काव्यगतयोः शब्दार्थयोः विलक्षणस्य साहित्यस्य दर्शनादेव काव्यविचारपरस्यास्य शास्त्रस्य साहित्यशास्त्रम् इति नामधेयं सम्पन्नम्। युक्तं चेदम्, वाक्यान्तरे अविद्यमानस्य साहित्यस्य प्रतिपादनात्। अलङ्कारशास्त्रमिति तु नामान्तरम्। अलङ्काराणां बाहुल्येन प्रतिपादनस्य सद्भावात् नामेदं प्रवृत्तम्। यद्वा, प्राचीनैः भामहादिभिः सत्स्वपि बहुषु पदार्थेषु काव्ये सारभूततया अलङ्कारमेव अङ्गीचक्रुः नान्यम् औचित्यादिकम्। अनेन तस्मिन् काले तस्यैव प्राधान्यं सिद्धम्। 'प्राधान्येन व्यपदेशा भवन्ति' इति नियमेन प्रधानभूता–

नामलङ्काराणां प्रतिपादकस्यास्य शास्त्रस्य तदेव नाम सम्पन्नम्। यद्यपि उत्तरे काले अन्यस्यैव रसादेः सारभूतत्त्वात् प्राधान्यतः पाश्चात्त्यैः विमर्शकैः निर्धारितम् तथापि कृतपूर्वस्य नामधेयस्य अनपायात् अद्यापि तदेव नाम प्रवर्तते।

टिप्पणी

संस्कृतभाषायामेव भारतीयज्ञानपरम्परा विद्यमाना वर्तते। भाषेयं विश्वस्य प्राचीनतमा भाषा। भारतदेशः विश्वगुरुः इति। अतः भारतीयज्ञानपरम्परासंरक्षणार्थे संस्कृतभाषायाः व्याकरणस्य परमावश्यकता वर्तते, यतोहि वेदानां रक्षकत्वात् वेदार्थावबोधने सहायकत्वाच्च 'मुखं व्याकरणं स्मृतम्' इति वचनं कथ्यते। संस्कृतव्याकरणं तच्छास्त्रमुच्यते, यस्य स्वस्य स्वतन्त्रामस्तित्त्वमस्ति तथा च स्वयमेव सर्वाङ्पूर्णमस्ति। व्याकरणं नाम शब्दशास्त्र–मुच्यते। अथ शब्दानुशासनमिति।

मूल्यांकन केनापि अध्ययन – अध्यापनस्य अभिन्नं भागः अस्ति। यत् कदापि कश्चिद् प्रश्नं प्रच्छतुः एवं तस्य उत्तरं दीयतां, तदा एतद् मूल्याङ्कनं प्रक्रिया एव अस्ति। अतः अध्यापन – मूल्याङ्कन च आश्रितः अस्ति। विना मुल्यांकने अध्ययन – अध्यापन कदापि सम्भवं न अस्ति। अध्यापन एवं मूल्यांकन उभे तेन अनुदेशनात्मकः उद्देश्यां आधारिता अस्ति, एवं तेषां दिशां प्रदानं करोति।

अनुदेशनात्मकः उद्देश्य ते वांछनीय व्यवहारः अस्ति, येनां विद्यार्थियां क्रियतां अपेक्षितं अस्ति। एतेषां उद्देश्यानां प्राप्ताय शिक्षां प्रदातु। एतद् अपि सुनिश्चितं क्रियतां यत् विद्यार्थी एतद् उद्देश्यानां प्राप्तं शक्नोति अथवा न प्राप्तं शक्नोति।

अध्ययन–अध्यापनस्य त्रीणि घटकानि सन्ति – उद्देश्य, शिक्षण (अनुदेशी) प्रक्रियाः वा अधिगम अनुभव एवं मूल्याङ्कनं। एतानि घटकानि एकः परितः निर्भरः भवति। मूल्यांकने अध्यापकः न केवलं अस्य आकलनं करोति यत् विद्यार्थी अध्यापनस्य उद्देश्यस्य किति प्राप्तं क्रियतां तथापि एतेषां उद्देश्याम् प्राप्तनाय प्रयुक्तं साधनानां एवं सामग्रियां, अध्ययन उद्देश्यायां क्रियाविधियाः किति प्रभावशाली अभवत्।

## 4.8 मुख्यशब्दावलीः

- **नूतनं** : नया, नवीन
- **सहस्रम्** : हजार
- **ददाति** : देता है
- **रोचते** : रुचिकर या अच्छा लगना
- **उपलभ्यते** : प्राप्त होता है
- **प्राप्यते** : प्राप्त करता है
- **किल** : निश्चय ही
- **क्वचित्** : कहीं पर
- **बहु** : अनेक
- **प्रतीयते** : प्रतीत होता है

टिप्पणी

## 4.9 स्व–मूल्यांकनं प्रश्नाः अभ्यासश्च

**लघु–उत्तरीय प्रश्न**

1. गद्यसाहित्यस्य परिचयः संक्षिप्त रूपेण विवेचयतु?
2. गद्य शिक्षणस्य कति भेदाः सन्ति?
3. पद्यशिक्षणस्य किम् अभिप्रायं अस्ति?
4. संस्कृत व्याकरणस्य परिचयः ददातु?
5. निर्माणात्मकं योगात्मकं च मूल्यांकनम् स्पष्टं करोतु?

**दीर्घ–उत्तरीय प्रश्न**

1. गद्यशिक्षणस्य विधयः विस्तृतरूपेण वर्णनं करोतु?
2. पद्यशिक्षणस्य किम्–किम् उद्देश्यानि भवन्ति?
3. संस्कृतभाषाशिक्षणे व्याकरणस्य महत्त्वं प्रतिपादयतु?
4. व्याकरणशिक्षणायविधिः प्रयोगं विस्तृतरूपेण प्रतिपादयतु?
5. संस्कृत टिप्पणीः लिखतु–

   (क) मौखिक मूल्यांकनं (ख) लिखित मूल्यांकनं

   (ग) वस्तुनिष्ठ मूल्यांकनं (घ) आत्मनिष्ठ मूल्यांकनं

## 4.10 सहायकपाठ्यसामग्री

**पाण्डेय, रामशकल (2003)** संस्कृत शिक्षण. आगराः विनोद पुस्तक मंदिर।

**शर्मा एवं सिंह (4996)** संस्कृतशिक्षणम् भारतमुद्रा, त्रिचूरः पुरनाट्टकरा।

**शर्मा, वि. मुरलीधर (2003)** संस्कृतशिक्षणसमस्याः. तिरुपतिः राष्ट्रिय संस्कृत विद्यापीठ

**संस्कृतभाषाशिक्षणम (2004)** भोपालः मध्यप्रदेश संस्कृत बोर्ड लोक शिक्षण संचालनालय, स्कूलशिक्षा विभाग, मध्यप्रदेश।

**साम्बशिवमूर्ति, कम्भम्पाटि, (2006)** संस्कृतशिक्षणम् जयपुरम् दीपशिखा प्रकाशन।

**सफाया, रघुनाथ (1997)** संस्कृतशिक्षण, चण्डीगढ़ः हरियाणा साहित्य अकादमी।

**विश्वासः (2004)** कौशलबौधिनी, नई दिल्लीः संस्कृत भारती, माता मंदिर गली, झण्डेवालान।

**व्यास, भोलाशंकर (1994)** संस्कृत भाषा. दिल्लीः चौखम्बा विद्याभवन, गोपाल मंदिर लेन, 39, यू ए. बंगलो रोड, जवाहरनगर।

**आप्टे, वामन शिवराम (2009)** संस्कृत हिन्दी शब्दकोश, दिल्लीः न्यू भारती बुक कारपोरेशन।

# टिप्पणी

टिप्पणी